वक्रघोणाः[9] सदा[10] क्रूराः प्रशस्ता बिल[11]साधने ॥ १० ॥
निर्मांस[12]मूर्द्धपिण्डीकान्[13] रक्तकेशान् गतालसान्[14] ।
कठिनानुष्णपादांश्च[15] धातुवादे[16] नियोजयेत् ॥ ११ ॥
आदौ परीक्षयेद्देवि साधकान्[17] सुसमाहितान् ।
ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रांश्चानुक्रमेण तु[18] ॥ १२ ॥
जितेन्द्रियाः क्लेशसहा नित्योद्यमसमन्विताः ।

---

(1) K reads देवाग्नौ, which is inc. (2) K reads सिद्धो instead of शिष्यो. The portion beginning from लोभमायाविनिर्मुक्तो and ending in सत्यवादी दृढव्रतः is not to be found in M. (3) K reads क्रूरा (without विसर्ग), which is absurd and inc. (4) B reads लाञ्छनैः. K reads लक्षणैः. (5) M reads नरैः, which is inappropriate. (6) निधिदर्शने, a variant in M. (7) K reads महासाधु, which is gram. inc. (8) B reads कृष्णारक्त. (9) K reads वक्रघोराः. (10) सवा, a variant in K, which is meaningless. (11) K reads किल, which is a mere expletive. (12) K reads निर्मांसा. (13) B reads मूर्द्धपिण्डीकं. M reads मूर्द्धफलिकान्. (14) K reads रक्तकेशाङ्गनासिकाः. (15) K reads कठिनात्युष्णपादाश्च. कठिनानुष्ण...श्च, an incomplete variant in M. (16) K reads धातोर्वादे. (17) M reads साधनान्, which is gram. inc. (18) ब्राह्मणं क्षत्रियं वैश्यं शूद्रं चानुक्रमेण तु, a variant in K. M has च instead of तु.

शूराश्च कृतविद्याश्च प्रशस्ताः[1] साधकाः प्रिये ॥ १३ ॥
रसदीक्षाविहीना ये[2] प्रोक्तलक्षणवर्जिताः ।
विप्लावकाः पापरता[3] वर्जयेत्तान्[4] प्रयत्नतः ॥ १४ ॥
दुश्चारिणी दुराचारा निष्ठुरा कलहप्रिया ।
बह्वाशिनी[5] च दुश्चित्ता कोटराक्षी च निर्दया ।
रसनिन्दाकरी या च तां नारीं परिवर्जयेत् ॥ १५ ॥
ईदृशीभिर्वरारोहे[6] सम्पूर्णं क्षितिमण्डलम् ।[7]
न तादृशी[8] भवेन्नारी यादृशी रसबन्धकी ॥ १६ ॥[9]
काकिणी कोकणी नारी तथैव काञ्चिकाचिनी ।[10]
कृष्णपक्षे ऋतुमती सा नारी काकिणी स्मृता ॥ १७ ॥
उभयपक्षे ऋतुमती सा नारी कोकणी मता[11] ॥ १८ ॥
शुक्लपक्षे ऋतुमती सा नारी[12] काञ्चिकाचिनी ॥ १९ ॥

---

(1) K reads विशेषाः. The portion commencing from the 14th śloka and ending in the first hemistich of the 45th is wanting in M. (2) K reads नरा दीक्षाविहीनाश्च. (3) K reads अवैष्णवान्यायरताः. (4) K reads वर्जये तान्, which is gram. inc. (5) B reads वकाशनी. (6) K reads इदृशी, which is palpably inc. (7) K has सम्पूर्णक्षितिमण्डले. (8) K reads तादृशी च. (9) Cf. रसरत्नसमुच्चय, Chap. VI. ślokas 34—38. (10) काकणी कांचिकाचीनि कोकणी, a variant in K, which we have not adopted for its deficiency in words and defect in metre. र. र. स. reads कालिनी in lieu of काकिणी. (11) उभयपक्षे ऋतुमती सा कोकणी, a variant in K, where some words are wanting. (12) This word is not found in K. The ślokas 17—19 are not found in B.

नवयौवनसम्पन्ना सुरूपा चारुहासिनी ।
सूक्ष्मकेशा तु या नारी क्षीराहारप्रिया सदा ॥ २० ॥
प्रियालापकरो[1] नित्यं शिवशास्त्रकथाप्रिया ।
पद्माकारं[2] मुखं यस्या दृष्टिरिन्दीवराकृतिः ॥ २१ ॥
दशना वज्रसदृशाः प्रवालसदृशोऽधरः[3] ।
यस्याः पयोधरौ देवि तुङ्गपीनौ समावुभौ ॥ २२ ॥
अश्वत्थपत्रसदृशी योनी यस्या भगः समः ।[4]
यत्पादौ मांसलौ स्निग्धौ वर्त्तुलावर्त्तरोमकौ[5] ॥ २३ ॥
श्यामा च मध्ये क्षामा च[6] तन्वी भक्तिपरा[7] शिवे ।
पद्मिनी सा तु विज्ञेया प्रसन्ना[8] मृगलोचना ॥ २४ ॥
पूर्णिमायाममायां वा पक्षे पक्षे रजस्वला ।
षड्भेदा काकिणी नाम्ना पूर्व्वप्रोक्ता रसप्रदा ॥ २५ ॥[9]
यस्य तुष्टो महादेवस्तस्य सिद्धो[10] रसायने ।
तथैव[11] देवदेवेशि रसकर्म्माणि कारयेत् ॥ २६ ॥

(1) प्रियालापकरि, a variant in K, which is inc. (2) K has सद्म कमल. (3) B reads प्रवालसदृशाधरा. K has दशनं वज्रसदृशं प्रवालसदृशाधर, which seems to be inc. (4) अश्वत्थपत्रसदृशयोनिर्दिशसुशोभिता, a variant in र. र. स. (5) वर्त्तुलाविकरोमकौ, a variant in B. (6) मध्यसूक्ष्मा च, a variant in K. (7) भक्तीपरा, a variant in K, which is inc. (8) B reads सततं. (9) The 25th śloka is not found in B. (10) B reads तस्य सिध्यति तादृशी. K reads सिद्धि, which is gram. inc. (11) K reads तथैव.

तस्य हि निर्म्मला बुद्धिर्निश्चिता रससाधने ।
तस्माद्गुरुश्च शिष्यश्च पूर्व्वोक्तः सिद्धिभाग्भवेत् ॥ २७ ॥
श्रीदेव्युवाच ।
ईदृशैर्लक्षणैः[1] नारीं कुतः प्राप्नोति साधकः ।
यत्र रूपं महादेव लक्षणं नात्र विद्यते ॥ २८ ॥
लक्षणं विद्यते यत्र भावना नात्र विद्यते ।
अथवा रूपहीनाया रूपं केन प्रवर्त्तते ॥ २९ ॥
लक्षणत्रितयं[2] कुत्र त्वया दृष्टं महेश्वर ।
तदेतज्जायते येन तमुपायं वद प्रभो[3] ॥ ३० ॥
श्रीभैरव उवाच ।
शृणु देवि परं गुह्यं यत्सुरैरपि दुर्लभम् ।
पितुः सदाशिवाज्जातं[4] जन्म यच्चण्डिकोदरे ॥ ३१ ॥
तासां बुद्धिर्भवेद्देवि निर्म्मला रससाधने ।
दापयेत्त्वरितामन्त्रं जपेत्तं[5] दर्पवर्जिता[6] ॥ ३२ ॥
लक्षमन्त्रं[7] जपेदूया तु जायते सा सुलक्षणा ।
बद्ध्वा तु खेचरीं मुद्रां जपेत् फेट्कारभैरवीम् ॥ ३३ ॥

(1) ईदृशीं लक्षणां, a variant in K, which is gram. untenable. [Here उपलक्षितां is to be understood.] (2) K reads लक्षणं त्रितयं. (3) K reads तदुपायं वद मे प्रभो, where the word मे can be left out in order to keep up the metre. (4) The reading in K is gram. inc. ; the text runs thus :—पितुः सदाशिवाज्जाय तन्मायायाश्चण्डिकोदरे. (5) [Here सा is to be understood.] (6) तं जपेद्दूपवर्जिता is the reading in B. (7) B reads लक्षमात्रं.

ममेयं[1] चण्डिका माता जन्म च त्रिपुरान्तकात्[2] ।
कालिकाहं समुद्भूतास्मीदृशं संस्मरेत्तु[3] सा ॥ ३४ ॥
भूतं भव्यं भविष्यच्च त्रैलोक्ये[4] कथयेत्तु सा ।
सहायास्तादृशास्तस्य यादृशी भवितव्यता ॥ ३५ ॥[5]

श्रीदेव्युवाच ।

देवदेव महादेव समस्तज्ञानभाजन ।
रसदीक्षां तु पृच्छामि साधकानां हिताय वै ॥ ३६ ॥

श्रीभैरव उवाच ।

शृणु भैरवि यद्भावम्[6] अपूर्व्वं वर्णयामि ते ।
रसदीक्षाविधानन्तु[7] तस्मान्निगदितं शृणु ॥ ३७ ॥
यत्र राजा नयपरो[8] बलवान् धर्म्मतत्परः ।
मन्त्री च धर्म्मतत्त्वज्ञो भक्तिश्रद्धासमन्वितः ॥ ३८ ॥
तत्रेदं कारयेत् कर्म्म रसबन्धं रसायनम् ।
जना माहेश्वरा यत्र तत्र स्थाने[9] तु कारयेत् ॥ ३९ ॥

(1) After the 33rd śloka we find a hemistich in B, which runs thus :—सदा प्रवर्त्तते भावो जन्म स्मरति साद्भुतं ; we have rejected it, since the 34th śloka serves the same purpose. K reads ममैवं. (2) K reads स्मरतांतका, which is inc. (3) K reads संस्मरंतु सा, which is gram. inc. (4) B has भूतं च भवद्भविष्यं च, which mars the metre. K reads त्रैलोक्य, which is inc. (5) After the 35th śloka we have the following hemistich in B :—रसदीक्षां विधायैवं तस्मात् कर्म्म समाचरेत् । We have rejected it, because रसदीक्षाविधान is not yet explained. (6) K reads यद्भावि. (7) Cf. र. र. स. Chap. VI. ślokas 12—66. (8) K reads ऽभयपरो. (9) K reads माहेश्वरास्तत्र प्रच्छन्ने तं.

कारयेद्विजने स्थाने पशुयंत्र न विद्यते ।
सुगुप्ते सुषमे स्थाने सर्व्वबाधाविवर्ज्जिते ॥ ४० ॥
प्राकार[1]परिखोपेते कपाटार्गलरक्षिते ।
एकान्ते निर्म्मले हृद्ये नानापुष्पद्रुमान्विते ॥ ४१ ॥
हंसकारण्डवाकीर्णे चक्रवाकोपशोभिते ।
दिव्यौषधिगणोपेते सजले श्यामशाद्वले[2] ॥ ४२ ॥
कुमुदोत्पलकह्लार-कदलीषण्डमण्डिते ।
चित्रिते[3] भवनोद्याने कारयेत् परमेश्वरि ॥ ४३ ॥
तन्मध्ये देवदेवेशि मत्तवारणसंयुतम्[4] ।
वातायनसमोपेतमूर्द्ध्वनिर्गामिधूमकम्[5] ॥ ४४ ॥
रक्त[6]पताकासंयुक्तं सज्जोपकरणं तथा ।
प्रविभक्तौषधितुषा[7]काष्ठारण्योत्पलालयम्[8] ॥ ४५ ॥
समालिखितदिग्देवं[9] समर्च्चितविनायकम्[10] ।

(1) K reads प्रकार, which seems to be an error of the scribe. (2) K reads स्यात् ससाद्वले, wherein the first word (स्यात्) is redundant. (3) B reads विस्तृते. (4) यन्त्रोद्धारं तु कारयेत्, a variant in K, which seems to be unconnected. (5) K reads निष्क्राम instead of निर्गामि. (6) B reads रक्ता. K reads रक्ता, which is inc. (7) K reads प्रविभक्तौषधीरूपं, wherein रूपं has no meaning. (8) काष्टं वन्योत्पलालकं, a variant in K, wherein the word काष्टं is an error of the scribe. काष्ठारम्योपलायनं, a variant in M, wherein some of the terms are inc. (9) This śloka (46th) is wanting in B. K reads दिग्बन्धं, which has no clear meaning. (10) M reads विनाकम्, which is a palpable error of the scribe.

प्रतिष्ठितमुमेशाभ्यां[1] लोकपालैश्च रक्षितम् ॥ ४६ ॥
निर्म्मापयेदेकतलं द्वितलं वापि मण्डपम्[2] ।
अथ पक्षे सिते देवि चन्द्रताराबलान्विते[3] ॥ ४७ ॥
पुण्ये तिथौ मुहूर्त्ते च[4] लग्ने सौम्यग्रहेक्षिते ।
स्नातः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ॥ ४८ ॥
मधुसर्पिर्दधिक्षीरतिलैः संपूज्य बालिकाः[5] ।
कपिलागोमयालिप्ते हिरण्यकलसावृते ॥ ४९ ॥[6]
यवसिद्धार्थकास्तीर्णे[7] गन्धमाल्योपशोभिते ।
तत्रेष्टिकाभिः रचिते[8] करपीठे सुरेश्वरि[9] ॥ ५० ॥
शिलापट्टं समुत्कीर्य्य शिलापट्टार्गलं प्रिये ।
न्यासं रसाङ्कुशेनैव कृत्वाङ्गुलिहृदादिषु[10] ॥ ५१ ॥
रसलिङ्गं न्यसेत्तत्र हेम्ना च[11] सहितं प्रिये ।

---

(1) प्रतिष्ठितोमामहेशं, a variant in M, which breaks the metre. (2) B reads मंडलं. M reads मखटपम्, which is an error of the scribe. (3) चन्द्रतारावलि सति, a variant in B and K. We have adopted the reading in M. (4) पुण्यतीर्थे मुहूर्त्ते तु, a variant in K, which seems to be unconnected. (5) M reads पालकः. (6) The portion from स्नातः to कलसावृते is wanting in M. (7) B reads यत्र सिद्धार्थकास्तीर्थे ; M reads यवसिद्धावकास्तीर्णं ; both the readings seem to be erroneous. (8) तत्रेष्टकाभिरवचिते, a reading in B. तत्रेष्टकाभिः खचिते, a reading in M. (9) K reads कारयेत्तु. करपीठे सुरेश्वरीम्, a variant in M, which has no clear sense. (10) न्यासास्तेनैव कर्त्तव्याः स्वाङ्गुलीहृदयादिषु, a variant in K. कृताङ्गुलिमृतादिसु, a reading in M, which seems to be erroneous. (11) K reads पार्व्वती.

ॐ ह्रीं श्रीं[1] सूतराजस्य मूलमन्त्र उदाहृतः ॥ ५२ ॥
तस्मिन् रसाङ्कुशीं देवीं[2] मूलेनावाहयेत्प्रिये ।
चतुरस्रे तु दिक्पालान्[3] पूजयित्वा वहिः क्रमात् ॥ ५३ ॥
नन्दिनञ्च महाकालं भृङ्गिरीटं महाबलम्[4] ।
कुम्भकर्णञ्च सुग्रीवं भङ्गीकञ्च[5] दृढ़ायुधम्[6] ॥ ५४ ॥
द्वारे चतुर्द्दा विन्यस्य पूजयेद्दक्षवामयोः ।
शुक्रं पूर्व्वेऽभि[7]संपूज्य स्कन्दमाग्नेयगोचरे[8] ॥ ५५ ॥
दक्षिणस्यां ततो रुद्रं[9] पवनं नैर्ऋते तथा[10] ।
शिवं पश्चिमभागे तु पावकं वायवे न्यसेत् ।
उमामुत्तरभागे तु व्यापकं चेशगोचरे[11] ॥ ५६ ॥
लेपिका क्षेपिका चैव क्षारिका रञ्जिका तथा[12] ।
लोहटी बन्धकारी च भूचरी मृत्युनाशिनी[13] ॥ ५७ ॥
विभूतिः खेचरी[14] चैव दश दूत्यः क्रमेण च[15] ।

---

(1) श्रीं श्रां क्रीं, a variant in M. (2) B reads रसाङ्कुशां. M reads रसाङ्कुशं देवौ, which is grammatically inc. (3) चतुरः श्रेष्ठदिक्पालान्, a variant in M. (4) M reads मनोबलं. (5) B reads भङ्गकञ्च. M reads मृगाङ्कञ्च. (6) K reads सुधायुधम्, which has no clear sense. (7) B reads पूर्व्वेभ्रि. M reads शुकं पूर्व्वं हृ. (8) B reads माचरेत्. (9) K reads भद्रं. (10) K reads यजेत्. (11) B reads चेत् समाचरेत्. (12) B has क्रामिका रंक्षिका तथा. K has लिपिकां क्षेपिकां चैव रक्षकां रञ्जिकां तथा. (13) लोहटीं बन्धकारीं च भूतमृत्युविनाशिनीं, a variant in K. (14) विभूतीं खेचरीं, a variant in K. (15) दशदूत्यक्रमेण च, a reading in M, which is grammatically inc.

पूज्यास्त्वष्टदले[1] पद्मे ऊर्द्ध्वाधस्तु दलेषु च[2] ॥ ५८ ॥
माक्षिको विमलः[3] शैल[4]श्चपलो रसकस्तथा ।
सस्यको[5] गन्धतालौ च पूर्व्वादिक्रमयोगतः ॥ ५९ ॥
अष्टादशभुजा रुद्राः[6] पञ्चवक्त्रास्त्रियम्बकाः[7] ।
चन्द्रार्द्धशोभिमुकुटा[8] नीलग्रीवा वृषध्वजाः[9] ॥ ६० ॥
स्वस्ववर्णधराः[10] सर्व्वेऽप्यष्टविद्येश्वरास्तथा[11] ।
पूजनीया महेशानि द्वितीयेऽष्टदलाम्बुजे[12] ॥ ६१ ॥
कर्णिकायान्तु पूर्व्वादिपूर्व्वं[13] शक्तिचतुष्टयम् ।
मालिनी हेमशक्तिश्च परा शक्तिर्बला स्मृता[14] ।
अपरा वज्रशक्तिश्च कान्तिर्ज्ञेयं परापरम्[15] ॥ ६२ ॥

(1) पूज्या चाष्टदले is the reading in K, which is a palpable error. (2) पूर्व्वादिषु दलेषु च, a variant in B. ऊर्द्ध चाधःस्थलेषु च, a variant in M. (3) K reads माक्षिकां विमलां. (4) M reads चैलः, which seems to be erroneous. (5) सस्यचा is the reading in K, and सस्यके is that in M. Both are incorrect. (6) K reads भद्रा (without विसर्ग). (7) पञ्चवक्त्रा त्रियम्बिका (without विसर्ग), a variant in K. (8) M reads मकुटा. (9) K reads वृषध्वजा (without विसर्ग). (10) The portion from the 61st to the first hemistich of the 94th is wanting in B. स्वस्व-कर्णवराः, a variant in K, which is absurd. (11) विघ्नेश्वरास्तु ते, a variant in K. विद्येश्वरस्तथा, a reading in M, which is inc. (12) M reads महेशाना द्वितीयाष्टदलाम्बुजे. (13) पूर्व्वाद्यै पूर्व्वाः is the reading in M, which seems to be incorrect. (14) K reads स्मृते, which is incorrect. This charana and the next are wanting in M. (15) कान्ते ज्ञेयं परापरम्, a variant in K.

मध्ये तासाञ्च शक्तीनां सर्व्वज्ञं रसभैरवम् ।
शुद्धस्फटिकसंकाशं पञ्चवक्त्रं त्रियम्बकम्[1] ॥ ६३ ॥
ज्वलत्पिङ्गोग्रनेत्रञ्च[2] ज्वलज्जिह्वाननं तथा ।
ज्वलद्भ्रुवं[3] ज्वलत्केशं दुःप्रेक्ष्यं[4] प्रेतविष्टरम् ॥ ६४ ॥
जटामुकुटसंयुक्तं चन्द्रार्द्धकृतशेखरम्[5] ।
व्याघ्रचर्म्मधरं नागोपवीतं वृषभध्वजम्[6] ॥ ६५ ॥
अष्टादशभुजं देवमीषत्प्रहसिताननम् ।
द्वात्रिंशार्णेन मनुना पूजयेत् सकलं शिवम् ॥ ६६ ॥
रसेश्वरस्य मन्त्रञ्च कथ्यमानं निबोध मे[7] ॥ ६७ ॥
ॐ ह्रीं क्रीं[8] रसेश्वराय महाकालाय महाबलायाघोर-
भैरवाय[9] वज्रवीर[10] क्रोधकङ्काल ज्लौः ज्लुः[11] ॥ ६८ ॥
तस्योत्सङ्गे महादेवीं रत्नाभरणभूषणाम्[12] ।

(1) M reads त्र्यम्बकम्, which is the correct form of त्रियम्बकम्. (2) K reads ज्वलत्पिङ्गाग्रनेत्रञ्च. (3) M reads ज्वलद्रूपं. (4) M reads दुष्प्रेक्ष्यं, which is an alternative form of दुःप्रेक्ष्यं. (5) M reads चन्द्रार्द्धीकृतशेखरम्. (6) M reads नाग उपवीतं वृषध्वजम्, wherein the former is grammatically incorrect. (7) In lieu of this hemistich M has only रसेश्वरमन्त्रम्, which ought to be रसेश्वरमन्त्रः. (8) M reads ॐ ह्रीम् प्रेम् प्रम्. (9) M reads भैरव. (10) वज्रघोर is the reading in M. The correct form would be वज्रवीराय and क्रोधकङ्कालाय. (11) M reads ज्लौ ज्लः । After this, is added इति मनुः. This मन्त्र contains 32 letters (द्वात्रिंशार्णेन), the last two (ज्लौः ज्लुः) being excepted. (12) रत्नाभरणभूषिताम्, a variant in K.

उत्तप्तहेमरुचिरां पीतवस्त्रां त्रिलोचनाम् ॥ ६९ ॥
श्वेतचामरयोर्मध्ये मुक्ताच्छत्रेण शोभिताम्[1] ।
अङ्कुशं चाक्षमालां च दधतीं दक्षहस्तयोः ॥ ७० ॥
पाशाभये च वामाभ्यां[2] चन्द्रार्द्धकृतशेखराम् ।
रसाङ्कुशीं[3] महादेवीं नीलग्रीवां कृपामयीम् ॥ ७१ ॥
पूजयेद्रससिद्ध्यर्थं विद्यया पञ्चबीजया ।
वाग्भवं भुवनेशीञ्च[4] श्रीबीजञ्च सुरेश्वरि ॥ ७२ ॥
मादनं[5] शक्तिबीजञ्च—विद्या[6] परमदुर्लभा ।
धूपदीपैस्तु नैवेद्यैः[7] पुष्पताम्बूलचन्दनैः ॥ ७३ ॥
शान्तिपाठस्य निर्घोषैः[8] स्तोत्रमङ्गलनिस्वनैः[9] ।
घण्टाटङ्कारसंयुक्तैः पूजां कृत्वा यथाविधि ॥ ७४ ॥
अघोरेण बलिं दद्यात् सर्व्वविघ्नोपशान्तये[10] ।

(1) K reads मुक्ताच्छन्नोपशोभितां, which is a palpable error of the scribe. (2) वरदाभयहस्ताढ्यां, a variant in K. पाशभयौ च वामाभ्यां, a variant in M, wherein the first term is grammatically incorrect. (3) रसाङ्कुशां, a reading in M. (4) K reads भुवनेशानीं. भुवनेशिञ्च, a variant in M, which ought to be भुवनेशीञ्च. (5) K reads मदनं. (6) K reads विद्यया, which is incorrect. This charaṇa "विद्या परमदुर्लभा" is the remark made by S'iva to draw special attention of his consort. This विद्या is to be communicated by the गुरु to his शिष्य (see śloka 82). (7) धूपदीपैः सुनैवेद्यैः, a variant in K. (8) K reads शान्तिपाठैश्च निर्घोषैः. M reads शास्त्रपाठस्य निर्घोषैः. We have adopted the above reading after collating all the texts. (9) K reads निःस्वनैः. (10) K reads सर्व्वविघ्नस्य शान्तये ।

भूतेभ्यो यक्षरक्षोभ्यो[1] पिशाचेभ्यश्च यत्नतः ॥ ७५ ॥
अघोरमन्त्रसंयुक्त[2]मोङ्कारादिनमोऽन्तकम् ।
सर्व्वकर्म्माकरं[3] देवि विघ्नोपद्रवनाशनम्[4] ॥ ७६ ॥
यथाशक्ति जपित्वा तु विद्यामेव रसाङ्कुशीम् ।[5]
कुण्डं विधाय देवेशि योनिचक्रं[6] समेखलम् ॥ ७७ ॥
तत्राज्यतिलसंयुक्तं होमं कृत्वा क्रमेण तु ।
कलशं स्थापयेद्देवि पयःपूर्णं फलान्वितम्[7] ॥ ७८ ॥
पञ्चरत्नसमोपेतं वासोभिः परिवेष्टितम् ।
तत्राष्टादश[8]विद्याभिरभिमन्त्र्य पृथक् पृथक् ॥ ७९ ॥
गन्धपुष्पादिभिः पूर्णं[9] पल्लवैरुपशोभितम् ।
अर्घ्यपात्रञ्च[10] संपूज्य वर्द्धन्याभ्युक्ष्य साधकम्[11] ॥ ८० ॥
शतमष्टोत्तरं चैवमर्घ्यपात्रोदकेन[12] तु ।

(1) Both K and M read यक्षरक्षेभ्यः, which is grammatically incorrect, the term being रक्षस् and not रक्ष. (2) M reads संयुक्तां, which is incorrect. (3) सर्व्वकर्णाकरं, a variant in M, which is meaningless. (4) K reads विघ्नोपद्रनाशनम्, which is palpably an error of the scribe. M adds here after the 76th śloka अघोरेभ्योऽथ घोर इति मन्त्रं नमोऽन्तकम्, which we have rejected as it is redundant. (5) K reads विद्योपविद्या विद्या तु, which has no clear sense. (6) योनिवक्त्रं, a variant in K. (7) पयःपूर्णफलान्वितम्, a reading in M. (8) K reads तत्राष्टशत. (9) M reads कीर्णं. (10) K reads बलिपात्रञ्च. (11) Both K and M read वर्द्धन्याभ्युक्ष, which is incorrect. M reads साधकः, which is grammatically untenable. (12) चैव मन्त्रपादोदकेन, a variant in K.

अभिषिच्य[1] विधानेन कुम्भतोयेन मन्त्रवित् ॥ ८१ ॥
विद्यामुपदिशेद्देवि पाठयेद्रससाधकम्[2] ।
कुमारीयोगिनीयोगि[3]साधकांश्च यथोचितैः[4] ॥ ८२ ॥
तर्पयेदन्नपानैश्च[5] जागरं तत्र कारयेत् ।
एवंविहितदीक्षस्तु[6] साधकः सुरनायिके ॥ ८३ ॥
महाभूतमयीं तत्त्व[7] वर्णपञ्चकसंयुताम्[8] ।
पञ्चबीजात्मिकां[9] विद्यां प्राणायामात्मसूत्रके[10] ॥ ८४ ॥
मुद्रां रसाङ्कुशीं बध्वा लक्षमेकं जपेत्प्रिये ।
तस्य सिध्यति देवेशि निर्विघ्नं रसभैरवः ॥ ८५ ॥
प्रणवादिनमोऽन्तस्तु तर्पणान्ते जपः परः[11] ।
अहिंसा चन्दनं[12] सत्यं पुष्पमस्तेयधूपनम्[13] ॥ ८६ ॥
ब्रह्मचर्य्यं महादीपमप्रतिग्रहघण्टिकाम्[14] ।

---

(1) K reads अभिषिंच, which is incorrect. (2) K reads शाधकं, which is incorrect. M reads शासनं, which conveys a different idea. (3) K reads योगी, which is erroneous. (4) M reads साधकाय यथोचितं, wherein the first term is incorrect. (5) दानपानैश्च, a variant in M. (6) K reads दीक्षा तु, which is erroneous. (7) M reads तन्त्रं, which means dependent. (8) वर्णान्तं तां महात्मिकां, a variant in M. (9) पञ्चविद्यात्मिकां, a reading in K, which is absurd. (10) K reads प्राणायामान्तसूतके. M reads प्राणापानात्मसूचके. We have adopted the above reading after collating all the texts. (11) K reads परम्. प्रणवादिनमोन्तं स्यादर्चनान्ते जपः परः, a variant in M. (12) K reads वन्दनं. (13) M reads धूपकम्. (14) M reads कर्णिकाम्.

पायसान्नं[1] महेशानि सर्व्वभूतदयात्मकम्[2] ॥ ८७ ॥
संगृह्याराधयेद्देवीं[3] स भवेत्सिद्धिभाजनम्[4] ।
सहस्रं वा शतं वापि त्रिसन्ध्यं संजपेदिमाम्[5] ॥ ८८ ॥
अस्या आज्ञा[6]प्रसादेन जायते खेचरो रसः ।
दिव्यौषध्यश्च तस्यैव सिध्यन्ति सुरवन्दिते ॥ ८९ ॥
अनङ्कुशं समारुह्य वने मत्तगजं यथा ।
तथाऽरसाङ्कुशाभिज्ञो[7] रसेन्द्रं प्राप्य सीदति[8] ॥ ९० ॥
विद्यया[9] सह मन्तव्यं गुरोः[10] सत्सम्प्रदायिनः ।
रसप्रयोगजातन्तु[11] सर्व्वतः सिद्धिमिच्छता ॥ ९१ ॥
अथ प्रश्नावताराय[12] पूर्व्वोक्तं रसभैरवम् ।
समाहितमना ध्यायेत् तदालीनं[13] समाचरेत् ॥ ९२ ॥

---

(1) K reads पायसान्नि, which seems to be incorrect. (2) सर्व्वभूतमयात्मकम्, a reading in M. (3) M reads देवि, which makes the sentence incomplete. (4) सम्भवेत् is the reading in M. सिद्धिभाजनः is the reading in K. (5) त्रिसन्ध्या सञ्जपेदिमाम्, a variant in M, wherein the first term is incorrect. (6) अस्याज्ञया is the reading in K, which is not correct. (7) रसाङ्कुशायुक्तं, a variant in K. In this reading no nominative to सीदति is to be found. (8) K reads सिध्यसि, which is absurd. (9) K reads सद्यया, which is senseless. (10) K reads गुरो (without विसर्ग), which is erroneous. (11) M reads रसप्रयोगजातस्तु, which is incorrect. [जात is neuter.] (12) -श्नावतराय is the reading in M, which is an evident error of the scribe. (13) M reads नानालीनं.

अनाहते[1] ब्रह्मरन्ध्रे मनः कृत्वा निरामये ।
करन्यासं पुरा[2] कृत्वा अङ्गन्यासमनन्तरम्[3] ।
यथाशक्ति जपेन्मन्त्रं रसेन्द्रस्य समाहितः ॥ ९३ ॥
चतुष्कोणं पुनः[4] कृत्वा मध्ये षट्कोणमण्डलम्[5] ।
हस्तमात्रं द्विहस्तं वा तण्डुलैर्विमलैर्लिखेत् ॥ ९४ ॥
सुगन्धैर्लेपिते स्थाने[6] पूजयेच्चन्दनादिभिः ॥ ९५ ॥
कर्णिकायां[7] न्यसेद्देवि[8] पूर्व्वोक्तं रसभैरवम् ।
षट्कोणे[9] देवताषट्कं महाकालादि विन्यसेत् ॥ ९६ ॥
महाकालं महाबल[10]मघोरं वज्रवीरकम्[11] ।
न्यसेत् क्रोधञ्च कङ्कालं मालामन्त्रैः समर्च्चयेत् ॥ ९७ ॥

ॐ क्रीं क्रौं च्लूँ च्लूं क्रीं क्रीं क्रीं क्रूः हुं फट्—रसेश्वराय महाकालभैरवाय रौद्ररूपाय कृष्णपिङ्गललोचनाय । अवतर २ अवतारय २ जल्प २ जल्पय २ शुभाशुभं कथय २ कथापय २ महारक्षां कुरु २ रससिद्धिं देहि ॥ इति मालामन्त्राः ॥[12]

(1) अनाहतौ, a variant in M, which is incorrect. (2) M reads पुनः. (3) The portion commencing from this charaṇa and ending in the third charaṇa of the 94th śloka is not found in K. (4) B reads पुरा. (5) K and M read मण्डले (6) B reads सुगन्धिलेपितस्थाने. (7) M reads कर्णिकाया, which seems to be an error of the scribe. (8) न्यसेद्देवं, a reading in K. (9) M reads षट्कोण, which is inc. (10) B and K read महाबल ; this reading we have adopted, though it makes a defective metre ; because we see the same word occurring afterwards. M reads महाबाल. (11) वज्रवीजकम् is the variant in M. (12) B reads ॐ क्रीं क्रें खें ख्य क्रीं क्रीं क्रीं ह्रूं फट् । रसेश्वराय महाकालभैरवाय रौद्ररूपाय कृष्णपिङ्गललोचनाय । कथापय महारक्षां कुरु कुरु कथापय कुरु रससिद्धिं देहि । M reads ओम् ह्रोम् प्रेम् च्लौम् च्ल: क्रौम् क्रौम् क्रौ ह्र हुम् फट् । रसेश्वराय महाकालभैरवाय क्रोधरूपाय कृष्णपिङ्गलोचनाय । अवतर अवतर । अवतारय अवतारय । जल्प जल्प । जल्पय जल्पय । शुभाशुभं कथय कथय । कथापय कथापय । महारक्षां कुरु कुरु । कथापय कथापय । मम रससिद्धिं देहि । We have adopted the fore-mentioned reading after collating the texts.

ॐ महाकालभैरवाय हृदयाय नमः । ॐ महाबलभैरवाय शिरसे स्वाहा । ॐ अघोरभैरवाय शिखायै वौषट् । ॐ वज्रवीरभैरवाय कवचाय हुम् । ॐ क्रोधभैरवाय नेत्राय वौषट् । ॐ कङ्कालभैरवाय अस्त्राय फट् । सर्व्वत्र स्वाहान्तम् । एवमङ्गन्यासाः ।[1] एवमङ्गुलीन्यासान् कुर्य्यादादौ । एते षडङ्गे पूजने च मूलमन्त्राः ॥

एवं न्यासाक्षरैः कूटैः[2] गन्धपुष्पैः समर्च्चयेत्[3] ।
पूर्णकुम्भं[4] न्यसेन्मध्ये शरावं तण्डुलैः सह ॥ ९८ ॥
तस्योपरि घृतदीपं[5] वर्त्तीं मन्त्रैश्च[6] मन्त्रयेत् ॥ ९९ ॥
समानीय कुमारीं तु कुमारं वा सुशोभनम् ।[7]

(1) ओं महाकालभैरवाय is wanting in B. K reads ओं महाकालभैरवाय ठः ठः स्वाहा अस्त्राय फट् । The portion beginning from हृदयाय नमः and ending in एवमङ्गन्यासाः is wanting in K. (2) K reads एव न्यासान् करैः कृत्वा. (3) B reads गन्धपुष्पैश्च पूजयेत्. गन्धैः पुष्पैश्च पूजयेत्, a variant in M. (4) पूर्व्वकं is the reading in K, which is palpably an error of the scribe. (5) B reads घृतं दिव्यं. M reads स्थिरं दीपं. (6) B reads वर्त्तिमन्त्रैश्च. M reads तत्तन्मन्त्रैश्च. (7) समानीय कुमारीं कुमारं वासुशोभनम्, a variant in B. समानीय कुमारस्तु कुमारीं वा सुशोभनम्, a variant in M, which is inc.

एकद्वित्रिचतुःपञ्च[1] यथालाभं समानयेत् ।
गन्धपुष्पैर्धूपदीपैः नैवेद्येन च पूजयेत् ॥ १०० ॥
एकैकस्यां[2] न्यसेन्मन्त्रं हृदयाद्याश्च[3] देवताः ॥ १०१ ॥
ततो निरीक्ष्य[4] तद्दीपं[5] सर्व्वास्तत्र[6] कुमारिकाः[7] ।
पश्यन्ति देवता दीपे कुमाराश्च[8] शुभाशुभम् ।
सिद्धिं वा[9]प्यथवासिद्धिं कथयन्ति कुमारिकाः[10] ॥ १०२ ॥
प्रश्नावतारं ज्ञात्वेति[11] रसकर्म्मणि सञ्चरेत्[12] ॥ १०३ ॥
यः पुरा देवदेवेशि रसेन्द्रे[13] भावितात्मवान् ।
सप्तजन्म[14] मृतो जातो न त्यजेद्रसभावनम्[15] ॥ १०४ ॥
एवं शुभाशुभं ज्ञात्वा देवतानुग्रहान्वितः ।

---

(1) एकद्वित्रिचतुपञ्च is the reading in K, which is not correct. (2) B reads एकैकं स्यात्. M reads एकैकस्य. (3) हृदयादीश्च is the reading in M. They are mentioned in p. 27. (4) M reads निमील्य. B and K read निरीक्ष, which seems to be inc. (5) B reads तं दीपं. K reads ते दीपं, which is grammatically untenable. (6) B reads सर्व्वे ते च. K reads सर्व्वा तत्र, which is a palpable mistake. (7) B and M read कुमारकाः. (8) ते कुमाराः is the reading in B and M. (9) B and M read चा. (10) B and M read कुमारकाः. (11) प्रतावतारान् ज्ञात्वैव is the reading in M, which seems to be incorrect. (12) B reads सर्व्वकर्म्माणि. M reads रसकर्म्मणि सञ्चरन्, which is incorrect. (13) या पुराद्देवदेवेशि रसेन्द्रं is the reading in M, which is incorrect. (14) B and M read वारं. (15) B reads रसभावनां. रसभाविनम् is the variant in M, which has no sense here.

मण्डपे पूर्व्ववद्देवी[1]मर्च्चयित्वा रसाङ्कुशीम्[2] ॥ १०५ ॥
आचार्य्यमपि संपूज्य धूपस्रक्चन्दनादिभिः ।
अघोरेण बलिं दत्त्वा ततः कर्म्म समाचरेत् ॥ १०६ ॥
ओषध्यो मण्डपे[3] प्राच्यां रसस्वेदोऽग्निगोचरे[4] ।
दक्षिणस्यां लोहमारो नैर्ऋत्यां पेषणादिकम्[5] ॥ १०७ ॥
द्रुतिक्रिया तु[6] वारुण्यां वायव्ये धमनं प्रिये ।
वर्णोत्कर्षस्तु[7] कौवेर्य्याम् ऐशान्यां रसवेधनम्[8] ॥ १०८ ॥
आसनन्तु गुरोर्मध्ये[9] निवेश्य[10] सुरनायिके ।
नियामनादिकं कर्म्म क्रामणान्तं[11] वरानने ।
रसाङ्कुशेन मन्त्रेण कर्त्तव्यं साधकेन तु ॥ १०९ ॥

---

(1) B and K read देवि, which is incorrect. (2) B reads रसाङ्कुशा. M reads रसाङ्कुशम्. Both are grammatically erroneous. (3) ओषधी मन्त्रवित्, a variant in K, wherein मन्त्रवित् has no final verb to govern. (4) B reads रसं स्वेदोऽग्निगोचरे. K reads रसे स्वेदोग्नीगोचरे. (5) K reads पेषिणं दकं, wherein पेषिणं is incorrect. The correct form is पेषणं. [दकं = water.] (6) B reads द्रुतिक्रिया तु, which ought to be spelt द्रुतिक्रिया तु. K reads कर्त्तौ कुर्पीति. M reads धृतिक्रिया तु. (7) वर्णोत्कर्षणं, a reading in K. (8) ईशान्यां रसबन्धनम्, a variant in B and M. Cf. रसरत्नसमुच्चय, Chap. VII., ślokas 3—5. (9) आसनन्तु गुरुर्मध्ये, a reading in K, which is incorrect. (10) K reads निवेद्य, which is not accurate here. (11) कर्म्मणान्तं, a reading in M, which seems to be incorrect. But K has a different reading in the 5th. Paṭala, śloka 1, नियामिकादिकं कर्म्म क्रमणान्तं.

यः पुरा देवदेवेशि वर्णितो[1] रसभैरवः ।
सद्योजातं तस्य जानु[2] वामदेवन्तु गुह्यकम्[3] ॥ ११० ॥
अघोरं हृदयं[4] तस्य वक्त्रं तत्पुरुषं स्मृतम्[5] ।
यावद्[6]भ्रूमध्यमीशानमर्द्धचन्द्रं ललाटकम्[7] ॥ १११ ॥
बिन्दुर्देवेशि तस्योर्द्धं बिन्दोरूर्द्ध्वं स्थितो नदः[8] ।
ललाटशिरसोर्मध्ये[9] शक्तिस्तत्रैव संस्थिता ॥ ११२ ॥
व्यापिनो[10] ब्रह्मरन्ध्रस्था[11] तस्योर्द्ध्वं तून्मना[12] भवेत् ।
उन्मना उन्मनोभावम्[13] उन्मनापदमव्ययम् ॥ ११३ ॥

---

(1) M reads वर्णत:, which is incorrect. (2) K reads जानी. सद्योजातस्तथा जातु, a variant in M, wherein जातु is an error of the scribe. (3) K reads गुह्यके. वामदेवैस्तु गुह्यकम्, a reading in M, wherein the first term is erroneous. (4) K and M read अघोरहृदयं, which is not correct. (5) B reads तत्पुरुषः स्मृतः. K reads वत्पुरुषः स्मृतम्. (6) B and M read भवेद, which is not appropriate. (7) K reads ललाटके. M reads अर्द्धचन्द्रललाटकम्. The final verb ध्यायेत्, stated in the śloka 116, is to be understood here (in the ślokas 110-111) by मण्डूकप्लुति connection. (8) The 112th śloka is not found in B, except the initial and final words, i. e. बिन्दुर्देव and संस्थिता. बिन्दोरूर्द्धस्थितो नटः, a variant in M, which is incorrect. [Here the correct word is नाद as is stated in the कुब्जिकातन्त्र, Paṭala I. "आसीद्बिन्दुस्ततो नादो नादाच्छक्तिः समुद्भवा।" (9) ललाटे शिरसो मध्ये, a reading in M. (10) K reads व्यापिनि. M reads व्यापिनीं. Both are incorrect. (11) M reads ब्रह्मरन्ध्रस्थां. (12) B and K read समना. (13) B and M read उन्मनादुन्मनोभावम्. [उन्मनाः = उन्मनापद.]

तस्योर्द्ध्वं परमं सत्यं[1] व्योमस्थायि परात्परम्[2] ।
शून्यं शून्यं पुनः[3] शून्यं त्रिशून्यञ्च[4] निरामयम् ॥ ११४ ॥
नभश्च गगनं व्योम खमाकाशं[5] च केवलम् ।
निष्कलं निर्म्मलं नित्यं निस्तरङ्गं निरामयम् ॥ ११५ ॥
निष्प्रपञ्चं[6] निराधारं निर्गुणं गुणगोचरम्[7] ।
एवंरूपं सदा ध्यायेत् स्वदेहे रसभैरवम् ॥ ११६ ॥
यदा च निश्चलं[8] ध्यायेत् यदा च निश्चलं[9] मनः ।
वह्निमध्ये तदा[10] सूतो बध्यते निश्चलस्तथा[11] ॥ ११७ ॥
यदा च[12] चलति ध्यानं रसो वह्नौ न तिष्ठति ॥ ११८ ॥
मण्डलस्य वहिः[13] रात्रौ सुरामत्स्यामिषादिभिः ।
अर्च्चयेद्[14]यक्षगन्धर्व्वान् पिशाचान् राक्षसांस्तथा ॥ ११९ ॥

---

(1) B reads तस्योर्द्ध्वं. K reads तु पदं शून्यं. M reads तु परं सत्यं. (2) B has व्योमव्यापि परापरं. व्योमव्यापीश्च तत्परम्, a variant in M, which is erroneous. (3) K reads परं. (4) B reads त्रिशून्यश्च. (5) खप्रकारं, a variant in K. [This repetition expresses the intensity of essence of God, who is compared with nothing but the sky.] (6) K reads निःप्रसङ्गं. (7) नागमन्तुणगोचरम्, a variant in M, which has no clear meaning. (8) K reads त्वनिश्चलं, which is inc. (9) B reads न चलं. K reads तदा च. M reads यदा वै. (10) B reads तथा. (11) M reads तदा, thus creating a tautology. (12) B and K read यथा च. M reads यदा स. (13) K reads मंडलं स. M reads मण्डपं कारयेत्. (14) The portion beginning from अर्च्चयेद and ending in वटुकेश्वरम् is wanting in M.

क्रियाकरणविघ्नाश्च फलविघ्नाश्च[1] कोटिश: ।
सम्भवन्ति तथा तत्तच्छान्त्यै च[2] वटुकेश्वरम् ।
अर्घानु[3]ग्रहषट्कञ्च संपूज्यादौ समाचरेत् ॥ १२० ॥
कर्म्मान्ते च पुनर्बाल[4]मष्टाष्टकमनुग्रहम् ।
संपूज्य विनियुञ्ज्यात्तत्[5] सिद्धद्रव्यन्तु सिद्धिदम् ॥ १२१ ॥
सिद्धस्तु नाशयेद्वादं[6] तद्देशं[7] तु परित्यजेत् ।
भ्रमेन्माधुकरीं[8] भिक्षां सुसिद्धे तु[9] महारसे ॥ १२२ ॥
प्रमादादुत्थितो विघ्नो[10] रसबन्धे क्षते सति ।
रसशान्तिर्विधातव्या रसक्षोभं न कारयेत् ॥ १२३ ॥
रसं न दर्शयेद्देवि नारीहस्ते[11] न पातयेत् ।
नार्य्यै[12] गुह्यं न वक्तव्यं द्रव्यं ताभ्यो हि[13] गोपयेत् ॥१२४॥
परद्रव्ये[14]न कर्त्तव्यं परदारा[15]न्न संस्पृशेत् ।
परान्नं नैव भुञ्जीत परांश्चैव न विश्वसेत् ॥ १२५ ॥[16]

(1) K has विघ्नं तु कुलविघ्नादि. (2) K reads तत्र शांत्येव, which is senseless and incorrect. (3) K reads यथाता. M reads अर्घानु. (4) K reads सर्मान्ते च पुनर्बाल. M reads बाला. Both are incorrect. (5) K reads विधिवद्देवि. (6) द्वारं is the reading in M. (7) K reads तं देशं. (8) B reads मधुकरीं. The portion commencing from भ्रमेन्मधुकरीं to the end of the 123d. śloka is wanting in M. (9) B reads सुस्निग्धे च. (10) B has प्रमादादुत्थिते मौशे. (11) नारीं हस्ते is the reading in M. (12) B and M read नार्य्या. (13) The term द्रव्यं is wanting in B. B and M read तासाञ्च. (14) M reads परद्रव्यं. (15) M reads परदारं, which is grammatically incorrect. (16) The hemistich परान्नं नैव &c. is not found in K.

न देयं दुष्टबुद्धीनां गोष्ठीरूपेण याचके ॥ १२६ ॥[1]
अष्टम्यां पौर्णमास्यां च[2] अमावास्यां[3] युगादिषु ।
अयने विषुवे[4] चैव चतुर्दश्यां विशेषत: ।
रसोत्सवं प्रकुर्व्वीत यथावित्तानुसारत: ॥ १२७ ॥[5]
एवं रसोत्सवं देवि य: कुर्य्याद्भक्तिसंयुत: ।
ब्रह्महत्यादिपापानि नश्यन्ति विविधानि च ॥ १२८ ॥
अनेन विधिना यत्र पूजां कुर्व्वन्ति साधका:[6] ।
न तत्र रोगदौर्गत्यं नेतय:[7] प्रभवन्ति च ॥ १२९ ॥
एवंविधां[8] रसे पूजां प्रतिष्ठाप्य यथाविधि ।
पश्चात्कर्म्म विधातव्यमात्मन: शुभमिच्छता[9] ॥ १३० ॥
अन्यथा[10] कुरुते यस्तु तस्य सिद्धिर्न जायते ।
अपाय:[11] पापशंका च बुद्धिभङ्गो हि जायते ॥ १३१ ॥

(1) K reads गोष्ठीभूय न पाचयेत्. This hemistich is wanting in M. (2) K reads पूर्णमायां च, which seems to be an error of the scribe. M reads पूर्णिमायां वा. (3) अमावस्यां वा युगादिषु, a variant in K, which destroys the metre. (4) M reads विषुवै, which is incorrect. (5) After this śloka, there is a hemistich in M, which runs thus :— नश्यन्ति पापसङ्घानि महासिद्धि: प्रजायते ॥ Also the following two ślokas (128 and 129) are not found in M. (6) K has यस्तु पूर्व्वं कुर्वीत साधक:, wherein पूर्व्वं is incorrect. (7) K reads रोगा जायन्ते न पुन:. (8) K reads एवंविधे. (9) सिद्धिमिच्छता, a variant in M. (10) M reads अन्यथा. (11) The portion beginning from अपाय: and ending in प्रिये (ślokas 131—132) is wanting in M.

अवज्ञा रोगजातश्च[1] सन्देहश्च[2] पदे पदे ।
आलस्याद्गुरुलोभाच्च[3] परस्य कथनेन च[4] ।
उत्पन्नमपि विज्ञानं हरन्ति कुलकाः प्रिये ॥ १२२ ॥
दीक्षितो रसकर्म्माणि मन्त्रन्यासविदाचरेत् ।[5]
तत्समाचक्ष्व देवेशि किमन्यच्छ्रोतुमिच्छसि ॥ १२३ ॥[6]

इति श्रीपार्व्वतीपरमेश्वरसंवादे[7]
रसार्णवे रससंहितायां[8]
दीक्षाविधानो नाम[9]
द्वितीयः पटलः ॥२॥

---

(1) B and K read रोगजातस्य, which seems to be incorrect. (2) K reads स्वदेहस्य. (3) K reads लोपश्च. (4) B has परस्य कथनेन वा. (5) मंत्रे न्यासं विचारयेत्, a variant in K. दीक्षिते रसकर्म्माणि मन्त्रात्मापि समाचरेत्, a variant in M. (6) This hemistich is not found in M. (7) (8) (9) These portions are not found in M. K reads दीक्षाविधानं नाम.

—

तृतीयः पटलः ।

श्रीदेव्युवाच ।[1]

भगवन् देवदेवेश लोकनाथ जगत्पते ।
मन्त्रन्यासं समाचक्ष्व रसकर्म्मोपकारकम् ॥ १ ॥

श्रीभैरव उवाच ।[2]

पुनरन्यं[3] प्रवक्ष्यामि मन्त्रमूर्त्तिं रसाङ्कुशोम्[4] ।
पञ्चमं तु गृहं देवि दुर्ल्लभं देवदानवैः ॥ २ ॥
चत्वारः प्रधानगृहाः हंसगृहं[5] तु पञ्चमम् ।
यत्र सिद्धिमकारादिः[6] तिष्ठते[7] पञ्चमे गृहे[8] ॥ ३ ॥
लिङ्गाश्रयं यथा रूपं[9] लिङ्गिमाया[10] तु लिङ्गिनी ।
गगनेन[11] तु सा ज्ञेया भगरेखा[12] तु पञ्चमी ॥ ४ ॥

---

(1) M reads देवी. (2) This as well as the above-mentioned śloka are not found in M. (3) K reads पुनरन्यत्, which is grammatically untenable. (4) M reads रसाङ्कुशम्. (5) B reads चत्वारः प्रयानहं गृहा. M reads प्रधानग्रहाः अङ्गं सह. Both have no clear sense. (6) K reads सिद्धिरकारादि. M reads सिद्धिर्मकारादि. (7) K reads तिष्ठति. (8) ग्रहे is the reading in M. (9) K reads लिङ्गो श्रयं, which is evidently an error of the scribe. M reads लिङ्गाश्रयं. We have adopted the above text after collating all the readings. The portion commencing from यथा रूपं and ending in the 20th śloka is not found in B. (10) लिङ्गमाया, a variant in M, which is properly लिङ्गिमाया. (11) M reads गगने. (12) भागश्रेषा, a variant in K.

प्रणवं पूर्व्वमुच्चार्य्य बीजं शब्दमनुत्तरम्[1] ।
ह्रींकारञ्चैव[2] क्रींकारं हंसबुद्धि[3]मनन्तरम् ॥ ५ ॥
कालपाशं महामन्त्रं गृह्णीयात्साधकेश्वरः[4] ।
महारम्भे तु तन्मन्त्रं प्रतीहारं रसाङ्कुशोम्[5] ॥ ६ ॥
लक्षमेकं जपेत्तस्य महासिद्धिः प्रवर्त्तते ।[6]
बालवत्सपुरीषं तु[7] ततः केनैव ग्राहयेत्[8] ॥ ७ ॥
चिताग्नि[9]भस्म तेनैव ग्राहयेत् परमेश्वरि ।
चैवं तदुत्तमं स्थानं रसेन्द्रस्तत्र तिष्ठति ॥ ८ ॥
मार्जन्या मार्जयेत्स्थानं कुब्जिकाख्या तु खेचरी[10] ।
द्वात्रिंशदक्षरा[11] देवि पञ्चनादेषु संस्थिता ॥ ९ ॥
ततः सिद्धाश्च चत्वारः पुरुषाष्टादश[12] स्मृताः ।
अर्थ[13]पञ्चकसंयुक्ता ध्यानं स्यात्[14] पञ्चकं पुनः ॥ १० ॥
योगिनीषट्कसंयुक्तं[15] सप्तविंशत्क्रमान्वितम्[16] ।

---

(1) शिवशब्दमनन्तरम्, a variant in K. (2) ह्रींकारः चैव, a variant in K, which is incorrect, as it is connected with उच्चार्य्य. (3) K reads हंसशब्द. (4) This charaṇa and the next are wanting in K. (5) K reads प्रतिहारं रसाङ्कुशं, which is incorrect. (6) This hemistich is wanting in M. (7) K reads चौष in lieu of बाल. M reads बालवत्सपुरं विषु. (8) K reads पुनस्तेनैव क्रामयेत्, which has no clear sense. M reads गृह्णयेत्, which is incorrect. (9) K reads चितास्थि. (10) कुब्जिकाख्यां तु खेचरीं, a reading in M. (11) M reads द्वात्रिंशदक्षरी. (Vide Paṭala II, verse 68.) (12) K reads पुरुषाष्टदिशः. (13) M reads अष्ट. (14) K reads ध्यानाख्या. (15) योगिनीषट्कसंयुक्ताः, a variant in K. (16) K reads सप्तविंशत्क्रमान्विताः.

एकाशीतिपदैर्युक्तं पञ्चावरणसंयुतम् ॥ ११ ॥
अनेन क्रमयोगेन मार्जनीं परिपूजयेत्[1] ।
अनेन मार्जयेत् चैवं रसेन्द्रो यत्र तिष्ठति ॥ १२ ॥
उपलेपन्तु तत्रैव चण्डघण्टान्तु कारयेत् ।
पूर्व्वे गृहे[2] तु सा देवी चण्डघण्टा व्यवस्थिता ॥ १३ ॥
चण्डभैरविका देवी संस्थिता[3] दक्षिणे गृहे ।
गोमयं तेन गृह्णीयाल्लेपनार्थं वरानने ॥ १४ ॥
चण्ड[4]कापालिनी देवी[5] संस्थिता[6] चोत्तरे गृहे ।
गृहीत्वा चोदकं तेन[7] लेपयेद्भूमिमण्डलम्[8] ॥ १५ ॥
सप्तदशाक्षरां कालीं[9] खल्ल[10]पाषाणतो न्यसेत् ।
द्वात्रिंशदक्षरं घोरं मर्दके[11] तु नियोजयेत् ॥ १६ ॥
गृह्णीयात् काञ्जिकां देवि कालपाशेन मन्त्रितः ।[12]
एवं सुकर्म्मसंयोगं कुरुते खेचरीकुलम् ॥ १७ ॥
अष्टाशीतिसहस्राणि याः स्थिता दिव्यखेचरी[13] ।

---

(1) M reads तेन पूजयेत्. (2) पूर्व्वगेहे, a variant in K. (3) K reads सा स्थिता. (4) M reads पञ्च. (5) M reads देव्या, which is incorrect. (6) K reads सा स्थिता. (7) M reads देवि. (8) लेपनञ्चभूमिमण्डले, a variant in M. (9) साष्टादशाक्षरी काली, a variant in K. (10) All the MSS. agree in spelling खल्ल thus—खल्व. But no lexicon supports the latter spelling. (11) K reads मर्दने. (12) गृहीत्वा काञ्जिकां देवि कालपाशेन चार्चिताम्, a variant in K. (13) [इति नाम्ना] is to be understood after दिव्यखेचरी. Both K and M read या (without विसर्ग), which is incorrect.

ता: सर्व्वा: किंकरास्तस्य[1] औषधं पेषयन्ति ता:[2] ॥ १८ ॥
तासां सर्व्वन्तु मन्त्रैकं[3] चतुरक्षरसंयुतम् ।—"सोहं हंस:"
सा विद्या खेचरीणां तु[4] नाम्ना[5] तु कुलखेचरी ॥ १९ ॥
राजिकां सैन्धवं न्यस्य[6] सा विद्या कुलखेचरी ।
मन्त्रयेत् काञ्जिकां[7] तत्र मन्त्रराजो रसाङ्कुशो[8] ॥ २० ॥
अस्त्रविद्यां जपेत्तत्र[9] या ज्ञाता पूर्व्वभार्गवे[10] ।
गुड़ेष्टकान्तु सम्मर्द्य[11] प्रिये तन्मर्दितं[12] रसम् ॥ २१ ॥
का कथा मन्त्रराजस्य[13] न वाक्यं त्रिशिरस्य च[14] ।
षड़ङ्गं योजयेत् तं[15] तु त्वरितं[16] धारयेत् तत: ॥ २२ ॥
डामराख्यं महामन्त्रं धमनीषु[17] नियोजयेत् ।

---

(1) खेचरास्तस्य is the reading in M. [Here किंकरा: = female servants.] (2) K reads पेषयेत्तत:. (3) तासाञ्च सर्व्वमन्त्रैकं, a reading in K. (4) K reads खेचरी नाम. (5) M reads नात्मा, which is an error of the scribe. (6) राजिका सैन्धवं न्यस्यां, a variant in M, which seems to be erroneous. (7) M reads काञ्जिकं. (8) B reads रसाङ्कुशा. K reads रसाङ्कुशीं. (9) B has अस्तु विद्या जये तत्र. (10) K has यो ज्ञाता पूर्व्वभाग्भवेत्. M has या ज्ञाता पूर्व्वभाग्भवेत्. (11) B reads गुड़ेष्टकं. K reads गुड़ेष्टकं तु संसर्वं, wherein the last term seems to be an error. (12) B reads तं मर्दितं. (13) B reads कालपाशं मन्त्रराजस्य, which mars the metre. (14) B reads न वात्मा त्रिंशतस्य च. K reads तत्त्वात्मत्रिशिरस्य च. (15) K reads तत्. M reads ते, which is incorrect. (16) B and K read त्वरितां, which is a palpable mistake. (17) B reads महातंत्रं डामयेषु. M reads भूपुरेषु, which has no clear sense.

चिन्तामणिमहाविद्यां कवचेषु नियोजयेत् ॥ २३ ॥
चण्डिकाया महामन्त्रं तं तु पात्रे नियोजयेत् ।[1]
नवविद्यां[2] वरारोहे विन्यसेत्तुषगोमये ॥ २४ ॥
त्रिपुराभैरवीं देवीं[3] राजिकाकाञ्जिके[4] न्यसेत् ।
गुड़स्य कालरात्रिस्तु न्यस्तव्या वीरवन्दिते[5] ॥ २५ ॥
त्रिकूटाख्यं त्रिनेत्रं तु[6] अनलस्य तु विन्यसेत्[7] ।
उदके विन्यसेद्देवि चतुरशीति[8]चण्डिका: ॥ २६ ॥
क्षेत्रपालमघोरास्त्रं[9] न्यस्तव्यं कोष्ठके प्रिये[10] ।
महापाशुपतास्त्रन्तु मूषायां च नियोजयेत्[11] ॥ २७ ॥
एतन्मन्त्रगणं[12] देवि रसस्थाने नियोजयेत् ।

---

(1) The portion commencing from चिन्तामणिमहाविद्यां and ending in पात्रे नियोजयेत् is not found in M. (2) K reads नवचित्रां. (3) B reads त्रिपुराभैरवि देवि. M reads त्रिपुराभैरवी देवि. Both seem to be incorrect. (4) M reads राजिकां काञ्जिके. (5) गुलस्य कालरात्रिन्तु व्यस्तव्या वीरवर्जिता, a variant in M, which is inc. (6) K reads त्रिकूटाख्यत्रिनेत्रं च. M reads त्रिघट्टाख्यात्रिकोणित्रन्तु. (7) K reads अनले च त्वमे न्यसेत्. M reads erroneously अनलस्यन्तु विन्यसेत्. [गुड़स्य = गुड़े, अनलस्य = अनले ; षष्ठी सर्व्वत्र युज्यते ।] (8) All the MSS. read चतुराशीति, which is grammatically incorrect. (9) क्षेत्रपालमघोराख्या, a variant in M. (10) K reads धिपे. All the MSS. read कोष्टके, which is incorrect. (11) महापाशुपतं या तु मूषायां तन्नियोजयेत्, a variant in M, which is inc. K reads मूखायां, wherein ख is written in the place of ष, which is pronounced by the up-countrymen as ख. (12) This hemistich is wanting in B. K reads एतन्मन्त्रगणां, which is incorrect.

तदा तु सिद्ध्यति[1] तस्य साधकस्य फलं[2] प्रिये ॥ २८ ॥
रसाङ्कुशं महामन्त्रं जपेत्तु हृदयान्तरे[3] ।
अन्ये ये[4] योगिनीमन्त्राः सर्व्वांन्नारीश्च जापयेत्[5] ॥ २९ ॥
अप्रकाशन्तु[6] तेनैव मन्त्रराजं रसाङ्कुशम् ।
अप्रकाशञ्च[7] नारीणां रत्तयेत्प्राणवं तथा[8] ।
महासमयविभ्रंशं[9] नारीणां हृदयं यथा[10] ॥ ३० ॥
कुब्जिकाद्यास्तु ये मन्त्रा मया[11] ते संप्रकाशिताः ।
त्रैलोक्यं चोभितास्ते तु[12] न मन्यन्ते मम प्रिये ॥ ३१ ॥[13]
रसाङ्कुशेन ज्ञातेन[14] त्रैलोक्यं वश्यतां[15] व्रजेत् ॥ ३२ ॥

---

(1) B reads भिद्यते, which is incorrect. (2) B reads परं. M reads रसं. (3) B reads जप्तव्यं तु हृदंतरे. M reads हृदयाम्बुजे. All the texts read जप्तव्यं, which is grammatically incorrect, as the term मन्त्र is not neuter. (4) B and M read च. (5) B has सर्वांन्नारीं च. सर्वगार्थ्येश्च जायते, a variant in K, which has no clear meaning. (6) K reads अप्रकाश्यन्तु. M reads सप्रकाशन्तु, which is incorrect. (7) K reads अप्रकाश्यन्त. (8) B reads प्राणवद्दयथा. K reads प्राणवञ्च तां, wherein तां is incorrect. (9) तहासपविभ्रंशं is the reading in K, which seems to be defective. (10) हृदयस्तथा is the variant in K, which is incorrect. This hemistich is wanting in M. (11) B reads मन्त्रा ये त्वया, wherein the last term is incorrect. (12) K reads तैस्तु, which seems to be incorrect. (13) The portion beginning from कुब्जिकाद्यास्तु and ending in प्रिये is not found in M. (14) K reads ज्ञातेन. (15) K reads वश्यतां.

मन्त्रन्यासमिति[1] ज्ञात्वा यन्त्रमूषाग्नि[2]मानवित् ।
कुर्व्वाणो रसकर्म्माणि सिद्धिं प्राप्नोति साधकः ॥ ३३ ॥

इति श्रीपार्व्वतीपरमेश्वरसंवादे
रसार्णवे रससंहितायां
मन्त्रन्यासो नाम[3]
तृतीयः पटलः ॥३॥

चतुर्थः पटलः ।

श्रीदेव्युवाच ।[1]

यन्त्रमूषाग्निमानानि न ज्ञात्वा मन्त्रवेद्यपि ।
किं करोति[2] महादेव तानि मे वक्तुमर्हसि ॥ १ ॥

---

(1) मन्त्रन्यासामिति, a variant in K. (2) K reads मूषाग्नि. (See the remark in p. 39.) (3) M reads रसार्णवे मन्त्रन्यासन्नाम तृतीयः पटलः.

---

(1) K has the following śloka, which being absurd, we have not adopted :—रसोपरसलोहानि बलयंत्रमूषाग्निना । मानितो ज्ञानतो मंत्रसंज्ञास्तु मंत्रवेद्यपि ॥ The portion commencing from the opening श्रीदेव्युवाच &c. up to श्रीभैरव उवाच (next page) is not found in M except the word भैरवः. (2) K reads किं करोमि, which is inaccurate.

श्रीभैरव उवाच ।

रसोपरसलोहानि वसनं[1] काञ्जिकम्[2] विड़म् ।
धमनी-लोहयन्त्राणि[3] खल्ल[4]पाषाणमर्दकम् ॥ २ ॥
कोष्ठिका[5] वक्रनालं च[6] गोमयं सारमिन्धनम् ।
मृन्मयानि च यन्त्राणि मुषलोलूखलानि च ॥ ३ ॥
संडसी-पट्टसंदंशं[7] मृत्पात्रायःकटोरकम्[8] ।
प्रतिमानानि च तुला-च्छेदनानि कषोपलम्[9] ॥ ४ ॥
वंशनाली-लोहनाली[10]-मूषाङ्गारां[11]स्तथौषधीः ।
स्नेहाम्ललवणक्षारविषाण्युपविषाणि च ॥ ५ ॥
एवं संगृह्य[12] सम्भारं कर्म्मयोगं समाचरेत् ॥ ६ ॥
द्रवद्रव्येण भाण्डस्य पूरितार्द्धोदरस्य[13] च ।

(1) B and M read वासना. (2) B reads किंजिका. M reads कांचिकं. (3) K reads लोहपत्राणि. (4) All the texts read खल्व, which is not supported by any lexicon. (5) B and K read कोष्टिका, which is not correct. (6) M reads चक्रनालञ्च, which seems to be incorrect. (7) K reads पाइशंदंशं. M reads मण्डवीपट्ट-सन्दंशं. (8) K reads करीटकम्. M reads कमीरकम्. Both are inc. (9) खोदिनीनि, a reading in M, which has no meaning. K reads कषोत्-पलम्, which is not correct (10) K reads वंसनालि लोहनालि, which is incorrect. (11) M reads मूषायाग. K reads मुखमार्गा, which has no clear sense. (12) M reads संग्राह्य. (13) K reads द्रवद्रवेण भाण्डं च पूरीतमर्वरसेन, which seems to be an error. We have adopted the reading in B and M, which agrees with that in रसरत्न-समुच्चय, Chap. IX. v. 3.

मुखे तिर्य्यक्कृते[1] भाण्डे रसं सूत्रेण लम्बितम् ।
तं[2] स्वेदयेत् तल[3]गतं दोलायन्त्रमिति स्मृतम् ॥ ७ ॥
लोहमूषाद्वयं कृत्वा द्वादशाङ्गुलमानतः ।[4]
ईषच्छिद्रान्वितामेकां तत्र[5] गन्धकसंयुताम्[6] ॥ ८ ॥
मूषायां रसयुक्तायाम् अन्यस्यां तां प्रवेशयेत् ।
लोथं स्यात् सूतकस्याधः[7] ऊर्द्ध्वाधो वह्निदीपनम्[8] ॥ ९ ॥
रसोनकरसं भद्रे यत्नतो[9] वस्त्रगालितम् ।
दापयेत्प्रचुरं यत्नात् आप्लाव्य[10] रसगन्धकौ[11] ॥ १० ॥
स्थालिकायां निधायोर्द्ध्वं[12] स्थालीमन्यां दृढ़ां कुरु[13] ।
सन्धिं[14] विलेपयेद्‌यत्नात् मृदा वस्त्रेण चैव हि[15] ॥ ११ ॥

(1) K reads मुखतिर्य्यक्कृते. (2) K reads तत्. (3) K reads तच. M reads तैल. For the definition of दोलायन्त्र vide रसरत्नसमुच्चय Chap. IX. vs. 3–4. (4) This śloka and the following six ślokas are nearly the same as in रस.स. in Chap. IX. vs. 15–21. (5) K reads ईषच्छिद्रां छिद्रमितमेकां. (6) M reads गन्धकसंयुतम्, which is grammatically inc. (7) B reads सूतकस्यार्द्धं. (8) Both K and M read दीपकम्. We have adopted the reading in B and रस.स. (9) M reads यत्नतः, which is evidently an error of the scribe. (10) B reads आप्लव्या, which is incorrect. K reads आप्लुतौ. (11) M reads रसगन्धकैः, which seems to be incorrect. (12) B reads विधायोर्ध्वा. K reads विधायोर्द्ध्वं. पिधायोर्द्ध्वं is the reading in रस.स. We have adopted the reading in M. (13) स्थालिमन्यां दृढ़ं कुरु, a variant in K. (14) K reads सार्द्धं, which seems to be incorrect. (15) M reads वेष्टयेत्.

स्थाल्यन्तरे कपोताख्यं पुटं कर्षाग्निना[1] सदा ।
यन्त्रस्याधः करीषाग्निं[2] दद्यात्तीव्राग्निमेव वा ॥ १२ ॥
एवन्तु त्रिदिनं[3] कुर्य्यात् ततो यन्त्रं विमोचयेत्[4] ।
तप्तोदके तप्तचुल्ल्यां[5] न कुर्य्याच्छीतले क्रियाम्[6] ॥ १३ ॥
न तत्र च्योयते[7] सूतो न च गच्छति कुत्रचित् ।
अनेन क्रमयोगेन[8] कुर्य्याद्गन्धकजारणम्[9] ॥ १४ ॥
ऊर्द्ध्वं वह्निरधश्चापो मध्ये तु[10] रससङ्ग्रहः ।
मूषायन्त्रमिदं देवि[11] जारयेद्गगनादिकम्[12] ॥ १५ ॥

(1) M reads पुटकर्षाग्निना, which is incorrect. (2) B reads करिष्याग्नि, which is not correct. (3) B, K and M read त्रिविधं, the sense whereof is not clear. We have adopted the reading in रसरत्न-समुच्चय. (4) तप्ततोये विमर्द्दयेत्, a variant in K. We have adopted the reading in B, M and रस.स. (5) तप्तादके तदा चुल्ल्यां, a variant in K. M reads तप्तोदकेन तप्तच्या, which seems to be an error. We have adopted the reading in B and रस.स. (6) B reads न कुर्य्या-च्छीतलक्रियां. K reads न कुर्य्याग्निलतां क्रियाम्, which is evidently a mistake. न कुर्य्याच्छीतलक्रियाः, a reading in M. We have adopted the reading in रस.स. (7) K reads जायते. M reads चयते. We have taken the reading in B and रस.स. (8) अनेन च क्रमेणैव, a variant in रस.स. (9) M reads गन्धकजारणाम्. (10) M reads च. (11) तुषायन्त्रमिदं देवि, a variant in M, which seems to be an error. K reads मूखायन्त्र, which ought to be मूषायन्त्र. सोमनालमिदं प्रोक्तं, or सोमानलमिदं प्रोक्तं, a reading in रस.स. Most probably सोमानलयन्त्र is the modern name of मूषायन्त्र. (12) सारयेद्गगनादिकं, a variant in B. जार्य्यते गन्धकादिकं, a variant in K. सारयेद्गगनादिकर्म, a reading in M, which destroys the metre.

गर्भयन्त्रं प्रवक्ष्यामि पिष्टिकाभस्मकारणम्[1] ।
चतुरङ्गुलदीर्घां तु[2] मूषिकां मृन्मयीं दृढाम् ॥ १६ ॥
त्र्यङ्गुलां मध्यविस्तारे[3] वर्त्तुलं कारयेन्मुखम् ।
लोहस्य[4] विंशतिर्भागा एको भागस्तु गुग्गुलोः[5] ॥ १७ ॥
सुश्लक्ष्णं पेषयित्वा तु तोयं दद्यात्[6] पुनः पुनः ।
मूषालेपं ततः कुर्य्यात्[7] तले पिष्टीं च निक्षिपेत्[8] ॥ १८ ॥
तुषकर्षाग्निना भूमौ[9] मृदुस्वेदन्तु कारयेत्[10] ।
अहोरात्रं त्रिरात्रं वा रसेन्द्रो भस्मतां व्रजेत् ॥ १९ ॥

(1) B reads भस्मकारकं. K reads पिष्टिकायन्त्रकारकम्. We have adopted the reading in रसरत्नसमुच्चय. For पिष्टिका, see रस.स. Chap. VIII. ślokas 7—8; and for गर्भयन्त्र vide do. Chap. IX. vs. 28—31. This hemistich is wanting in M. (2) K reads चतुरङ्गुलदीर्घं च, which is incorrect. दीर्घान्तु मूषीकां, a variant in M. (3) B reads अङ्गुलं मध्यविस्तारे. K reads अङ्गुलं मध्यविस्तारं. त्र्यङ्गुलोन्मितविस्तरां is the reading in रसरत्नसमुच्चय, wherein the last term seems to be incorrect, as the term विस्तर is invariably used to express a collection of words and not the breadth. Vide Pánini 3.3.33. (4) B and K read लोणस्य. M reads लौहस्य. We have adopted the reading in रस.स. (5) B reads एकभागस्तु गुग्गुलुः. M reads एको भागस्तु गुग्गुलुः. (6) B and M read दत्वा. दद्याद्वारंवारं is the reading in रस.स. (7) K reads मूखालेपं. दृढं कृत्वा is the reading in रस.स. (8) K reads तिलपिष्टं सुनिक्षिपेत्. तैलपिष्टञ्च निक्षिपेत्, a variant in M. रस.स. has लवणार्द्रमृदम्बुभिः. (9) B has भूयौ instead of भूमौ. K has कुर्य्यात्तुषाग्निं भूमौ च. कर्षेस्तुषाग्निना भूमौ, a variant in रस.स. (10) रस.स. reads स्वेदयेन्मृदु मानवित्.

जारणी मारणी[1] चैव रसराजस्य रञ्जने ।
यन्त्रमेकं[2] परं मर्म्म यन्त्रौषध्यो महाबलम्[3] ॥ २० ॥
औषधीरहितश्चायं हठाद्[4]यन्त्रेण बध्यते ।
सर्व्वत्र सूतको याति[5] मुक्ता भूधरलक्षणम् ॥ २१ ॥
देवताभिः समाक्रष्टो लोष्टस्थोऽपि[6] हि गच्छति ।
तस्माद्यन्त्रबलं चैकं न विलङ्घ्यं[7] विजानता ॥ २२ ॥
मन्त्रौषधिसमायोगात् सुसिद्धं कुरुते ह्ययम्[8] ।
मन्त्रोऽघोरोऽत्र जप्तव्यो[9] जपान्ते[10] पूजयेद्रसम्[11] ॥ २३ ॥
एकान्ते तु क्रिया कार्य्या दृष्टान्यैर्विफला[12] भवेत् ॥ २४ ॥
गन्धकस्य क्षयो नास्ति[13] न रसस्य क्षयो भवेत् ।

---

(1) B reads जारणमारणे. K reads मारणी. (2) K reads यन्त्रमेवा परं कर्म्म. M reads यन्त्रौषधं परं कर्म्म. (3) K reads यंत्रौविद्या महाबला. M reads यन्त्रौषध्या महारसम्. Both are partly correct. (4) M reads हिक्राद, which is incorrect and absurd. (5) सूतका यान्ति, a variant in M. (6) B has a defective hemistich समाक्रष्टलोयस्थोपि हि न गच्छति. तथा पीतोऽपि, a variant in M. (7) B has मविलङ्घं. M reads नाविलङ्घ्यं, which seems to be inaccurate. (8) B and M read जवात्. In this reading the sentence becomes incomplete. (9) K reads मंत्रघोरोत्र यष्टव्यो. M reads मंत्रेऽघोरोऽत्र जप्तव्यो. Both the readings are not free from slight errors. (10) K reads यंत्रान्त. M reads यंत्रान्ते. Both are inc. (11) K reads पुरयेद्रसम्. (12) दृष्टेऽन्यैर्विफलं, a variant in M, which is incorrect. (13) गुरुकार्य्यक्षयो नासीत्, a reading in M, which has no sense at all.

क्षयो यन्त्रस्य विज्ञेयः[1] यन्त्रे विक्रियते क्रिया[2] ।
अलाभे कान्तलोहस्य यन्त्रं लोहेन कारयेत् ॥ २५ ॥
वह्निलक्ष्य[3]मविज्ञाय रसस्यार्द्धक्षयो[4] भवेत् ।
यन्त्रक्षयविधिज्ञस्य चतुर्थांशक्षयो[5] भवेत् ॥ २६ ॥[6]
द्विमासेन द्वितीयांशं तृतीयांशं त्रिभिर्भवेत् ।
महाग्निं सहते ह्येष सारितो यत्र[7] तिष्ठति ॥ २७ ॥
खर्परं सिकतापूर्णं[8] कृत्वा तस्योपरि न्यसेत् ।
अपरं खर्परं[9] तत्र शनैर्मृद्वग्निना[10] पचेत् ॥ २८ ॥
पञ्चक्षारैस्तथा मूत्रै[11]र्लवणैश्च[12] विड़न्ततः[13] ।
हंसपाकः स विज्ञातो[14] यन्त्रतत्त्वार्थकोविदैः[15] ॥ २९ ॥

---

(1) K reads विज्ञाय. B and M read यंत्रमविज्ञाय. (2) M reads क्रियाः, which is incorrect. (3) K reads वह्नेर्लक्षा. M reads वह्निलक्ष. (4) रसस्याधक्षयो, a variant in M, which seems to be an error of the scribe. (5) यंत्रक्षेपाविधिज्ञस्य चतुर्थांशक्षयो, a variant in M, which is inc. (6) This hemistich is not found in K. (7) K reads खेदात् instead of ह्येष. B reads सरिणावत्यं. M reads स्परिदावत्य. Both the readings are unintelligible. (8) B reads कपूरं, which is inc. कर्परं सिकताचूर्णं, a variant in M. (9) तत्परं कर्परं, a reading in M. (10) K reads शतै मृदग्निना, which is a palpable mistake of the scribe. (11) B reads पश्चात्क्षारैस्तथा मंत्रैः. M reads पचक्षरैः, which is senseless. (12) लवणाश्च is the reading in रसरत्नसमुच्चय. (13) K reads विड़ैस्ततः. (14) स विख्यातो, a variant in B. हंसपादः सुविख्यातो, a variant in M. हंसपाकं समाख्यातं, a variant in रस.स. (15) M reads यंत्रं तत्त्वार्थकोविदैः. We see यंत्रं तद्यार्थिकोत्तमैः in रस.स.

कृष्णा रक्ता च पीता[1] च शुक्लवर्णा[2] च मृत्तिका ।
आद्या श्रेष्ठा कनिष्ठान्त्या[3] मध्यमा मध्यमा मता ॥ ३० ॥
दग्धधान्यतुषोपेता मृत्तिका कोष्ठिकाविधौ[4] ।
वङ्कनालकृता[5] वापि शस्यते सुरसुन्दरि ॥ ३१ ॥
गारा[6] दग्धा तुषा दग्धा दग्धा वल्मीकमृत्तिका ।
अजाश्वानां मलं[7] दग्धं यावत्तत् कृष्णतां गतम्[8] ॥ ३२ ॥
वासकस्य च पत्राणि वल्मीकस्य मृदा सह ।
पेषयेद्वह्नितोयेन यावत्तत् श्लक्ष्णतां गतम् ॥ ३३ ॥[9]
मर्दयेत्तेन बध्नीयात् वङ्कनालञ्च कोष्ठिकाम्[10] ॥ ३४ ॥
गारा दग्धा तुषा दग्धा दग्धा वल्मीकमृत्तिका ।
चीरमङ्गारकः किट्टं वज्रेणापि न भिद्यते ॥ ३५ ॥[11]
दग्धाङ्गारस्य षड्भागा भागैका[12] कृष्णमृत्तिका ।
चीरमङ्गारकः किट्टं वज्रमूषा[13] प्रकीर्त्तिता ॥ ३६ ॥

---

(1) M reads सीता. (2) M reads शुक्लकृष्णा. (3) कनिष्ठा च, a variant in K. (4) B reads कोष्टकाय वै. K reads कोष्टकार्यं वै, which is inc. The correct reading appears to be कोष्ठकाय वै. (5) B and M read वङ्कनालाकृता. (6) M reads गौरा. [गार or गारा = black earth mixed with kankar or nodular stones.] (7) K reads अजाश्वातां मलं. M reads अजाश्वानमलं. Both are inc. (8) दग्धा मृत् कृष्णतां गता, a variant in K. (9) अनेन श्लक्ष्णतां गतं, a variant in K. This śloka (33) is not found in M. (10) B reads मर्दयेते तेनौषधी या, which is not intelligible. M reads कोष्ठिकम. (11) This śloka is wanting in M. (12) M reads भागैकं, which is not correct. (13) According to रसरत्नसमुच्चय this appears to be गारमूषा (Chap. X. v. 13).

तुषं वस्त्रसमं दग्धं[1] मृत्तिका चतुरंशिका[2] ।
कूपी[3]पाषाणसंयुक्ता वरमूषा[4] प्रकीर्त्तिता ॥ ३७ ॥
प्रकाशा चान्धमूषा च मूषा तु द्विविधा स्मृता[5] ॥ ३८ ॥
प्रकाशमूषा देवेशि शरावाकारसंयुता ।
द्रव्यनिर्वाहणे सा च वादिकैः[6] सुप्रशस्यते ॥ ३९ ॥
अन्धमूषा तु कर्त्तव्या गोस्तनाकारसन्निभा ।
पिधानकसमायुक्ता किञ्चिदुन्नतमस्तका[7] ॥ ४० ॥
पत्रलेपे तथा रङ्गे[8] द्वन्द्वमेलापके तथा ।
सैव च्छिद्रान्विता[9] मन्दा गम्भीरा सारणोचिता ॥ ४१ ॥
तिलभस्म द्विरंशं तु[10] इष्टकांश[11]समन्वितम् ।

---

एकीकृत्याथ संमर्द्य उन्मत्तकरसेन च ।
मारयेत् पातनायन्त्रे धमनात् खोटतां नयेत् ॥ १११॥

॥ इति तालकबन्धः ॥

शुद्धनागपलैकं च पलैकं सूतकस्य च ।
पलद्वयं कुनट्याश्च सर्व्वमेकत्र मर्द्दयेत्[3] ।
मारयेत् पातनायन्त्रे धमनात् खोटतां नयेत् ॥ ११२ ॥
हेमपिष्टिपलैकं तु पलैकं गन्धकस्य च ।
एकीकृत्याथ संमर्द्य धुर्त्तूरकरसेन[4] च ।
मारयेत् पातनायन्त्रे धमनात् खोटतां नयेत् ॥ ११३ ॥[5]
कृष्णाभ्रकस्य सत्त्वं च कान्तं तीक्ष्णं च हाटकम् ।
शुद्धशुल्वं च तारं च माक्षिकं समभागिकम्[6] ।
अन्धमूषागतं ध्मातं खोटो[7] भवति तत्क्षणात् ॥ ११४ ॥

(1) K reads तालपिष्टिपलैकं. This charaṇa and the next seven are not found in M and My. (2) B reads द्वीपले, which is incorrect. K reads द्विपलं. (3) K reads रंजयेत्, which seems to be incorrect. (4) K and My have धत्तूरकरसेन. (5) We do not find 112th and 113th ślokas in B. We find the following hemistich in K only :— हेमपिष्टिपलैकं तु पलैकं गंधकस्य तु, which seems to us a repetition. (6) शुद्धशुल्वतारं च माक्षिकं समभागानि कारयेत्, a variant in B, which appears to us irregular. शुद्धतारञ्च माक्षीकं समभागानि कारयेत्, a variant in M and My, wherein शुल्व is not mentioned. (7) M reads खोट्टो.

तत्खोटपलमेकं तु पलैकं सूतकस्य च ।
पलद्वयं कुनट्याश्च सर्व्वमेकत्र मर्द्दयेत्[1] ।
मारयेत् पातनायन्त्रे धमनात् खोटतां[2] नयेत् ॥ ११५ ॥
कृष्णाभ्रकपलैकं तु[3] रसकस्य पलं तथा[4] ।
सूतकस्य पलैकं तु सर्व्वमेकीकृतं प्रिये ॥ ११६ ॥
उन्मत्तकरसेनैव मर्द्दयेत् प्रहरद्वयम् ।
मर्द्दयेद्दिनमेकं तु[5] टङ्कणेन समन्वितम् ॥ ११७ ॥
गुटिकां[6] कारयेद्देवि छायाशुष्कां तु कारयेत् ।
महावह्निगतं ध्मातं खोटो भवति सूतकम्[7] ॥ ११८ ॥
तं खोटं शोधयेच्छ्वेत[8]काचटङ्कणयोगतः ।
हेम्ना सह समावर्त्त्य[9] सारणात्रयसारितम् ॥ ११९ ॥
सहस्रांशेन तेनैव शुल्ववेधं[10] प्रदापयेत् ।
अनेन क्रमयोगेण कोटिवेधी भवेद्रसः ॥ १२० ॥
वीजद्वयं पलाशस्य पलमेकं तु सूतकम् ।
जम्बीराम्लेन संमर्द्य छायाशुष्कं तु कारयेत् ॥ १२१ ॥

(1) B and My read कारयेत्. (2) M reads खोट्टतां. (3) कृष्णाभ्रपलमेकं तु, a variant in K. (4) पलैकं गन्धकस्य च, a variant in M. This charaṇa and the next one are not found in My. (5) B and My read दि. After this charaṇa we do not find 70 (117—187) ślokas in M. (6) B has अंगुलिकां, which seems to be incorrect. (7) K and My read सूतकः. (8) K reads शोधयेद्देवत्, which seems to be incorrect. My reads खोटं संशोधयेत् श्वेत. (9) हेम्ना सहसमावर्त्यं, a variant in B. (10) B reads शुद्धवेधं.

तुम्बी च[1] मेघनादा च काकजङ्घा च चूलिका[2] ।
स्वौस्तन्येन प्रलिप्तायां मूषायां[3] च विनिक्षिपेत् ॥ १२२ ॥
धमयेत् खदिराङ्गारैः खोटो भवति चाक्षयः ॥ १२३ ॥
पलाशतैलं[4] संमर्द्य यावत् स्याद्रसपिष्टिका[5] ।
अन्धमूषागतं ध्मातं खोटो भवति तत्क्षणात् ॥ १२४ ॥
पूर्व्वशुद्धेन सूतेन[6] सह हेम्ना[7] च पार्व्वति ।
गोलकं कारयेत्तेन मर्दयित्वा द्रुतं[8] कृतम् ॥ १२५ ॥
ब्रह्मवृक्षस्य बीजानि कार्पासास्थि विभीतकम् ।
यवचिञ्चा तु[9] वन्ध्या च राजिका च समन्वितम् ॥ १२६ ॥
सूक्ष्मपिण्डीकृतं[10] सर्व्वं तेन लिप्ता तु गोलकम् ।
पुटनैः सप्तभिर्देवि पिष्टिकास्तम्भनं भवेत् ॥ १२७ ॥
बृहत्पुटं ततो दत्त्वा मूषायां तत्तु भावयेत्[11] ।
समावर्त्तं तु तं सूतं[12] समहेम्ना नियोजितम्[13] ।

(1) B and My read तुंविका. (2) My reads मूलिका. (3) K reads मूखायां, which is incorrect. My reads स्तन्यं च तैः प्रलिप्तायां मूषायां. (4) K has पातालतैलं. (5) My reads स्यादगन्धपिष्टिका. (6) पूर्व्वसूतेन शुद्धेन, a variant in D and K. (7) D reads सहेमेकेन, which is incorrect. My reads समहेम्ना. (8) D reads घृतं, which is incorrect. My reads कृतं. (9) B wants तु. K reads पंचचिंचा. (10) D reads erroneously सूक्ष्मपीडीसतं. (11) मूषायां तु भवेत्ततः, a variant in B. मूखायां तु भवेत्ततः, a variant in K. (12) B reads तत् सूतं. D has an incomplete charaṇa—समावर्त्तं तु सूतं. (13) D has an incomplete charaṇa—हेम्ना नियोजितम्.

शतांशेन तु चन्द्रार्कं वेधयेत् सुरवन्दिते ॥ १२८ ॥
पुनस्तेनैव योगेन पिष्टीस्तम्भं तु[1] कारयेत् ।
सारयित्वा ततो हेम्ना वेधयेच्च सहस्रकम्[2] ॥ १२९ ॥
एवं लक्षाणि कोटिं च वेधयेत् क्रमयोगतः ।
सप्तसंकलिकावृद्धं कृत्वा वक्त्रे[3] तु गोलकम् ।
वर्षेणैकेन स भवेत्[4] वलीपलितवर्ज्जितः ॥ १३० ॥
चाण्डाली[5] राक्षसी चैव कुण्डगोलोद्भवो[6] रसः ।
बीजं सूतं च वैक्रान्तं मर्दयेत् प्रहरत्रयम्[7] ॥ १३१ ॥
विशुद्धं गोलकं[8] कृत्वा मूकमूषागतं[9] पुटेत् ।
खोटस्तु जायते देवि सुध्मातः[10] खदिराग्निना ॥ १३२ ॥
चाण्डालीराक्षसीपुष्प-रस[11]मध्वाज्यटङ्कणैः ।
महारसाष्टमध्येक-मभ्रकं चापि[12] योजयेत् ॥ १३३ ॥
नागं वङ्गं समं[13] सूतं हेम तारमथापि वा ।

(1) B and My read पिष्टिस्तम्भन, which is gram. inc. (2) वेधैशैव सहस्रकं, a variant in B and My. (3) K wants चक्र. My reads वक्रं. (4) D reads सह भवेत्, which is incorrect. (5) B reads चण्डाली. (6) कुंडतोलोद्भवे is the reading in D, which seems to be incorrect. (7) D and My have प्रहरद्वयम्. (8) D reads विशुद्धगोलकं. (9) D and K read मूकमूखागतं, which is incorrect. (10) B reads ध्मातः, which mars the metre. (11) चंडालीराक्षसीपुष्पीरथ is the reading in B. राजसीपुष्पं रस is the reading in D. (12) B reads मध्येकमभ्रकं चापि, wherein the first term is incorrect. (13) K and My read नागवंगसमं

अभ्रकं द्रुतिसत्त्वं[1] वा मर्द्दयेत् प्रहरद्वयम्[2] ॥ १३४ ॥
छायाशुष्कं ततो गोलं[3] मूकमूषागतं धमेत् ।
दत्त्वा लघुपुटं देवि खोटो भवति शोभनः ॥ १३५ ॥
रम्भा वीरा[4] स्नुहीक्षीरं कञ्चुकी यवचिञ्चिका ।
द्रोनारी चैव[5] गोरम्भा मीनाक्षी काकमाचिका ॥ १३६ ॥
एभिर्मर्द्दित[6]सूतस्य पुनर्जन्म न विद्यते ।
पूर्व्ववत् क्रमयोगेण खोटो भवति शोभनः ॥ १३७ ॥
विष्णुक्रान्ता च चक्राङ्का बला च तुलसी तथा[7] ।
महासोमाह्विवल्ली[8] च सूर्य्यावर्त्तश्च सुन्दरि[9] ।
एभिस्तु मर्द्दितः सूतः[10] पूर्व्ववत् खोटतां व्रजेत्[11] ॥ १३८ ॥
मुखेन ग्रसते ग्रासं[12] जारणा तेन सुन्दरि ।
रसोनराजिकामूलै[13]र्मर्द्दितं वरवर्णिनि ।

(1) My reads द्रुतसत्वं. (2) B reads प्रहरत्रयम्. (3) K reads गोलां, which is incorrect. My reads तथा गोलं. (4) K and My read विरा. (5) K reads द्रोनादिर्नैव, which seems to be incorrect. (6) समैर्मर्द्दितं is the reading in D, which is incorrect. (7) काचला तुलसी कथा, a variant in D. (8) B reads महासोमा च वह्नि, wherein the last term is incorrect. My reads महासोमा च वल्ली. (9) सूर्यावर्तं च सुन्दरि, a variant in D. सूर्यावर्त्ता च सुंदरी, a variant in K. सूर्यावर्तं च सुंदरी, a variant in My. (10) B and My have मर्दितं सूतं. D has मर्दितैः सूतं. (11) B, K and My read नयेत्. (12) B has an incomplete charaṇa—मुखेन ग्रसं. D and My want this charaṇa and the next nine ones. K reads ग्रासो. (13) रसंनिशोविमूलैः, a variant in B.

दिव्यौषधिपुटं पाच्यं[1] रसखोटस्य लक्षणम् ॥ १३९ ॥
एतत्ते कथितं गुह्यं विज्ञेयं[2] रसवादिभिः ।
मत्प्रसादेन देवेशि तस्य सिद्धिर्न[3] संशयः ॥ १४० ॥
स्नुहीक्षीरं सकाञ्जीकं[4] बीजानि[5] कनकस्य च ।
कञ्चुकी लाङ्गली चेन्द्र-वारुणी विषमुष्टिका ।
पलाश[6]मूलतोयं च मर्द्दयेत्तेन सूतकम् ॥ १४१ ॥
समे हेम्नि[7] समं सूतं पिष्टिकां कारयेद्बुधः[8] ।
महारसान् पिष्टिकार्थं[9] मर्द्दयेदौषधीरसैः ॥ १४२ ॥
यामत्रयं मर्द्दयित्वा गोलकं कारयेद्बुधः ।
पिष्टिकां बन्धयित्वा तु गन्धतैले[10] विपाचयेत् ॥ १४३ ॥
अन्धमूषागतं गोलं[11] छायाशुष्कं तु कारयेत् ।
[ततो लघुपुटं दत्त्वा खदिराग्नौ तु धामयेत् ।
खोटस्तु जायते हेम्नि सह हेम्ना तु सारयेत् ॥][12]

(1) B reads erroneously पाश्य. (2) B reads विशीतं, which is incorrect. (3) B reads तस्य सिद्धेन. (4) स्नुहीक्षीरस्य काञ्जिकं, a variant in B. स्नुहिक्षीरस्य कांजीकं, a variant in My. (5) My reads बीजकं. (6) K reads पालाश. (7) B and My have समहेम्नि. (8) पिष्टिका कार्येद्बुत्र, an incorrect variant in D. My reads कारयेत्ततः. (9) महानसान् पिष्टिकारार्थं, an incorrect variant in B. This hemistich and the next one are not found in D. महारसं पिष्टिकार्थं, a variant in My. (10) D has गन्धतैलं, which is inaccurate. (11) D and K have चैव. (12) The śloka within brackets is found only in B and My.

अक्षीणो मिलते[1] हेम्नि समावर्त्तश्च जायते ॥ १४४ ॥
भक्षणादेव सूतस्य[2] दिव्यदेहो भवेन्नरः ।
वेधयेत् सर्व्वलोहानि रञ्जितः क्रमितो रसः[3] ॥ १४५ ॥
समांशभक्षणं सूतं[4] मर्द्दयेदोषधीरसैः[5] ।
नष्टपिष्टं तु तं कृत्वा पूर्व्वयोगेन धामयेत् ॥ १४६ ॥
खोटस्तु जायते दिव्यः[6] षोड़शांशेन वेधयेत्[7] ।
बद्धः[8] संकलिकायोगाद्विध्येद्दशगुणोत्तरम् ॥ १४७ ॥
मृगदूर्व्वा[9] चन्द्रवल्ली पक्वा चिञ्चा[10] तथैव च ।
कोकिला[11] करवीरं च वीजं चोन्मत्तकस्य च ।
काकाण्डी[12]फलसंयुक्तं मर्द्दयेत् सुरसुन्दरि ॥ १४८ ॥
समहेम्नि समं सूतं पिष्टिकां कारयेद्बुधः ॥ १४९ ॥
अथवा सारयित्वा तु समेन सह सूतकम् ।

---

(1) D reads मिलिते, which qualifies हेम्नि. My wants this charana. (2) D reads तस्यास्तु. The portion beginning with दिव्यदेहो and ending in वेधयेत् is not found in K. (3) D reads क्रामितो रसः. (4) समांसभक्षणं सूतं, a variant in B. समांसं भक्षणे मूते, a variant in D. समांशं भक्षणे मूते, a variant in K. (5) D reads मर्दयेत दुग्धीरसै, which appears to be incorrect. (6) B, K and My read दिव्यं, which is gram. inc. (7) B and My read वेधकः. (8) D reads बद्ध. K reads बद्ध. (9) My reads मृता दूर्वा. (10) B reads erroneously पकचिंचा. D reads पंक चिंची. (11) B has कांचिला. D has कोकला. My has क ले ना. (12) D reads काकण्डे. K reads काकंडि.

महारसं पिष्टिकार्थं[1] मर्द्दयेदोषधीरसैः ॥ १५० ॥
यामत्रयं मर्द्दयित्वा गोलकं कारयेत्ततः[2] ।
अन्धमूषागतं[3] गोलं छायाशुष्कं तु कारयेत् ॥ १५१ ॥
ततो लघुपुटं दत्त्वा[4] ध्मातः खोटो भवेत् प्रिये ॥ १५२ ॥
मृगदूर्व्वातमासोम-रसैः[5] सूतकचारणम्[6] ।
मूलैस्त्रयाणां लाङ्गल्या रामठेन च हन्यते[7] ॥ १५३ ॥
समेन हेम्ना संयुक्तां पिष्टिकां[8] कारयेद्बुधः ।
अथ तारकपिष्टं च[9] समसूतेन कारयेत् ॥ १५४ ॥
पूर्व्ववत् क्रमयोगेण खोटो भवति शोभनः ।
अन्धमूषागतं[10] भूमौ स्वेदयेत् करिषाग्निना ॥ १५५ ॥
अहोरात्रं त्रिरात्रं वा चूर्णबन्धो[11] भवेत्ततः ।
तच्चूर्णबंधः कुरुते[12] वेधं दशगुणोत्तरम् ॥ १५६ ॥

---

(1) B reads पिष्टिकार्द्धं. D has महाराजं पिष्टिकार्थं. Both the readings seem to be incorrect. (2) K reads चालयेत्ततः. My reads कारयेद्बुधः. (3) D and K read अंधमूखागतं, which is incorrect. (4) K reads दद्यात्. (5) B reads सोमरसौ. मृगदुःखित्वमासोमारसैः, a variant in D. My has मृतदूर्वाक्रमासोमरसैः. (6) K reads सूतकवारिणा, which has no sense. (7) D reads हन्यति. My reads रमतेन च हंस्यते. Both the readings seem to be incorrect. (8) B and My have संयुक्तं पीठिकां, which is incorrect. (9) B and My read अर्धतारक पीतं च. This hemistich and the next two are wanting in D. (10) अंधमूखागतं is the incorrect reading in B and K. (11) D reads चूर्णं बद्धं. My reads चूर्णबद्धो. (12) D has an incomplete charana बद्धं कुरुते. My has तच्चूर्णबद्धं.

शूलिनीरससूतञ्च[1] स्रोतोञ्जनसमन्वितम् ।
पूर्ब्ववत् पिष्टिकायोगात् खोटो भवति शोभनः ॥ १५७ ॥
स्रोतोञ्जनं सतगरं[2] पिष्टित्रययुतं रसम्[3] ।
धमयेद्वह्निसंक्षिप्तं[4] सूतकः सर्ब्बकर्म्मकृत् ॥ १५८ ॥
हेमाभ्रं चैव ताराभ्रं[5] शुल्वाभ्रं चाभ्रतीक्ष्णकम् ।
वङ्गाभ्रं चैव नागाभ्रं समसूतेन वेधयेत्[6] ॥ १५९ ॥
यथालाभौषधीदृष्टं[7] महारससमन्वितम् ।
हेम्ना तारेण शुल्वेन तीक्ष्णवङ्गोरगैस्तथा[8] ॥ १६० ॥
एभिर्व्यस्तैः समस्तैर्वा पिष्टिं कृत्वा समे समाम्[9] ।
मारयेत् पूर्ब्बविधिना गर्भयन्त्रे[10] तुषाग्निना ॥ १६१ ॥
समांशं सूतकं दत्त्वा वारं वारं पुनः पुनः ।

(1) शूलनीरसमूतं च, a variant in D. (2) श्रोतोञ्जनशतगुणं, a variant in D. K reads समगरं. (3) श्रष्टित्रययुतं रसः, a variant in D, which seems to be incorrect. (4) B reads वह्निसंक्षिप्तं, which has no clear sense. (5) The portion beginning from ताराभ्रं and ending in चैव is wanting in K. My has हेमाभ्रकं च ताराभ्रं. (6) समसूतेन वंधयेत्, a variant in B and My. D reads समं सूतेन वेधयेत्, K has समं सूतेन वंधयेत्. (7) यथालाभौषधीदृष्टं, a variant in D. यदा लाभौषधीदृष्टं, a variant in My. (8) तीक्ष्णनागरसेन च, a variant in D, which seems to be incorrect. (9) पीठीं कृत्वा समे समाः, a variant in B and My, which is partly correct. D reads समः, which is incorrect. (10) B and D read गर्भपत्रे. For the description of गर्भयन्त्र vide रस. स. Chap. IX, verses 28—31.

जायन्ते विविधाः खोटाः[1] कान्तवज्रो[2] महारसः ॥ १६२ ॥
भवेत् संकलिकायोगात् वेधो दशगुणोत्तरः ॥ १६३ ॥
खोटः पोटस्तथा[3] भस्म धूलिः कल्कश्च[4] पञ्चमः ।
एते निगलगोलाभ्यां[5] सर्ब्बबन्धफलोदयाः[6] ॥ १६४ ॥
शिग्रुसर्ज्जभवं क्षारं[7] ब्रह्मबीजानि गुग्गुलुः ।
सैन्धवं द्विगुणं दत्त्वा मर्द्दयित्वा विचक्षणः ॥ १६५ ॥
पिष्टिकावेष्टनं कृत्वा कल्केनानेन[8] सुन्दरि ।
बिल्वप्रमाणं कृत्वा तु मूषामतिदृढां शुभाम्[9] ॥ १६६ ॥
ऊर्द्ध्वाधो लवणं दत्त्वा मूषामध्ये[10] रसं क्षिपेत् ।
मूषालेपः प्रदातव्यो[11] दग्धशंखादिचूर्णकः[12] ॥ १६७ ॥

(1) जायते विविधः खोटः, a variant in D, K and My. (2) D reads कान्तवेधो. K and My read कान्तिवद्रो. (3) B and My read पाटस्तथा. (4) D reads काल्कं च. My reads धुली कल्कं च. (5) D reads कोलाभ्यां. K reads कालाभ्यां. My reads रोगाभ्यां. (6) सर्वबंधा फलोदया, a variant in B. सर्वं बन्धफलो दिशेत्, a variant in D. सर्वबद्धः फलोदया, a variant in My. (7) शुद्धार्कसंभवं क्षीरं, a variant in B and My. D reads क्षारी. सिग्रुसर्जयवक्षारं, a variant in K. (8) D has मूखा यत्नेन. K has मूखामनेन. (9) D has an incomplete hemistich —विल्वप्रमाण मूखां कृत्वामाटी दृढशुभम्. (10) D and K read मूखामध्ये, which is incorrect. (11) मूषालेपे प्रदातव्यं, a variant in B and My. मूखालेपा प्रदातव्यं, a variant in D. मूखालेपप्रदातव्य, a variant in K. All the texts are incorrect. (12) All the texts read चूर्णकम्, which is not lexicographically correct.

मुखं तस्या[1] दृढं बद्धा लोणमृत्तिकया[2] पुनः ।
कारयेच्च सुधालेपं[3] छायाशुष्कं च कारयेत् ॥ १६८ ॥
उक्तो निगलबन्धोऽयं[4] पुत्रस्यापि न कथ्यते ॥ १६९ ॥
तुषकर्षाग्निना भूमौ मृदुस्वेदं तु कारयेत्[5] ।
अहोरात्रप्रमाणेन[6] पुटं दत्त्वा प्रयत्नतः[7] ॥ १७० ॥
एवं[8] मूषा महेशानि रसस्य खोटतां नयेत्[9] ।
सुध्मातः[10] खदिराङ्गारैः रसेन्द्रः खोटतां व्रजेत्[11] ॥ १७१ ॥
सौवीरं टङ्कणं काचं[12] दत्त्वा खोटं तु शोधयेत्[13] ।
मध्यौणो मिलते[14] हेम्नि समावर्त्तस्तु जायते ॥ १७२ ॥

(1) D reads मूखा तस्य, which is incorrect. My reads तस्य. (2) D reads लवणमृत्तिकया, which destroys the metre. K reads लोणव्रतिकया, which is incorrect. My reads लोहमृत्तिकया. (3) D has दृढा मूखा. K has दृढां मूखां. Both are improper. (4) B and D read निगड़-वंधोयं. K reads सुक्तो निगलवंधोयं, wherein the first term is incorrect. (5) मृदूर्यामचतुष्टयोः, a variant in D. मृदुदेयचतुष्टयोः, a variant in K. (6) B and My have चहोरात्र' त्रिरात्रं वा. (7) D reads प्रमाणतः. (8) B reads सर्वं. This hemistich is not found in D and My. (9) B has खोटता व्रजेत्. (10) B and My read सुध्मातं. D reads सुध्मानं, which is incorrect. (11) रसेंद्रं खोटतां नयेत्, a variant in B. रसेन्द्रं खोटतां व्रजेत्, a variant in D. रसेन्द्रो खोटतां नयेत्, a variant in My. The last two readings seem to be incorrect. (12) D reads काचं, which is incorrect. (13) दत्वा दत्वा विशोधयेत्, a variant in B and My. दत्त्वा खोटं तु साधयेत्, a variant in D. (14) D and K read चचिणी मिलिते, wherein the first term is incorrect. अभ्रौर्णं निर्मलं, a variant in My.

समांशभक्षणं तं तु[1] शुद्धसूतेन कारयेत् ।
धमयेत् पूर्व्वयोगेन[2] रसेन्द्रं खोटतां[3] नयेत् ॥ १७३ ॥
भवेत् संकलिकायोगात् वेधो दशगुणोत्तरः[4] ॥ १७४ ॥
पलाशवीजनिर्य्यासं कोकिलोन्मत्तवारुणि[5] ।
शूलिनीरससंयुक्तं[6] पेषयेत् सैन्धवान्वितम् ॥ १७५ ॥
पिष्टिकावेष्टनं कृत्वा निगलेन तु बन्धयेत् ॥ १७६ ॥
मूषायां निगलो देवि लेपितः शिवशासनात्[7] ।
रसस्य परिणामाय महदग्निस्थितो[8] भवेत् ॥ १७७ ॥
अभ्रकस्य तु पत्रेण वज्रार्कक्षीरसिन्धुना[9] ।
ताप्येन लोहकिट्टेन[10] सिकतामृन्मयेन च ॥ १७८ ॥

(1) B and K have समांशं भक्षणं तत्तु. D has समांसं भक्षणात्तं तु. (2) धमें तत्प्रयोगेन, a variant in D. (3) रसेन षोडतां is an incorrect reading in D. My reads erroneously रसेन्द्रो खोटतां. (4) B reads दशगुणोत्तरं, which is incorrect. (5) कोकिलोत्तरवारुणी, a variant in D. (6) शूलीरसेन संयुक्तं, a variant in D. (7) B reads सौवसासनं. K reads विशसासनात्. Both the texts are incorrect. This hemistich and the next one are not found in D and My. (8) B has परीणामाया माहदग्निस्थितो. K reads महादग्निस्थितो. Both the texts are incorrect. The text adopted above is also gram. inc. , महाग्निस्थितो is the proper term, which mars the metre. (9) D reads पचिणा instead of सिन्धुना. K reads वज्रका and My reads वज्रांकं instead of वज्रार्क. (10) B reads तापेन. D reads ताप्येन लोहकठिन, which seems to be incorrect.

एभिस्तु निगलैर्बद्धः[1] पारदीयो[2] महारसः ।
नातिक्रामति मर्य्यादां वेलामिव महोदधिः[3] ॥ १७९ ॥
तैलार्कक्षीरवाराही[4]-लाङ्गल्यो[5] निगलोत्तमः ।
काकविट् ब्रह्मवीजानि लाङ्गली निगलो वरः ॥ १८० ॥
वाकुची ब्रह्मवीजानि[6] कर्क्कटास्थीनि सुन्दरि ।
सामुद्रं साम्बरं[7] चैव लवणं निगलोत्तमः ॥ १८१ ॥
स्नुह्यर्कसम्भवं क्षीरं ब्रह्मवीजानि[8] कोकिला ।
करकस्य तु वीजानि लोहाष्टांशेन मर्द्दयेत् ॥ १८२ ॥
निगलोऽन्यस्तु गोजिह्वा-मूलानि क्षीरजोऽपरः ।
वाकुची ब्रह्मवीजानि[9] स्नुह्यर्कक्षीरसैन्धवम्[10] ।
ज्वालिनी काकविष्ठा च[11] प्रशस्तो निगलोत्तमः ॥ १८३ ॥
लवणं टङ्कणं क्षारं शिला तालकगन्धकम्[12] ।
तथाम्लवेतसं ताप्यं[13] हिङ्गुलं समभागिकम् ।
स्नुह्यर्कपयसा युक्तं पेषयेन्निगलोत्तमम्[14] ॥ १८४ ॥

(1) निगलैवधः is the incorrect reading in D. (2) D reads पारदोऽयं. (3) D reads महोदधेः, which is gram. inc. (4) D and K have काहारि. My has साहारि. (5) B and My read लाङ्गल्या. (6) B reads काकची ब्रह्मवीजानि. The portion from कर्कटास्थीनि upto ब्रह्मवीजानि is wanting in D. (7) My reads सैन्धवं. (8) K reads वस्तवीजानि. (9) B has वाकुचिर्ब्रह्मवीजानि. (10) D has सैन्धवैः, which is not proper. (11) D reads तु. K reads ज्वालिनि, which is incorrect. (12) B reads तारकगंधकं. (13) D has an absurd variant साद्यात् प्रवैस शनाप्यं. तिलाम्लि वेतसं साप्यं, a variant in My. (14) D reads निगलोत्तमः.

पिष्टिकां वेष्टयेद्देषा[1]मेकेन निगलेन तु ।
लोह[2]मूषागतं प्राग्वत् खोटं कृत्वा तु वेधयेत्[3] ॥ १८५ ॥
द्वितीयं[4] गोलकं वक्ष्ये पिष्टिकास्तम्भ[5]मुत्तमम् ॥ १८६ ॥
द्विपदीरंजमूत्राणि सैन्धवाभ्रं च गुग्गुलुः[6] ।
पिष्टीं संवेष्ट्य कल्केन मृदा तु पुनरष्टधा ॥ १८७ ॥
तुषकर्षाग्निना भूमौ[7] मृदुस्वेदं तु कारयेत् ।
अहोरात्रं त्रिरात्रं वा[8] पूर्व्ववत् खोटतां[9] नयेत् ॥ १८८ ॥
वाकुची ब्रह्मवीजानि[10] गगनं विमलं मणिम्[11] ।
सौवर्च्चलं[12] सैन्धवञ्च टङ्कणं गुग्गुलुं तथा[13] ॥ १८९ ॥
द्विपदीरजसा मूत्रं[14] सुश्लक्ष्णं तच्च[15] मर्द्दयेत् ।
पिष्टीं संवेष्ट्य[16] कल्केन पूर्व्ववत् खोटतां[17] नयेत् ॥ १९० ॥

(1) विष्टिवेष्टयेद्देषा, an incomplete charaṇa in D. K reads देखा, which is incorrect. (2) B reads लेषा. (3) K reads बंधयेत्. (4) B, D and My have द्वितीय. K wants this. (5) D reads पौष्टिकं स्तम्भ. K reads पिष्टीकास्तम्भ. (6) सैन्धवाभ्रां सुगुग्गुलुः, a variant in D. My reads सगुग्गुलु. (7) D has an incomplete charaṇa—कर्षाग्निभूमौ. (8) D has वयं वापि, which seems to be incorrect. (9) M reads खोट्टतां. (10) वाकुचिर्ब्रह्मवीजानि, a variant in K. (11) B reads विमलमणिः. D reads विमलां मणीम्. K reads विमलां मणि. M reads विमलं गगनं मणिः. My reads विमलं मणिः. (12) M has सुवर्चलं. (13) K reads erroneously गुग्गुलुस्तथा. (14) द्विपदीरजसुमूत्रं, a variant in B. द्विपदीरसमूत्रं च, a variant in D. (15) B reads सुधाखरञ्च. D reads सुलक्ष्णं च. Both are incorrect. (16) B, D, K, M and My read पिष्टिकां वेष्टा, which is gram. inc. (17) M reads खोट्टतां.

विषवीजं[1] ब्रह्मवीजं वीजानि कनकस्य च ।
मूलानि यवचिञ्चायाः[2] लाङ्गली चेन्द्रवारुणी ॥ १९१ ॥
कोकिलाक्षंस्नुहीक्षीरं[3] सैन्धवाभ्रकगुग्गुलु ।
पिष्टीं संवेष्ट्य[4] कल्केन पूर्व्ववत् खोटतां नयेत् ॥ १९२ ॥
लाङ्गली ब्रह्मवीजानि विष्ठा काकस्य गुग्गुलुः ।
श्वेताश्वमारमूलानि मूलं कनकवारुणी ॥ १९३ ॥
तैलं सैन्धवसंयुक्तं मर्द्दयेत्तद्विचक्षणः ।
पिष्टीं संवेष्ट्य कल्केन पूर्व्ववत् खोटतां नयेत् ॥ १९४ ॥
वाकुची ब्रह्मवीजानि जीरकद्वयगुग्गुलु ।
सैन्धवाभ्रं कुलीरास्थि टङ्कणं ज्वालिनीरसः[5] ॥ १९५ ॥
पिष्टीं संवेष्ट्य कल्केन मृदा तु पुनरष्टधा ।
तुष[6]कर्षाग्निना भूमौ मृदुस्वेदं तु कारयेत् ॥ १९६ ॥
अहोरात्रं त्रिरात्रं वा[7] रसेन्द्रं खोटतां[8] नयेत् ।
दशसंकलिकायोगात्[9] शब्दवेधी महारसः[10] ॥ १९७ ॥

(1) B reads वीषवीजं. D reads व्याघ्रीवीजं. (2) D reads यव चिंचाया. K reads मूखानि चयचिंचाया. Both are incorrect. (3) K has कोकिलाचस्नुहीचीरं, which is incorrect. My has स्नुहिचीर. (4) B, K and My read पिष्टिकां वेष्ट्य, which is gram. inc. This hemistich and the next five are not found in D. (5) D reads ज्वलनीरसः. (6) B reads तुषा, which is incorrect. (7) D reads त्रिरामस्वा, which is incorrect. (8) M reads रसेन्द्रः खोट्टतां, which is not correct. My reads रसेन्द्रो खोटतां नयेत्, which is incorrect. (9) M has दशप्रङ्कलिकायोगात्. (10) D and My read शतवेधी महारसः. M reads शब्दवेधी भवेद्रसः.

शङ्करस्य द्विभागन्तु पारदस्य त्रयं[1] तथा ।
पिष्टिकां कारयेत्तेन तप्तखल्ले तु काञ्जिके[2] ॥ १९८ ॥
पूर्व्ववन्निगलोपेतं[3] खोटं कृत्वा तु वेधयेत् ।
दशसंकलिकायोगात्[4] शब्दवेधी[5] महारसः ॥ १९९ ॥
वज्रसूतकराजेन्द्र-शिलागन्धकमाक्षिकैः ।
कान्तपाषाणचूर्णेन भूलताभिः समन्वितः ॥ २०० ॥
ध्मातो मूषागतश्चैव[6] रसोऽयं[7] सुरवन्दिते ।
रसांश्चोपरसान् लोहान्[8] रत्नानि च मणींस्तथा[9] ।
प्रकाशमूषागर्भे च[10] ग्रसते वड़वानलः[11] ॥ २०१ ॥
माक्षिकं दरदञ्चैव गन्धकं च मनःशिला[12] ।

(1) पारदत्रितयं is the reading in D. (2) सदा खल्वे तु काञ्जिकम्, a variant in D. (3) पूर्वंनिगलोपेतं, an incomplete variant in D. (4) दशम्पङ्कलिकायोगात्, a variant in M. (5) D and My read शत-वेधी. The ślokas 198th and 199th are not found in B and K. (6) B has मूषागते चैव. D has मूखागतो नैव. M has ध्माते मूषागतेनैव. My has मूषाशतेनैव. All the texts seem to be incorrect. (7) B reads हठाग्निं. (8) K reads चैव. (9) D reads रत्नमणीजस्तथा. K and My read मणिस्तथा. M reads मणीन्तथा. (10) प्रकाशमूषया गर्भे, a variant in B. प्रकाशमूखाया गर्भौ, a variant in D. प्रकाशमुखगर्भे च, a variant in K. प्रकाशमूषामध्यगतो, a variant in M. प्रकाशमूषाया गर्भे, a variant in My. All the texts are more or less incorrect. (11) ग्रसते चतुरङ्गुलीमलः, a variant in D, which is senseless. My reads वध्वानिलः. (12) D has समं शिलाम्, which is incorrect.

राजावर्त्तं प्रवालं च कङ्कुष्ठं तुत्थकं[1] तथा ॥ २०२ ॥
पीतरक्तगणैर्भाव्यं कङ्गुणी[2]तैलमिश्रितम् ।
खोटं हण्डिकया पक्कं[3] द्रुतं हि नलिके क्षिपेत्[4] ॥ २०३ ॥
हण्डां तु सिकतां[5] दत्त्वा त्रिरात्रमपि धामयेत्[6] ॥ २०४ ॥
आरणालेन तत् खिन्नं[7] दोलायां धृतमेव च[8] ।
एवं संरञ्जितः[9] सूतः शरीरधनकृद्[10]भवेत् ॥ २०५ ॥
उद्घाटः परमः[11] प्रोक्तः सर्व्वकर्म्महितः परः[12] ।
क्षवी पतङ्गी[13] दुर्द्रावी दुर्मेली नैव जायते ।
वर्णान्यत्वञ्च कुरुते[14] स्फोटयेद्वरवर्णिनि[15] ॥ २०६ ॥

(1) D reads कुष्ठं तुथकं, which seems to be incorrect. (2) B reads कंगुणि. M reads कुङ्गुणी. My reads कंगुश्री. (3) M has भिख्डी. कलापकं, which seems to be incorrect. (4) द्रुतं हि नलिकां पचेत्, a variant in B. घृतं हि नलिकं क्षिपेत्, a variant in D. घृतं हि नलिका क्षिपेत्, a variant in K. द्रुतं ही नालिकां पचेत्, a variant in M. द्रुतं हि नलिकां पचेत्, a variant in My. (5) D reads क्षिकातां, which is incorrect. M reads भाण्डां तु सिकतां. (6) D and K read धारयेत्. (7) D reads तच्छिन्नं, which seems to be incorrect. (8) B reads डोलायां. M and My read डोलायां द्रुतमेव च. (9) B reads सुरंजितः. K reads संरञ्जितः. M reads स गदितः. My reads सलञ्चितः. (10) B reads शरीरदृढकृद. (11) M reads उत्खोटः. My reads उद्घाटः पंचमः. (12) B and K read परं. (13) M reads क्षिवी वतङ्गी. (14) D reads वन्य त्वचं प्रकुरुते, which appears to be incorrect. (15) स्फाटयेद्वरवर्णिनी, a variant in B. D reads वरवर्णिनी, which is incorrect. K has स्फोटवद्वरवर्णिनि. My has खोटयेद्वरवर्णिनि.

बन्धमेवं[1] द्रुतं कृत्वा कुरुते वज्रजारणम्[2] ।
तन्ममाचक्ष्व देवेशि किमन्यच्छ्रोतुमिच्छसि ॥ २०७ ॥

इति श्रीपार्व्वतीपरमेश्वरसंवादे[3]
रसार्णवे रससंहितायां
वज्रबन्धो नाम[4]
पञ्चदशः पटलः ॥ १५ ॥

(1) B reads बद्धमेवं. D and My read बद्धमेव. M reads बन्धमेतत्, which is grammatically incorrect. (2) कुरु वज्राणि जारणं, a variant in K. कुरि वस्त्राणि जारणम्, an incorrect variant in M. My reads कुरु वज्राणिजारणं. (3) B, M and My want this line. (4) D, M and My have पिष्टिस्तम्भनं नाम. K has पिष्टिस्तम्भमहारसोपरसलोहबंधो नाम.

षोड़शः पटलः ।

श्रीदेव्युवाच ।[1]

बद्धस्य[2] रसराजस्य[3] कथं द्रावणमीश्वर[4] ।
वज्रादिजारणं चापि[5] कथमाज्ञापय प्रभो ॥ १ ॥

श्रीभैरव उवाच ।[6]

तं खोटं सूक्ष्मचूर्णन्तु स्त्रीरजोभिस्तु भावयेत्[7] ॥ २ ॥
पुनर्नवा च[8] मीनाक्षी रम्भाकन्दः[9] स्त्रियोरजः ।
मणिमन्थं[10] शिलाधातुं सर्व्वमेकत्र पेषयेत्[11] ॥ ३ ॥
कल्केनानेन संक्षन्नमारोटरससंयुतम्[12] ।
तं रसं[13] भूर्ज्जपत्रे तु बद्ध्वा पोटलिकां[14] ततः ॥ ४ ॥
दोलायन्त्रे[15] सुरेशानि स्वेदयेद्दिवसत्रयम् ।
अनेन क्रमयोगेण मृतः सूतो[16] भवेद्द्रुतः[17] ॥ ५ ॥

(1) M has देव्युवाच. (2) B reads शुद्धस्य. (3) D reads रसवज्रस्य, which is incorrect. (4) B reads erroneously द्रावणमीश्वरि. (5) B and D read वापि. (6) This is wanting in D. (7) This hemistich is not found in D. (8) पुनर्नवौ द्वौ is the reading in B, M and My. (9) M reads रंभाकंदं. (10) B reads माणिमंथं. D reads मणिमयं. K reads मनिमंथं. M reads माणिवन्ध. My reads माह्रिमंडं. (11) M has मेलयेत्. (12) D reads संयुतः, which is incorrect. (13) D and K read तद्रसं. (14) M reads पोट्टलिकां. (15) B, M and My read डोलायन्त्रे. (16) B and D read मृतसूतौ. M reads द्रुतसूते, which is incorrect. (17) My reads erroneously भवेत् ध्रुवं.

आर्द्रकं मूलकं शुण्ठी लसुनं हिङ्गु माक्षिकम् ।
त्रिक्षारं पञ्चलवणं कांक्षी कासीसगन्धकम्[1] ।
अम्लवर्ग[2]समायुक्तं गोलकं कारयेत् प्रिये ॥ ६ ॥
तस्य मध्यगता पिष्टी[3] दोलायां स्वेदनेन तु[4] ।
द्रवते नात्र सन्देहो द्रुतं जारयते रसम्[5] ॥ ७ ॥
बद्धं महारसं[6] देवि द्रावयेत् पादयोगतः ।
द्रुतपादे ततो देयं[7] द्रावयित्वा पुनर्द्रवेत्[8] ॥ ८ ॥
एवं बद्धं द्रुतं कृत्वा समद्वित्रिगुणादिकम्[9] ।
तस्मिन् द्रुते जारणा च[10] कर्त्तव्या कर्म्मवेदिभिः ॥ ८ ॥
कुक्कुटीकन्दमार्जारी[11] उच्चटापीश्वरी तथा[12] ।

(1) कांशिकौशीसगन्धकम्, a variant in D. कांजीकौशीसगंधकं, a variant in K. काञ्चीमांसीसगन्धकम्, a variant in M. (2) B and My read क्षाम्लवर्ग. M reads वम्लवर्ग. (3) तस्य मध्यगतं पिष्टं, a variant in D. तस्य मध्ये गतां पिष्टिं, a variant in K. My has an incomplete charaṇa—तस्य ता पिष्टि. (4) D reads दोलायन्त्र स्वेदयेन्न तु, which is incorrect. डोलायां स्वादनेन तु, a variant in M, which is partly correct. My reads डोलायां. (5) D reads रसे. M reads रसः. Both are incorrect. (6) D reads महारसे, which is incorrect. We do not find the 8th, 9th and 10th ślokas in My. (7) द्रुतं पादस्ततो देयः, a variant in D. द्रुतपारदरोधाय, a variant in M. (8) M reads पुनर्द्रमेत्, which is incorrect. (9) K reads समं द्वित्रिगुणादिकम्. M reads समद्वित्रिगुणाधिकम्. (10) M reads चारणा च. (11) कर्कटीकन्दमार्जारी, a variant in D. कुकटीकंदयार्जारी, a variant in K. (12) सर्पाश्च मासरी तथा, a variant in D. सर्पाश्च मासरी तथा, a variant in K.

क्षीरकञ्चुकया युक्तं[1] स्वेदितं च द्रुतं[2] रसम् ॥ १० ॥
द्रुतं दोलादिसंभिन्नं[3] कुक्कुट्याद्यै[4]र्दिनत्रयम् ।
आर्द्रकाद्यैर्द्रुतञ्चैव[5] तत्सूतं स्वेद्यतां[6] व्रजेत् ॥ ११ ॥
वज्रं[7] द्रुतं यथा[8] सूतं जारयेत्[9] सुरवन्दिते ।
ईश्वरस्तस्य[10] विज्ञेयो देवदेवो[11] जगद्गुरुः[12] ॥ १२ ॥
विधाय खोटं यत्किञ्चित्[13] मृतकोत्थापिते रसे[14] ।
षड्गुणं हेम जार्य्यं तु सारयेत् सारणात्रयम्[15] ॥ १३ ॥
कोट्यंशेन[16] तु तेनैव शुल्ववेधं[17] प्रदापयेत् ।
जायते कनकं दिव्यं देवाभरणभूषणम् ॥ १४ ॥
पुनस्तत्तु[18] रसेन्द्रस्य वज्ररत्नानि जारयेत्[19] ।

(1) क्षीरं कञ्चुकया युक्तं, a variant in D. (2) सेवितं च द्रुतरसः, a variant in D. M reads मृतं. (3) D has दोलःसंसितं कर्कं. K has दोलादिसंमितं—, an incomplete charaṇa. M and My read डोलादिसम्भिन्नं. (4) B reads कक्रमाद्या. D reads कर्कटाद्यै. K reads कर्कटाद्यै. (5) B and K read आर्द्रकादि. D reads आर्द्रकादि घृते चैव, which seems to be incorrect. This charaṇa and the next nine ones are not found in My. (6) B and M read स्वच्छतां. D and K read स्वेदतां. (7) B and M read वङ्ग. (8) K reads यदा. (9) D reads पारदः, which seems to be incorrect. (10) M reads ईश्वरस्य तु. (11) M reads देवदेव्या. (12) D reads erroneously देवदेवात भवद्गुरुम्. (13) D reads तं पङ्क्तिं, which is incorrect. (14) मृतकोत्थापितो रसः, a variant in M. (15) B reads सारणात्रये. (16) D has वधास्तेन, which is senseless. (17) D reads शुल्वं वन्धं. (18) B has पुनस्तस्तु. D has पुनस्त. K has पुनस्तस्य. (19) D reads मारयेत्.

प्रकाशमूषागर्भे च हठाग्नौ जरते क्षणात्[1] ॥ १५ ॥
उच्चटा[2]मीननयना-सर्पाक्षी[3]रक्तचित्रकैः ।
एतैः रत्नं द्रवत्याशु[4] नीलमाणिक्यमौक्तिकम्[5] ॥ १६ ॥
विष्णुक्रान्ता च चक्राङ्का[6] कुमारी यवचिञ्चिका[7] ।
वज्राणि पद्मरागाश्च[8] राजावर्त्तादिसस्यकम्[9] ।
ओषधीनां द्रवं दत्त्वा तप्ते[10] सूते विनिक्षिपेत् ॥ १७ ॥
पश्चाद्रत्नानि देयानि द्रवन्ति सलिलं यथा ॥ १८ ॥
दोलायां[11] स्वेदयेद्देवि विड्योगेन[12] जारयेत् ।
प्रकाशमूषागर्भे च हठाग्नौ जारयेत् क्षणात् ॥ १९ ॥
शंखेनैवार्कदुग्धेन[13] पुटेन शतवापितम् ।
तद्बीजं[14] क्षारसंयुक्तमम्लवर्गेण[15] भावयेत्[16] ॥ २० ॥

(1) D and K read जायते क्रमात्. (2) D reads उच्चसं, which is incorrect. (3) D has साप्यांजी, which is unintelligible. K has सर्पाक्षि. (4) एते रत्नप्रवर्त्यासु, an incorrect variant in D. M reads द्रुवन्त्याशु, which is incorrect. (5) तिलमाणिक्यमौक्तिमं, a variant in K, which is not correct. (6) D reads वक्राङ्का. M reads चक्राङ्गी. (7) D has पञ्चिंचिका. (8) D and K read पद्मरागं च. (9) K reads सःस्यकां, which is incorrect. (10) D reads तप्ता. K reads तप्तः. (11) D reads दोलायन्त्रे, which destroys the metre. (12) D reads वीरयोगेन, which is incorrect. (13) K reads शनैर्वार्कदुग्धेन, which destroys the metre. (14) B reads तद्विड. D reads तद्विन्न. M reads तत्पिण्डी. (15) B and M read चाम्लवर्गेण. (16) B and M read भावितम्.

विड्हिङ्गुलसंयुक्त[1]-राजावर्त्तप्रबालकै:[2] ।
गन्धक: शिलया युक्त:[3] खोटानां जारणे हित:[4] ॥ २१ ॥
मूषालेपादिसंयोगात्[5] बद्धहेम्नो हि जारणम्[6] ।
तत्क्षेपाज्जायते देवि[7] विड्योगेन जारणम्[8] ॥ २२ ॥
पश्चाद्धेम प्रदातव्यं षट्त्रिंशांशद्रवेण च[9] ॥ २३ ॥
ततो वै सूतराजस्य जायते रश्मिमण्डलम्[10] ।
तिर्य्यगूर्द्ध्वमधोव्यापि[11]तेज:पुञ्जेन पूरितम् ॥ २४ ॥
इत्थं शुद्धो भवेत् सूत:[12] चिन्तामणिरिव[13] स्वयम् ।
सद्देवै: पूज्यते सिद्धै:[14] द्वितीय इव शङ्कर:[15] ॥ २५ ॥

(1) विड्हिङ्गुकसंयुक्तं, a variant in M. (2) राजावर्त्तं प्रबालकैः, a variant in D. राजावर्त्तं प्रबालकम्, a variant in M. (3) गन्धकैमशिला-युक्तैः, a variant in D, which is senseless. M reads गन्धकं शिलया युक्तं. (4) D and K read हितं. M reads खोट्टानां जारणे हितम्. (5) D and K read मूखालिपो हि संयोगात्. M reads मूषालेपाभिसंयुक्तं. (6) B has बद्धो हेमाद्धिजारणं. D has बद्धो हेम्ना हि जारणम्. K has बद्धो हेमादिजारणं. M has बद्धहेमाभिजारणम्. (7) B reads तद्क्षेपाज्जारते देवि. D reads तत्तपाजारयेद्दे वि. K reads तत्तोपा जारये देवि. (8) B, D and K read विड्-योगेन जारयेत्. M reads विड्हेमाभिजारणम्. (9) K reads षट्त्रिंशाषङ्गवेन च, which is incorrect. (10) जार्यते रश्मिमंडले, a variant in B. जारयेद्रश्मिमण्डले, a variant in D. जार्यते रश्मिमंडलं, a variant in K. (11) B and K read वापि, which seems to be inaccurate. (12) B reads इत्यष्ट भवेत् सूत:. D reads इयं था भवेत् सूत:. K reads इत्थं यथा भवेत् सूत:. M reads शुद्धं यथा भवेत् सूतं. (13) K reads चित्तमणिरिव, which is not correct. (14) D and K read सर्वदेवैः प्रपूर्ज्यन्ते, which is incorrect. (15) K reads सिद्धैर्द्वितीयशंकर:.

लोकानुग्रहकर्त्ता च भुक्तिमुक्तिप्रदायक: ।
जारयेच्च महानीलं तत्त्वसंख्याक्रमेण[1] तु ॥ २६ ॥
भ्रमते दक्षिणावर्त्तस्तदासौ खेचरो रस:[2] ।
वेधयेत् सर्व्वलोहानि भारसंख्यानि[3] पार्व्वति ॥ २७ ॥
एवं जीर्णस्य सूतस्य शृणु कापालिरञ्जनम् ॥ २८ ॥[4]
शुल्वपत्रपलैकं तु[5] पलार्द्धं[6] गन्धकस्य च ।
टङ्कणं कर्षमेकं तु कर्षैकां रसकज्जलीम्[7] ॥ २९ ॥
माक्षिकं[8] कर्षमेकं तु सर्व्वमेकत्र कारयेत्[9] ।
अन्धमूषागतं ध्मातं खोटो[10] भवति तत्क्षणात् ॥ ३० ॥
तं खोटं सूक्ष्मचूर्णन्तु चणकाम्लेन[11] मर्द्दयेत् ।
आरण्य[12]गोमयेनैव पुटान्[13] दद्याच्चतुर्द्दश ॥ ३१ ॥
इन्द्रगोपकसंकाशं जायते नात्र संशय: ॥ ३२ ॥
तच्चूर्णं मधुना युक्तं शुद्धतारं तु रञ्जयेत् ।

(1) D reads तत: संख्याक्रमेण. (2) सदासौ खेचरगो रस:, a variant in B. सूदासन्नो खेचरो रस:, a variant in M, which is incorrect. (3) M reads हारसंख्यानि, which is incorrect. (4) After this hemistich we find in B अत: परं प्रवक्ष्यामि शृणु कापालिरंजनं ; in D अत: परं कलापालमी ; in K अत: परं कपालिनि. (5) D has शुल्वपत्रकपौकं तु, which is incorrect. K has शुल्वपत्रं पलैकं तु. (6) B reads पलैकं. (7) कर्षैकं रसकज्जलीं, a variant in B. कर्षैकं रसकज्जलं, a variant in D. कर्षैका रस-कज्जली, a variant in M. (8) B reads माक्षीकं. (9) M reads मर्दयेत्. (10) M reads खोट्टो. (11) B and K read दनुजाम्लेन. M reads लिकुचाम्लेन. (12) D reads अरण्य. (13) B, K and M read पुटं.

रञ्जयेत् त्रीणि वाराणि[1] शोभनं हेम जायते[2] ॥ ३३ ॥
एष कापालिको योगः सर्व्वलोहानि रञ्जयेत् ।
रञ्जयेद्बद्धसूतं च[3] वज्रबन्धञ्च[4] रञ्जयेत् ॥ ३४ ॥
आरचूर्णपलैकं वा[5] मृतनागपलं तु वा[6] ।
वङ्गाभ्रकपलैकं वा[7] तीक्ष्णचूर्णपलं तु वा[8] ॥ ३५ ॥
त्रिशुल्वं नागवङ्गौ वा[9] एकैकांशसमन्वितम्[10] ।
त्रिशुल्वं गैरिकैकैक[11]मथवा तीक्ष्णमाक्षिकम् ॥ ३६ ॥
अथवा तीक्ष्णभागौ द्वौ त्रयो घोषा नवोरगाः[12] ।
ताम्रस्य नव भागाः स्युरारभागचतुष्टयम्[13] ॥ ३७ ॥
अथवा देवदेवेशि माक्षिकस्य पलद्वयम् ।
मयूरग्रीवतुत्थैकं[14] मृतनागपलं तथा ॥ ३८ ॥

---

(1) त्रीणि वाराणि is grammatically incorrect. This hemistich and the next one are not found in D. (2) K reads जारयेत्, which is not correct. (3) M reads रंजयेद्वद्धसूतेन. (4) D and M read वज्रवद्ध च. (5) D reads च. आरचूर्णं पलैकञ्च, a variant in K. M reads तु. (6) मृतनागं पलं तु च, a variant in D. K reads च. (7) D reads तु. वंगाभ्रकं पलैकं च, a variant in K. (8) B reads च वा. D reads तीक्ष्णचूर्णं ये तु वा, which is incorrect. तीक्ष्णचूर्णं पलं तु वा, a variant in K. (9) M has नागवङ्ग वा. (10) D reads समन्वितः. K reads एकैकं तु समन्वितं. (11) त्रिशूलं गैरकं चैव, a variant in D. त्रिशुल्वं गैरिकैकं वा, a variant in M. (12) D reads त्रयो दोषा. M reads नवोरताः. Both are incorrect. (13) D has तारभागाश्चतुष्टयम्. K has तारभागचतुष्टयं. (14) K reads मयूरग्रीवं तत्थैव, which is incorrect. This hemistich and the next two are not found in M.

अथवा वङ्गनागांशमेकैकं सुरवन्दिते[1] ।
तीक्ष्णद्वयं त्रिशुल्वं च हेमताप्यचतुष्टयम्[2] ॥ ३९ ॥
यद्वा[3] विमलवैक्रान्तवङ्गनागानि रीतिका[4] ।
सशुल्वाप्यथवा[5] हेम विमलं च भुजङ्गमः ॥ ४० ॥
एषामन्यतमं देवि पूर्व्वकल्पसमन्वितम् ।
अन्धमूषागतं[6] ध्मातं खोटो[7] भवति तत्क्षणात् ॥ ४१ ॥
पुटयेत् पूर्व्वयोगेन रञ्जयेत् पूर्व्वयोगतः ॥ ४२ ॥
नागशुल्वं[8] तथा तीक्ष्णं कापालिक्रम[9]मुत्तमम् ।
तेनैव रञ्जयेत्तारं सप्तवारं पुनः पुनः ॥ ४३ ॥
तेनैव रञ्जयेद्धेम सप्तवारं पुनः पुनः ।
पक्वबीजमिदं[10] श्रेष्ठं सर्व्वकर्म्मसु[11] योजयेत् ॥ ४४ ॥
वङ्गतीक्ष्णं कपाली च[12] शुल्वं तारं तु रञ्जयेत्[13] ।
रञ्जयेत् सर्व्वलोहानि यावत् कुङ्कुमसन्निभम् ॥ ४५ ॥

---

(1) D reads सुरसुन्दरि. (2) This charaṇa and the next two are not found in K. (3) B reads तारं. (4) विमलवैक्रान्तं वङ्गनागास्तृतीयकाः, a variant in D. (5) B reads सप्तशुल्वाथवा. M reads सशुल्वास्वथवा. (6) D and K read अंधमूखागतं, which is not correct. (7) M reads खोट्टो. (8) B reads नागं शुल्वं. (9) K reads erroneously कायाक्रम. M reads कापालीक्रम. (10) M reads सत्वबीजमिदं. (11) B and K read सर्वकर्मणि. D reads सर्वकर्माणि. (12) वंगतीक्ष्णकपाली तु, a variant in B. वङ्गं तीक्ष्णं कपालिं च, a variant in D. वंकं तीक्ष्णाभ्रकं वाली तु, a variant in M. (13) D has शुल्वतारं तु योजयेत्. M reads शुद्धतारं तु रञ्जयेत्.

वैक्रान्तं नागकापाली[1] शुद्धतारं तु रञ्जयेत्[2] ।
रञ्जयेत् सह हेम्ना तु[3] भवेत्[4] कुङ्कुमसन्निभम् ॥ ४६ ॥
रक्ततैल[5]निषिक्तं तु लोह[6]संक्रान्तिनाशनम् ।
आरकापालिचूर्णन्तु शुद्धतारं तु रञ्जयेत्[7] ॥ ४७ ॥
विमलेन च नागेन[8] कापाली परमेश्वरी ।
रञ्जयेत् सर्व्वलोहानि तारं हेम विशेषतः ॥ ४८ ॥
रञ्जयेत् त्रीणि वाराणि[9] जायते हेम शोभनम् ।
तेनैव रञ्जयेद्धेम[10] सप्तवारं पुनः पुनः ॥ ४९ ॥
लवणोद[11]निषिक्तन्तु लोहसंक्रान्तिनाशनम् ।
वङ्गनागं[12] तथा कान्तं शुल्वं तीक्ष्णं च माक्षिकम्[13] ॥५०॥
रविनागं कपाली तु[14] शुद्धतारन्तु रञ्जयेत् ।
रञ्जयेत् त्रीणि वाराणि[15] तारारिष्टं तु जायते ।
तेनैव रञ्जयेद्धेम[16] सप्तवाराणि[17] पार्व्वति ॥ ५१ ॥

---

(1) This hemistich and the next one are not found in B. D reads नागकापालिं. M reads नागकापालं. (2) D has योजयेत्, which seems to be incorrect. (3) M reads सितहेमन्तु. (4) K reads यावत्. (5) D has रक्ततैले. (6) D reads लोहं. (7) This hemistich is not found in D and M. (8) विमूलेन च भागेन, an incorrect variant in D. (9) This is grammatically incorrect, yet found in all the texts. (10) तथा वैद्धकरीहेम, an incorrect variant in B. (11) B reads लवणांद्व. (12) B reads वंगं नागं. (13) कान्ताङ्गली तीक्ष्णमाक्षिकम्, a variant in D. (14) रविं नागकपालिं च, a variant in D. (15) This is grammatically incorrect. (16) B reads जायते हेम. (17) This is grammatically incorrect.

रक्तवर्गनिषिक्तं च लोहसंक्रान्तिनाशनम् ।
वङ्गनागं[1] तथा शुल्वं कापाली[2] सुरवन्दिते ॥ ५२ ॥
गुड़ेन नीलकाचेन[3] तुल्याम्ललवणेन च ।
विषपित्ताम्ल[4]पिष्टेन हन्यात् संक्रान्तिकालिकाम् ॥ ५३ ॥
गैरिकं गन्धकं सूतं तिलतैलेन पेषयेत् ।[5]
लेपयेत्तारपत्राणि दत्त्वा शुल्वकपालिकाम् ॥ ५४ ॥
ऊर्द्धाधस्त्वन्धमूषायां[6] शुभ्रं[7] हेमदलं भवेत् ॥ ५५ ॥
भागैकं हरितालस्य भागैकं गैरिकस्य च[8] ।
माक्षिक[9]कल्कभागैकं चत्वारो गोलकस्य च ।
अन्धमूषागतं ध्मातं हेम रञ्जयति क्षणात् ॥ ५६ ॥
अनेन क्रमयोगेण चतुर्वारं तु रञ्जयेत् ।
पक्वबीजमिदं श्रेष्ठं बालार्कसदृशप्रभम् ॥ ५७ ॥
तेन वर्णद्वयोत्कर्षः षोड़शांशेन जायते ॥ ५८ ॥
रक्ततैले निषिक्तं च लोहसंक्रान्तिनाशनम् ।

---

(1) D and K read वङ्गं नागं. (2) D reads कपालि, which is incorrect. (3) गुडेन पीतकचैव, a variant in B. गुलेन तिलकाचेन, a variant in K. विडे च गणे वडकाचेन, an incorrect variant in M. (4) B reads विषसिद्धार्थे. This hemistich and the next one are not found in D. (5) Here ends the MS. M. in the middle part of the 16th Paṭala. (6) ऊर्द्धाधश्चांधमूत्रायां, a variant in B. D and K read मूखायां, which is incorrect. (7) K reads छभं, which is incorrect. (8) B has an incomplete charaṇa—भा गैरिकस्य च. (9) B and K read माक्षिकं.

रसकस्य तु कापाली[1] चन्द्रार्कं तु शतांशत:[2] ।
अन्धमूषागतं ध्मातं शोभनं हेम जायते ॥ ५९ ॥
शुद्धनागपलैकं तु कर्षैकं द्रुतसूतकम्[3] ।
सारयेत् सारणायन्त्रे खोटो भवति सूतक: ॥ ६० ॥
खोटस्य पलमेकं तु माक्षिकस्य पलं तथा ।
एकीकृत्याथ संमर्द्य कनकस्य रसेन च ।
पाचयेन्मृन्मये पात्रे[4] भवेत् कुङ्कुमसन्निभम्[5] ॥ ६१ ॥
पूर्व्वकल्केन संयुक्तं खोटं कुर्वीत पूर्व्वत:[6] ।
एतत् कापालिकायोगात्[7] चूर्णमम्लेन[8] मर्द्दयेत् ॥ ६२ ॥
पुटयेत् पूर्व्वयोगेन रञ्जयेत् पूर्व्वयोगत: ॥ ६३ ॥
येन केन[9] रसं बद्ध्वा हेमगन्धशिलोरगै: ।
क्रमेण वेष्टितं ध्मातं शतवाराणि[10] वेधयेत् ॥ ६४ ॥
आदौ[11] तु बद्धसूतं च वङ्गं[12] तारं मन:शिला ।
क्रमेण वेष्टयेत् ध्मातं शतवेधी न संशय: ॥ ६५ ॥

---

(1) B reads कपाली. K reads कापालि. (2) D reads शतांशयो:. K reads शताशतं. (3) This charaṇa and the next one are not found in K. (4) B reads भांडि. (5) भवेत कंकसंनिभं, a variant in B. (6) B reads पूर्ववत्. (7) एतत् कापालिकं चूर्णं, a variant in B. D reads कपालिकायोगात्. (8) B reads मध्यमाम्लेन. (9) K reads सोनकेन, which is an error of the scribe. (10) B reads दशवाराणि. D reads शतं वाराणि. (11) This hemistich and the next two are not found in D. K reads आपौ, which is incorrect. (12) K reads वंद, which is incorrect.

अनेन कुरुते तारं कनकेन तु काञ्चनम् ॥ ६६ ॥
सूतो मृतो हन्ति समेन वङ्गं[1]
तेनैव हन्यात्[2] द्विगुणं च तारम्[3] ।
तारं चतु:षष्टिरविं करोति
हेमापि तद्वत् फणिहेमयोगात्[4] ॥ ६७ ॥
मृतरसपलमेकं[5] पञ्चनागं च दद्यात्
कनकपलविमिश्रं[6] ध्मातसूतावशेषम्[7] ।
पुनरपि शतवारानेवमेव[8] क्रमेण
भवति च[9] रसराज: कोटिवेधी क्रमेण ॥ ६८ ॥
मृतसूतपलैकं तु[10] द्वे पले[11] दरदस्य च ।
चतु:पलं गन्धकस्य कङ्कुष्ठस्य[12] पलत्रयम् ।
शिलाया: पञ्चकं चैव गोपित्तेन तु मर्द्दयेत् ॥ ६९ ॥

---

(1) D has an absurd charaṇa—आयो चतुर्थं सूतेन मृतं हेति समेन तं वङ्गं. (2) B reads वंगं. (3) तेनैव गावह्नि गुड़ं च तारं, an incorrect variant in D. (4) K has शंखेंदुकुंदमतौनं मनोहरं हेम गोपात्, which is absurd. (5) D wants पल ; hence it reads मृतरसमेकं, which mars the metre as well as the sense. (6) B reads कनकपलं विमिश्रं, which destroys the metre as well as the grammar and sense. (7) D reads ध्मातं सूतावशेषं, which mars the metre. (8) शतवारान्निष्कमेकं, a variant in D. शतवारं निष्कमेव, a variant in K. (9) D has only भवति, which makes the charaṇa an incomplete one. K reads स भवति. (10) D has मृतसूतं पलैकं तु. (11) D reads द्विपलं. K reads पलैकं. (12) B reads कुंकुमस्य.

पलैकनागपत्राणि[1] तेन कल्केन[2] लेपयेत् ।
मारयेत् पुटयोगेन नागोऽयं म्रियते[3] क्षणात् ॥ ७० ॥
वटिकां कारयेत्पश्चात् षष्टिं त्रीणि शतानि च ।
एकैकां वटिकां पश्चाद्गोपित्तेन तु मर्द्दयेत् ॥ ७१ ॥
अनेन क्रमयोगेण शतं दद्यात् पुटानि च[4] ।
नागोऽयं जायते देवि सिन्दूरारुणसन्निभः[5] ॥ ७२ ॥
शतांशेन च तेनैव[6] तारे वेधं[7] प्रदापयेत् ।
तत्तारं जायते देवि देवाभरणमुत्तमम्[8] ॥ ७३ ॥
मृतनागपलैकं तु[9] हेमपत्रं तु तत्समम् ।
मारयेत् पुटयोगेन म्रियते हेम[10] तत्क्षणात् ॥ ७४ ॥
तद्भस्मनागैकयुतं[11] हेमपत्रं तु तत्समम् ।
मारयेत् पुटयोगेन म्रियते हेम तत्क्षणात् ॥ ७५ ॥
अनेन क्रमयोगेण त्रीणि वाराणि[12] कारयेत् ।
सहस्रांशेन तेनैव तारे वेधं[13] प्रदापयेत् ॥ ७६ ॥

(1) This hemistich and the next one are put in B after the 71st śloka. पलैकं नागपत्राणि, a variant in K. (2) D has तिलकल्केन. (3) D reads म्रयते, which is grammatically incorrect. (4) शतं दद्यात् पुटं प्रिये, a variant in B. (5) B reads सप्रभः. K reads संप्रभः. (6) D reads तैलेन. (7) D reads तारवेधं. (8) B reads देवाभरणभूषणं. This hemistich is not found in D. (9) मृतनागं पलैकन्तु, a variant in D. (10) D reads देवि, which is not accurate. K reads म्रीयते, which is incorrect. (11) तद्भस्मभागैकयुतं, a variant in B. D and K read युक्तं. (12) This is grammatically incorrect. (13) D reads तारवेधं.

सुखसाध्यप्रयोगेन[1] तत्तारं कनकं भवेत् ।
कल्कवेधमतो वक्ष्ये[2] सुखसाध्यं सुरेश्वरि ॥ ७७ ॥
पलाशनिम्बविल्वाक्ष-कार्पासकटुतुम्बिनी ।
काङ्गुणीकटुतैलं च[3] एकैकं रसमारकम्[4] ॥ ७८ ॥
समे हेम्नि समं सूतं[5] तारं ताम्रमथापि वा[6] ।
महारसाष्टमध्ये तु चत्वारोपरसास्तथा[7] ॥ ७९ ॥
फलाम्लकाञ्जिकैर्मध्य[8]-निरङ्गारे तु[9] खल्लयेत् ।
तप्तायसेऽथवा लोह[10]-मुष्टिना मृदुवह्निना ॥ ८० ॥
प्रागुक्त[11]बालुकायन्त्रे तैलं दत्त्वा विचक्षणः ।
मर्द्दयेत् पक्षमेकं तु[12] दिवारात्रमतन्द्रितः ॥ ८१ ॥
तत्कल्कं जायते श्रेष्ठं धर्म्मकामार्थमोक्षदम् ।
वेधयेदष्टलोहानि देवानामपि दुर्लभम् ॥ ८२ ॥
नाशयेत् सकलान् रोगान् पलैकेन न संशयः ।
त्रिकटुत्रिफलायुक्तं मध्वाज्येन तु भक्षयेत् ॥ ८३ ॥

(1) This charaṇa is wanting in B. This hemistich is not found in D. (2) B reads ततो वक्ष्ये. D reads कल्के वेधमतो. K reads कल्कवद्धमतो लक्ष्ये, which is incorrect. (3) कंगुणी कटुजं तैल, a variant in D. (4) B reads रसमारणं. (5) B has समे सूतं, which is incorrect. (6) तारं ताम्रं तथापि वा, a variant in D. (7) चत्वार उपरसास्तथा is the correct grammatical form. (8) B reads फलाम्लं कांजिकैर्मध्वा. D reads मृद्धा, which seems to be incorrect. (9) B has निरङ्गारे तु. D has निरणं धे तु, which is unintelligible. (10) तथादायसेऽथवा लोहि, a variant in D. (11) D reads प्रयुक्त. (12) B reads च.

हेम्ना तु बद्धं गुञ्जैकं[1] तारेण द्वे[2] सुरेश्वरि ।
ताम्रेण गुञ्जात्रितयं[3] वर्षात् स्यादजरामरः ॥ ८४ ॥
सेवन्ते चन्द्रवदनाः सर्व्वाभरणभूषिताः ।
त्रिफलावीजमध्वाज्यं नस्यं कृत्वा निशासु च[4] ॥ ८५ ॥
रसं तु[5] भक्षयेत् प्रातरजीर्णं नैव जायते ।
गन्धकं पानमालेपं[6] कङ्कुष्ठं भक्षयेद्बुधः ॥ ८६ ॥
पलेन[7] भक्षयेत् सूतं सुरासुरनमस्कृतम्[8] ।
तप्तहेमनिभाकारो बालार्कसदृशप्रभः ॥ ८७ ॥
वेधयेत् सर्व्वलोहानि छेदे दाहे[9] न संशयः ।
बद्धा तु संकलाबन्धै[10]र्वटिका[11] खेचरी भवेत् ॥ ८८ ॥
काकजङ्घा च बृहती शरपुङ्खाजभृङ्गिके[12] ।
शिवा[13] शक्रलता[14] कन्या सप्तैतास्तु[15] महालताः ॥ ८९ ॥

(1) हेम्नस्तु पलगुञ्जैकं, a variant in D. K reads फलगुंजैकं. (2) D reads तारेणार्धें. K reads तारेणाद्धं. (3) D has गुञ्जात्रितये. (4) निशात्पुनः is the incorrect reading in D. (5) K reads एणं तु, which is incorrect. (6) गन्धकेनाथ मालेपं, a variant in D. (7) K reads अनेन. (8) K has an incomplete charaṇa—सुसनमस्कृत्य. (9) D reads छेद्दाहे. This hemistich is not found in K. (10) B reads बद्धस्तु, which is incorrect. बद्धा कशिकलावेधैः, a variant in D. बद्धास्तु संकलावुधैः, a variant in K. (11) B reads घुटिका. (12) मुसितपुंखाचभंगिके, a variant in B. शरपुङ्खाजभृङ्गिका, a variant in D. सुसुपुंखाजभ्रंगिका, a variant in K. (13) B has शिखा. D has शिवं. K has शिव, which seems to be incorrect. (14) B reads शर्कलता. D reads शत्रुलतां, which is incorrect. (15) सप्तैति तु महावलाः, a variant in B. सप्तैते तु महालता, a variant in D. समेतास्तु महालताः, a variant in K.

गुञ्जावृद्ध्या समाख्यातं वातारिस्नेहसंयुतम् ।
समे हेम्नि समं सूतं[1] तारे ताम्रेऽथवा प्रिये ॥ ९० ॥
महारसाष्टमध्यैकं दद्यात्तूपरसांस्तथा[2] ।
मर्द्दयेत् खल्लपाषाणे[3] यावन्निश्चेतनं भवेत् ॥ ९१ ॥
स्वेदयेदारणालेन[4] मर्द्दयेत् पूर्व्वकल्कवत् ।
तच्च लोहस्य देहस्य तत्तत्कर्म्मसु[5] योजयेत् ॥ ९२ ॥
हेमाभ्रकस्य चैकैकं सूतकस्य द्वयं तथा[6] ।
ताराभ्रकस्य चैकैकं सूतकस्य द्वयं तथा[7] ॥ ९३ ॥
पिष्टिकां कारयेत्तेन निगलेन च बन्धयेत् ।
पुटेषु पिष्टिकाबन्धो[8] गोलेन निगलेन च[9] ॥ ९४ ॥
पुनरन्यं प्रवक्ष्यामि चूर्णबन्धं सुरेश्वरि[10] ॥ ९५ ॥
पिष्टिकां[11] टङ्कणं दत्त्वा द्विपदीरस[12]मर्द्दितम् ।
नष्टपिष्टं च शुष्कं तत्[13] धामयित्वा पुटे[14] पचेत् ॥ ९६ ॥

(1) B reads समे सूते. (2) दद्यादुपरसांस्तथा, a variant in B. (3) D reads खलु पाषाणे. (4) D and K read स्वेदयेदारुणालेन. (5) B reads तत्र कर्मसु. D reads ततः कर्मसु. (6) D reads सूतकस्याद्रसं तथा, which seems to be incorrect. (7) This hemistich is not found in D. K reads सूतकं द्वितयं तथा. (8) All the texts have पिष्टिकाबद्धो, which seems to be incorrect. (9) B reads वा. After this we find the following in B only—इति पिष्टिकाबंधः । (10) D has चूर्णबद्धं सुरेश्वरी, which is incorrect. (11) B reads पीठिकां. (12) B has द्विपदीरज. (13) नष्टं पिष्टं च शुष्कं तत्, a variant in B. नष्टं पिष्टं च शुष्कं च, a variant in D. (14) B reads रंभ्रयित्वा पुटे. D and K read पुटं.

वेष्टयेद्देवदेवेशि गोलेन निगलेन च[1] ।
तुषकर्षाग्निना भूमौ मृदुस्वेदं तु कारयेत् ॥ ९७ ॥
अहोरात्रं चिरात्रं वा चूर्णं भवति शोभनम् ।
बद्धसंकलिकाभावात्[2] भवेद्वेधा तु वेधकम्[3] ॥ ९८ ॥
पुनरन्यं प्रवक्ष्यामि पट्टबन्धं[4] सुदुर्लभम् ॥ ९९ ॥
कासीसं[5] टङ्कणं क्षारं सैन्धवं गन्धमभ्रकम्[6] ।
सूतकं[7] मातुलुङ्गेन मर्द्दितं पुटवेधकम्[8] ॥ १०० ॥
वङ्गताराभ्ररसक[9]-स्नुक्क्षीरकृतगोलकम्[10] ।
वेष्टयेद्भूर्ज्जपत्रेण वस्त्रसूत्रेण[11] वेष्टयेत् ॥ १०१ ॥
ऊर्द्ध्वाधो[12] गोमयं दत्त्वा भूमध्ये स्वेदयेत्ततः ।
मर्द्दनं स्वेदनं कुर्य्यात्त्रिवारानेवमेव च[13] ॥ १०२ ॥
लेपयेद्देशधर्म्माच्च[14] मर्द्दयेद्गुड़काञ्जिकैः ।
धत्तूररसलिप्तायां मूषायां[15] संनिवेशयेत् ॥ १०३ ॥

(1) B reads वा. (2) B reads योगात्. (3) After this we find in K only the following incomplete śloka :—गंधताराभ्रसंयुक्तं स्नुहीक्षीरेण तालकं । वेष्टयेत् भूर्जपत्रेण..., which is found afterwards in B and D. (4) K reads पटबंधं. (5) D and K read कौशीसं. (6) D reads गन्धमात्रकम्, which seems to be incorrect. (7) D wants सूतकं. (8) तस्य द्वे पुनर्वेधकम्, an absurd variant in D. K reads पटवंधकं. (9) D and K read वंगताराभ्रसंयुक्तं. (10) D and K read स्नुहीक्षीरेण तालकम्. (11) D reads वस्त्रं सूत्रेण. (12) D reads ऊर्ध्वं, which renders the charaṇa incomplete. (13) त्रीणि वाराणि सुन्दरि, a variant in D. त्रिणि वारांस्तथैव च, an incorrect variant in K. (14) D reads द्दशधर्माच्च. K wants this. (15) B wants this.

बद्ध्वा मूषामुखं[1] देवि सन्धिलेपं तु कारयेत् ।
लोणमध्ये क्षिपेन्मूषां ब्रहन्मूषां च[2] वाह्यतः ॥ १०४ ॥
मुखं तस्याश्च मूषाया बद्ध्वा लोणमृदा ततः ।
तुषकर्षाग्निना भूमौ मृदुस्वेदं तु[3] कारयेत् ॥ १०५ ॥
अहोरात्रं त्रिरात्रं वा चित्रधर्म्मा भवन्ति ते[4] ।
अनेनैव प्रकारेण सप्तवारं[5] तु कारयेत् ॥ १०६ ॥
अन्तर्वहिश्च बद्धास्ते[6] धर्म्मशुद्धा भवन्ति ते ॥ १०७ ॥
गन्धकेन हतं सूतं कांक्षीकासीससैन्धवम्[7] ।
स्नुह्यर्कं टङ्कणं गुञ्जा रविक्षीरेण मर्द्दिताः[8] ।
पुराणका भवन्त्याशु[9] धर्म्मकामार्थमोक्षदाः ॥ १०८ ॥
पञ्चभागं तु शुल्वस्य द्विभागं कुञ्जरस्य च ।
कारयेद्दलधर्म्मांश्च[10] लेपयेत् पूर्व्वयोगतः ॥ १०९ ॥
रसेन्द्रो रञ्जति[11] ह्येवं कर्त्तव्यं सारणादिकम् ।
तन्ममाचक्ष्व देवेशि किमन्यच्छ्रोतुमिच्छसि ॥ ११० ॥

(1) D reads मूखागतं, which is incorrect. (2) K reads ब्रहन्मूखा च, which is incorrect. (3) D reads च. (4) B reads तु. D reads त्रिलधर्मा भवन्ति ते. K reads चित्रधर्मा भवंति हि. (5) D has वारं वारं. (6) B reads विद्धास्ते. D reads वध्वाने, which is incorrect. (7) D and K have कांजिकौशीशसैंधवं. (8) D and K read मर्दयेत्, which seems to be improper here. (9) पुराणार्कभयोस्यासु, a variant in D. पुराणका भयोत्यासु, a variant in K. Both seem to be incorrect. (10) कारयेद्दलधर्मांश, a variant in D and K. (11) B reads रंजते. K reads रंजिते, which is incorrect.

इति श्रीपार्व्वतीपरमेश्वरसंवादे[1]
रसार्णवे रससंहितायां
रसरञ्जनो नाम[2]
षोड़शः पटलः ॥ १६ ॥

---

(1) B wants this portion. (2) B and D read रञ्जनो नाम. In the beginning of this Paṭala, the Goddess asks the द्रावण of रस to be explained and not रञ्जन; the latter being the final subject.

सप्तदशः पटलः ।

श्रीदेव्युवाच ।

द्रावणं रञ्जनं चैव पारदस्य श्रुतं मया ।
सारणं क्रामणं चैव क्रमादाख्यातुमर्हसि[1] ॥ १ ॥

श्रीभैरव उवाच ।

मूषां तु गोस्तनीं कृत्वा धत्तूरकुसुमाकृतिम्[2] ।
तदर्द्धं[3] पूरयेत्तैलं रञ्जितं च रसं क्षिपेत् ॥ २ ॥
तुषकर्षाग्निना वाह्ये मूषायास्तु[4] प्रदापयेत् ।
विंशांश[5]नागसंयुक्तं समावर्त्तं च खोटकम् ।
दीर्घसंदंशनेनैव[6] प्रक्षिपेत् सारितं भवेत् ॥ ३ ॥
द्विगुणेन ततो[7] हेम्ना जायते प्रतिसारितम् ।
ततस्त्रिगुणहेम्ना तु[8] जायते चानुसारितम्[9] ॥ ४ ॥

---

(1) D has an incorrect variant क्रमवस्तुमर्हसि. (2) D and K have धत्तूरकुसुमाकृतिः, which is grammatically incorrect. (3) All the texts read तस्यार्धं, which is grammatically incorrect. D has an incorrect variant—तस्यर्धं तैले पचैलं. (4) B reads मूषायां तु. D and K read मूखायास्तु, which is incorrect. (5) D reads विंशांशं. (6) B has दीर्घं संदर्शनं नैव. D and K have दीर्घसंदर्शनेनैव. (7) D reads हतो, which is not correct. (8) B reads ततस्त्रिगुणं हेम्ना तु. This hemistich and the next two are not found in D. K reads ततस्त्रीगुण हेम्ना तु, which is incorrect. (9) B has चानुसारणा. K has नातुसारितः, which is incorrect.

जारयेद्विड़योगेन[1] प्राग्वच्चाथ पुनः पुनः ।
अनेन विधिना देवि भवेद्वेधा तु[2] वेधकः ॥ ५ ॥
भूलताशोणितशिला[3]-विषटङ्कणपारदम् ।
ताप्यं स्त्रीस्तन्यसंपिष्टं क्रामणं क्षेपलेपयोः[4] ॥ ६ ॥
इन्द्रगोपो[5] विषं कान्तं दरदं[6] रुधिरं तथा ।
रसकं तिलतैलं च क्रामणं क्षेपलेपयोः ॥ ७ ॥
भूलता माक्षिक[7]शिला-टङ्कणं रुधिरं विषम् ।
काकविष्ठा स्तनक्षीरं[8] महिषीकर्णयोर्मलः[9] ।
रामठं च महेशानि क्रामणं क्षेपलेपयोः[10] ॥ ८ ॥
भूलता लाङ्गली शृङ्गी काकविष्ठा च शैलजम् ।
विष्णुक्रान्ता मधूच्छिष्टं[11] रुधिरं द्विपदीरजः ॥ ९ ॥
सुरसा ब्रह्मसोमा च गृध्रकर्णी च लक्षणा[12] ।
कर्णगं महिषस्यापि[13] क्रामणं क्षेपलेपयोः ॥ १० ॥

(1) ज्वालयेद्विजयोगेन, a variant in K, which seems to be incorrect. (2) B reads नु. (3) D reads शोणितं शिला. K reads शोणितः शिला. (4) D and K have क्षेपलिपयेत्, which is incorrect. (5) D reads इद्रं गोप, which is incorrect. (6) K reads सुंदरं. (7) D reads माक्षिकं. (8) D reads स्तन्यक्षीरं, which mars the metre. (9) महिषीकर्णजं मलं, a variant in D. (10) K reads erroneously क्षेपलेपयेत्. (11) भूलतावीशकांतं च, an incorrect variant in B. (12) गृध्रचर्मा विलक्षणः, a variant in D. गृध्रचर्मं च लक्षणा, a variant in K. (13) कर्णस्तीनाहिसस्यापि, a variant in B. कर्णागरागहिशस्यापि, a variant in D. कर्णगंधहिशास्यापि, a variant in K. The sense of all of them is not clear.

गण्डोल[1]विषभेकास्य-महिषाक्षिमलं तथा[2] ।
रुधिरेण समायुक्तं रससंक्रामणं परम् ॥ ११ ॥
विषं सुरेन्द्रगोपश्च[3] रोचना गुग्गुलुस्तथा ।
स्त्रीस्तन्यं[4] चैव तैर्युक्तो लोहे तु क्रमते[5] रसः ॥ १२ ॥
श्रीखण्ड[6]निम्बनिर्य्यास-स्त्रीस्तन्यविषटङ्कणैः ।
गोघृतेन समायुक्तो लोहे तु क्रमते रसः ॥ १३ ॥
अरिवर्गहतौ[7] वङ्ग-नागौ द्वौ क्रामणं[8] परम् ॥ १४ ॥
मातृवाहः[9] कुलीरस्य शङ्खाभ्यन्तरजो मलः ।
तथा कपित्थनिर्य्यासो[10] रससंक्रामणं परम् ॥ १५ ॥
क्रामणं रसराजस्य वेधकाले प्रदापयेत् ।
क्रामणं यो न जानाति श्रमस्तस्य निरर्थकः ॥ १६ ॥
अतः परं प्रवक्ष्यामि हेमतारदलानि तु ॥ १७ ॥
नागं सूतं समं घृष्टं गन्धद्वादशसंयुतम्[11] ।
धत्तूरकरसे घृष्टा गुटिका[12] चणकाकृतिः ॥ १८ ॥

(1) D reads गण्डम्लि, which is incorrect. (2) महिषाक्षीमलं तथा, a variant in B. महीशाक्षीमलं तथा, a variant in K. (3) B and K read विषसृतेंद्रगोपाश्च. (4) K reads स्त्रीस्तन्ये, which is inaccurate. (5) D reads क्रमणो. K reads क्रमतो. (6) B has स्त्रीवीज. D and K have श्रीखंडं. (7) D reads अरिवर्णाहतो, which seems to be incorrect. (8) D has क्रमणं, which is incorrect. (9) D reads श्रीमाक्षिवाहः, which is incorrect. (10) B reads निर्यासि, which is incorrect. (11) गन्धके द्वादशायुतम्, a variant in D. (12) B has घृष्टघुटिका. K has धत्तुरकरसैः.

तारस्य भागाश्चत्वारः[1] शुल्वभागास्त्रयस्तथा[2] ।
सम्यगावर्त्य देवेशि गुटिकैकां[3] तु निक्षिपेत् ॥ १९ ॥
अनेन क्रमयोगेण तारे ताम्रं[4] तु वाहयेत् ।
यावत्तु जायते रक्तं तारं चैव न संशयः ॥ २० ॥
अस्य भागद्वयं ग्राह्यं तारस्य भागपञ्चकम्[5] ।
हेमभागैकसंयुक्तं द्रुतं[6] हेमाष्टकं भवेत् ॥ २१ ॥
गन्धकेन हतं शुल्वं दरदेन समन्वितम् ।
आर्द्रकं मूलकं शुण्ठी लसुनं हिङ्गु माक्षिकम् ॥ २२ ॥
मर्द्दयेन्मातुलुङ्गेन[7] नागपत्राणि लेपयेत् ।
पुटेन म्रियते नागः सिन्दूरारुणसन्निभः[8] ॥ २३ ॥
तत्तारे त्रिगुणे व्यूढं[9] निर्बीजं कनकं भवेत् ॥ २४ ॥
गन्धपाषाणदरद-तीक्ष्णखर्परसूतकैः[10] ।
भागवृद्धैः समध्वाज्यैः[11] पञ्चमांशेन लेपयेत् ॥ २५ ॥
पुटनाच्छुष्कपुटनात्[12] द्विधा तारस्य कृष्णता[13] ॥ २६ ॥

---

(1) D reads श्चत्वारि, which is incorrect. (2) D reads शुल्वभागास्त्रयं तथा, which is incorrect. (3) D and K read गुटिकैका. (4) D and K read तारे ताम्रे. (5) B has तारभागस्य पंचकं. (6) D reads द्रुतं, which is incorrect. (7) K reads मातुलिंगेन. (8) B and D read सप्रभः. (9) B reads व्यूढः. D reads व्यूढे. K reads ततसूते. (10) D reads सूतकाः, which is grammatically incorrect. K reads पाषाण in place of खर्पर. (11) B reads erroneously समध्वाज्ये. B reads भागवृद्धैः. (12) पुटेन तच्छुष्कपुटनात्, a variant in D. पुटयेत् शुष्कपुटनात्, a variant in K. (13) द्विधा नयस्यत्तकृता, an incorrect variant in D.

पीतगन्धकपालाश-निर्य्यासेन प्रलेपितम् ।
पुटत्रयप्रदानेन[1] रजतं काञ्चनं भवेत् ॥ २७ ॥
पीतकृष्णारुणगणं[2] यथालाभं सुचूर्णितम् ।
गोसर्पिर्भावितं तारे[3] वापेन श्वेतनाशनम्[4] ॥ २८ ॥
रक्तपीतासितगणं[5] छागक्षीरेण भूयसा ।
सप्ताहं स्थापयेत्तारे[6] निषेकाद्रक्तिवर्द्धनम्[7] ॥ २९ ॥
यदा वाप[8]निषेकाभ्यां मार्ज्जारनयनप्रभम् ।
तत्तारं दलसंप्रोक्तं[9] मेलनं परमं मतम् ॥ ३० ॥
शुल्वस्य[10] कांस्यकृष्णं तु रसकेन तु रञ्जयेत् ।
द्वौ भागौ तस्य शुल्वस्य तारस्यैकं च मेलयेत् ॥ ३१ ॥
तदा तस्य रसेन्द्रस्य मेलनं परमं मतम् ।
वेधयेत् शुद्धसूतेन[11] शतांशेन सुरेश्वरि ॥ ३२ ॥
हेममाक्षिकलवणं[12] पेषयेन्मधुसर्पिषा ।

---

(1) पुटत्रयं प्रयत्नेन, a variant in B, which seems to be incorrect. (2) D reads गतं instead of गणं. This charaṇa and the next five are not found in K. (3) गोसर्पिर्भावितातारं, a variant in B. (4) D has वासने श्वेतनाशनी, which has no clear sense. (5) B reads सितरुणं, which is evidently an error of the scribe. (6) B reads erroneously स्थस्येतरे. (7) निषेकाद्रक्ते वन्धनं, a variant in D, which is partly incorrect. (8) D reads incompletely यथा सं. K reads यथा वाप्य, which is not correct. (9) D and K read तदा तस्य रसेन्द्रस्य, which seems to be improper. (10) B reads शुल्वं तु. D reads शुल्वेन तु, which is incorrect. (11) B reads सिद्धसूतेन. (12) B reads हेममाक्षिकलोणं च.

कुङ्कुमाभं भवेद्यावत् तेन नागपुटे[1] पचेत् ॥ ३३ ॥
समं शुल्वं[2] ततो देयं तच्छुल्वं तारपञ्चके[3] ।
त्रिवारं शोधयेद्दत्त्वा शुद्धं हेमदलं भवेत् ॥ ३४ ॥
वङ्गं नागं तथा[4] तीक्ष्णं शुल्वं तारं च पञ्चकम्[5] ।
त्रिवारं शोधयेद्दत्त्वा शुद्धं हेमदलं भवेत्[6] ॥ ३५ ॥
तालकं गन्धपाषाणं[7] माक्षिकं खर्परं[8] विषम् ।
मातुलुङ्गयुतं[9] लिप्त्वा वङ्गलोहं पुटे पचेत्[10] ॥ ३६ ॥
दरदं गन्धपाषाणं माक्षिकं सैन्धवं विषम् ।
मातुलुङ्गयुतं लिप्त्वा तीक्ष्णलोहं[11] पुटे पचेत्[12] ॥ ३७ ॥
कुनटी गन्धपाषाणं माक्षिकं सैन्धवं विषम् ।
मातुलुङ्गयुतं लिप्त्वा नागलोहं पुटे पचेत्[13] ॥ ३८ ॥
सर्व्वं हेमदले वाह्यं[14] हेम बद्धेन[15] वेधयेत् ॥ ३९ ॥

---

(1) D has तेषां नागपुटं. K has तेन नागपुटं. (2) B reads समशुल्वं. (3) B and K read तारपंचकि, which seems to be incorrect. (4) K wants तथा. (5) This hemistich and the next one are not found in D. (6) This hemistich is not found in K. (7) D reads हेमपाषाणं. (8) B reads खर्परी. (9) K reads मातुलिंगयुतं. (10) D reads पुटं भवेत्, which seems to be incorrect. (11) K reads वंगलोहं. (12) After this śloka we find a śloka in B, which is a repitition of the 36th, having नागलोहं in place of वङ्गलोहं. (13) This śloka is not found in D. In K we see only the word कुनटी. (14) B reads वाह्यः. D reads सर्वं हेमदलो, which seems to be incorrect. (15) B reads हेम चानेन.

तुल्यांशौ हेमकरिणौ[1] तीक्ष्णं द्विगुणमेव च[2] ।
व्यूढं रक्तगणैः सिक्तं[3] तत्तारं कनकं भवेत् ॥ ४० ॥
शुल्वं ताप्यहतं[4] कृत्वा वरनागं[5] तु रञ्जयेत् ।
तं नागं वाहयेत्तारे यावद्धेमदलं[6] भवेत् ॥ ४१ ॥
विषं सूतसमं गन्धं[7] त्रिगुणाञ्जनसंयुतम्[8] ।
अम्लेन त्रिदिनं[9] पिष्ट्वा ताराकौं मेलयेत् समौ[10] ॥ ४२ ॥
पक्कं पञ्चमृदा चैव[11] पुटेत्तारावशेषितम् ।
एवं वारत्रयेणैव रञ्जयेत्तारमुत्तमम् ॥ ४३ ॥
भुजङ्गस्य[12] च शुल्वस्य पृथगंश[13]चतुष्टयम् ।
पृथग्द्वादशतैलस्य[14] रीतिकातारयोर्द्वयोः[15] ॥ ४४ ॥

---

(1) B reads तुल्यंशौ, which is incorrect. K reads erroneously हेमकणौ. (2) D has तीक्ष्णं द्विगुणं भवेत्. (3) B reads रक्तगणे. D reads शिक्ते, which is incorrect. (4) B has शुल्वताप्यं हतं. (5) D reads तारेणोगं, which is unintelligible. (6) D has यावच्चासिदलं, which is incorrect. (7) विषं सूतं समं गंधं, a variant in B and K. विषसूतसमं गन्धं, a variant in D. (8) B has त्रिगुणं अंजनसंयुतं. D reads erroneously त्रिगुणं येन संयुतम्. (9) D reads त्रिगुणं, which is evidently an error. (10) ताराकं मेलयेत् समम्, a variant in B. नाकं मिलय तत्समम्, an incorrect variant in D. (11) D has पूर्ववदमृता चैव, which is partly correct. K has पक्कं पंचदमृता चैव, which is incorrect. (12) B reads भुजगस्य. (13) D and K read पृथगस्य. (14) पृथद्दादशतोलास्क, an incorrect reading in B. अप्यङ्गद्वादशतैलस्य, a variant in D. पृथक्द्वादशलोहस्य, a variant in K. (15) टीतिकातारयोर्द्वयोः, a reading in B. रीतितारकयोर्द्वयोः, a variant in D. K has an incomplete charaṇa—रीतिकासायोर्द्वयोः.

कनकस्य तु भागैकं हेमताराविशेषितम्[1] ।
मार्ज्जाराच्चिप्रभं देवि वरं हेमदलं भवेत् ॥ ४५ ॥

ताराष्टकं ताम्रचतुष्कभागं[2]
नागद्वयं काञ्चनमेकभागम् ।
सर्व्वं ततो रक्तगणेन सिक्तं
तारावशेषं कनकं करोति ॥ ४६ ॥

राजावर्त्तं चतुर्थं च[3] दरदञ्च प्रवालकम् ।
हेममाक्षिकसंयुक्तं समभागानि कारयेत् ॥ ४७ ॥
रसकस्य[4] त्रयो भागा मेषीचीरेण[5] मर्द्दयेत् ।
वटिकां कारयेत् पश्चात् छायायां शोषयेत्ततः ॥ ४८ ॥
पञ्चद्रावकसंयुक्तां शिलापट्टेन पेषयेत् ।
अनेन सिद्धकल्केन तारारिष्टं तु योजयेत्[6] ॥ ४९ ॥
प्रथमे[7] समकल्केन द्वितीये तु तदर्धकम् ।
तृतीये पादभागेन तारारिष्टं तु जायते ॥ ५० ॥
पत्रे दाहे कषे च्छेदे[8] हेम तच्चाचयं भवेत् ॥ ५१ ॥
सूतकं दरदं ताप्यं गन्धकं कुनटी तथा ।
गृहीत्वा क्रमवृद्ध्या तु शुल्वपत्राणि लेपयेत् ॥ ५२ ॥

(1) D reads हेमतप्तावशेषितम्, which is not correct. (2) K reads ताम्रचतुष्कभागे. (3) D reads राजावर्त्तचतुर्थं च. (4) K reads कारकस्य, which is incorrect. (5) मजाच्चीरेण in D, which is incorrect. (6) B reads तु जायते. (7) B, D and K read प्रथमं ; but this is not accurate. (8) D reads छेदे, which seems to be incorrect.

चाङ्गेरीस्वरसे[1] पिष्ट्वा दापयेत्[2] पुटपञ्चकम् ।
तच्चूर्णं वाहयेत्तारे हेमाकृष्टिरियं[3] भवेत् ॥ ५३ ॥
कनके[4] योजयेद्देवि कृष्णवर्णं भवेत्ततः[5] ॥ ५४ ॥
गोमूत्रेण[6] निशां पिष्ट्वा शुल्वमावर्त्त्य[7] सेचयेत् ।
शतधा शोधनेनैव भवेत् काञ्चनतारकम् ॥ ५५ ॥
अथ कांस्योद्भृतं[8] ताम्रमारोटमथवा प्रिये ।
षड्गुणेन तु नागेन[9] शोधयित्वा ततो बुधः[10] ॥ ५६ ॥
शतार्द्धं सिन्धुवारस्य रसमध्ये तु ढालयेत् ।[11]
कुष्माण्डस्य रसे[12] पश्चात् सप्तवारं तु दापयेत् ॥ ५७ ॥
तथा तक्रे निशायुक्ते तप्ततप्तं च[13] दापयेत् ।
शुकतुण्डकिंशुकाभं छेदे रक्तं मृदुं तथा[14] ॥ ५८ ॥

(1) D reads स्वरसे, which is an error of the scribe. (2) K reads चपयेत्, which has no sense. (3) D reads हिमकष्टिरयं, which is incorrect. K reads हेमकृष्टिरियं. (4) B reads कनकेन, which destroys the metre. This hemistich is not found in D. (5) K reads भवेत्तु वा. (6) D reads गोमूत्रे, which mars the metre. (7) D reads शुल्वमावर्त्तं, which is incorrect. (8) D reads कांस्योद्घृतं. K reads कांस्योधनं. Both the readings are incorrect. (9) षड्गुणेन तुल्यांशेन, a variant in D. (10) B reads ततो नधः, which is incorrect. (11) After this 18 ślokas (57—74) are wanting in B. (12) D reads कुष्माण्डकरसे. K reads कुष्माण्डस्य रसं, the latter being incorrect. (13) D has पुनस्तच्चैव. K has तप्ततप्तैव, which is grammatically incorrect. (14) छेदैरक्ताष्टईस्तथा, an incorrect variant in D. K reads मृदुस्तथा.

तार्प्येन वार्प्यं कृत्स्नं तत्[1] शुल्वं कालिकया गतम्[2] ॥ ५९ ॥
दरदं किंशुकरसं रक्तचित्रकमेव च ।
हरिद्रे[3] द्वे वरारोहे छागमूत्रेण पेषयेत् ॥ ६० ॥
दद्यान्निषेचनं[4] शुल्वे सप्तवारं न संशयः ।
शुल्वं सिन्दूरवर्णं च वरं[5] हेमदलं भवेत् ॥ ६१ ॥
द्विगुणौ तीक्ष्णभुजगौ घोषकृष्णं[6] तु वाहयेत् ।
अथवा यन्त्रकारस्य[7] चैकद्वित्रिपलक्रमात्[8] ॥ ६२ ॥
त्रिपञ्चकं च[9] नागस्य शुल्वस्य च[10] पलं तथा ।
ध्मातं यदवशिष्टं[11] तत् तपनीयनिभं भवेत् ॥ ६३ ॥
लाङ्गली चित्रकं शिग्रुर्निर्गुण्डी करवीरकम् ।
स्नुह्यर्कक्षीरचिञ्चाम्ल-वज्रकन्दसमन्विताम् ।
महिषीक्षीरसंयुक्तां सुरां देवि प्रकल्पयेत्[12] ॥ ६४ ॥
स्नुह्यर्कक्षीरलवणैः शुल्वपत्राणि लेपयेत् ।
सुरायां प्रथमोक्तायां दिनमेकन्तु पाचयेत् ॥ ६५ ॥

(1) तापयेच्च यतकृत्स्नं तत्, a variant in K, which is incorrect. (2) K reads रतं. (3) K reads हारिद्रे. (4) D reads दद्याच्चिशोधनं. (5) D reads द्वयं. (6) K reads घोषाकृष्टं. (7) K reads पञ्चकारस्य, which has no clear sense. (8) D reads फलाक्रमात्, which is not correct. (9) D has त्रिपञ्चकस्य. (10) D reads शुल्वेन च, which is incorrect. (11) D reads यदावशिष्टं. K reads यथावशिष्टं, which seems to be incorrect. (12) This śloka is not found in D.

प्राग्वत्तप्ताग्निवर्णानि[1] सुरायां सेचयेन्मुहुः[2] ।
आवर्त्तितानि बहुधा[3] कुर्य्यात् कुण्डवराटकैः[4] ॥ ६६ ॥
सर्ज्जिका[5]सिन्धुदत्तैश्च वपेत् कर्म्मसु[6] योजयेत् ॥ ६७ ॥
रसकस्य पलैकं तु[7] हेममाक्षिकसंयुतम् ।
सैन्धवस्य पलार्द्धं तु मातुलुङ्गाम्ल[8]संयुतम् ॥ ६८ ॥
पाचनं कारयेत् पश्चात्[9] ध्मातं[10] कुङ्कुमसन्निभम् ।
इन्द्रगोपसमं[11] कल्कं पुटयोगेन जारयेत्[12] ॥ ६९ ॥
तत् कल्कं मधुसंयुक्तं शर्कराटङ्कणान्वितम्[13] ।
एकीकृत्याथ संमर्द्य[14] गव्यक्षीरेण[15] पाचयेत् ॥ ७० ॥
प्रागेव शोधितं शुल्वं रसकल्केन[16] रञ्जयेत् ।
रञ्जयेत् त्रीणि वाराणि जायते हेम शोभनम् ॥ ७१ ॥
भावयेन्मुनिपुष्पाणि करवीरं मनःशिलाम्[17] ।

अग्निशिष्टानि वर्णानि, a variant in D. (2) D reads सेचनं मुहुः, which is not grammatical. (3) प्रावर्तिताग्निवत्सुर्यात्, an incorrect variant in D. (4) कुर्यात् बुधराटकैः, an incomplete charaṇa in D. (5) D reads सार्पिका, which seems to be an error of the scribe. (6) D reads कर्म च, which is not grammatical. (7) D reads फलैकं तु, which is incorrect. (8) K reads मातुलिंगाम्ल. (9) K has only कंचरयेत् पश्चात्. (10) K reads भुतं, which has no sense. (11) K reads इंद्रगोपसमा, which is incorrect. (12) K reads जायते. (13) D reads erroneously शर्कराटङ्कणान्विताम्. (14) एकीकृत्वा सुतं मर्द्य, an incorrect variant in D. (15) D has गवाक्षीरेण, which is incorrect. (16) D reads रजकल्केन, which is incorrect. (17) करवीरमनःशिलाः, a variant in D.

तत्पूर्व्वं रञ्जितं[1] शुल्वं शिलया च तथा युतम् ।
अन्धमूषागतं[2] ध्मातं जायते हेम शोभनम् ॥ ७२ ॥
तेनैव रसकल्केन तारपिष्टिं तु कारयेत् ।
सेचयेत् कङ्गुणीतैले तद्दिव्यं[3] कनकं भवेत् ॥ ७३ ॥
अर्ज्जुनी लाङ्गली पद्मचारिणी[4] शक्रवारुणी[5] ।
सुवर्णा[6] चौषधीभिश्च गैरिकेण तु पार्व्वति ।
विलिप्तं शुल्वपत्रं तु निषिक्तं कनकं भवेत् ॥ ७४ ॥
मयूरग्रीवतुत्थञ्च[7] कुङ्कुमं रसकं तथा ।
बालवत्सपुरीषं च विषं हालाहलं तथा ।
रक्तचित्रकचूर्णञ्च[8] समभागानि कारयेत् ॥ ७५ ॥
मर्द्दयेन्मध्यमाम्लेन छायाशुष्कं च कारयेत् ।
मधुना सह संयोज्य[9] नागपत्राणि लेपयेत् ॥ ७६ ॥
मूकमूषागतं[10] ध्मातं नागं रञ्जयति क्षणात् ॥ ७७ ॥

(1) तत्पुर्वंरञ्जितं, a variant in D. (2) D and K read अंधमूखागतं, which is not correct. (3) K reads तं दिव्यं, which is not correct. (4) D reads लाङ्गुली पद्मवारुणी. K reads यमचाडनी, which seems to be incorrect. (5) B reads शक्तवारुणि, which is incorrect. (6) D reads सुरवर्णं, which is incorrect. K reads सुवर्णं. (7) D has तुच्छं च, which is incorrect. (8) D reads वर्णं तु, which seems to be incorrect. K has तु instead of च. (9) मधुमांसकसंयुज्य, a variant in B, which has no clear sense. मधु सहसं जोज्यं, an incorrect variant in D. K reads संयोज्यं. (10) D and K read मूकमूखागतं, which is incorrect.

शाकपत्र[1]रसेनैव सप्तवारं निषेचयेत् ।
अष्टाविंशतिकल्वो वा[2] तैले भूनागसम्भवे ।
तन्नागं[3] जायते दिव्यं देवाभरणभूषणम् ॥ ७८ ॥
अथवा भूलताचूर्णं[4] नागचूर्णं समांशकम् ।
अन्धमूषागतं ध्मातं तैले तप्तं[5] निषेचयेत् ॥ ७९ ॥
एवं कृते सप्तवारं भवेत् षोड़शवर्णकम् ॥ ८० ॥
बालवत्स[6]पुरीषं च लाक्षागैरिकचन्दनम् ।
हंसपादाख्यदरदं[7] विल्वमज्जा गुड़स्तथा ॥ ८१ ॥
राजावर्त्तं च कङ्कुष्ठं शाक[8]पल्लववारिणा ।
भुजङ्गं कनकं कुर्य्याच्छतवारं निषेचनात्[9] ॥ ८२ ॥
मञ्जिष्ठा रजनीद्वन्द्वं कांची कनकमाक्षिकम्[10] ।
कौसुम्भं विषसिन्धूत्थं[11] दरदं रक्तचन्दनम् ॥ ८३ ॥
शाकपल्लवपालाश-कुसुमैः सह संयुतम् ।
सेचनाच्छतवारेण[12] नागं रञ्जयति प्रिये ॥ ८४ ॥

(1) D and K read अशोकपत्र. (2) K reads वै. (3) B and K have तं नागं, which is grammatically incorrect. (4) B reads भूलताचूर्णं, which is incorrect. (5) B reads तैलतप्तं. D reads तैले तदा. K reads अंधमूखागतं तैले तप्तं तप्तं. (6) D reads erroneously बालवैत्र. (7) हंसपादाद्यदरदं, a variant in D. (8) B reads शोक, which seems to be incorrect. (9) D has शतवाराणि शेचयेत्. K has शतवाराथि सेचयेत्. Both the readings are incorrect. (10) काञ्जिवत्सकमाक्षिकम्, a variant in D. K has only कांचिकं. (11) B has सिंधुत्थ, which is incorrect. (12) This charana is wanting in K.

कङ्कुष्ठं गन्धपाषाणं[1] रजनीद्वितयं तथा ।
भावयेत् सप्तवारांश्च चामीकररसेन तु[2] ॥ ८५ ॥
निषिक्तं शिंशपातैले[3] सप्तधा प्रतिवापितम्[4] ।
नागं रञ्जति च[5] क्षिप्रं रञ्जितं चाक्षयं भवेत् ॥ ८६ ॥
विद्रुमं दरदं तीक्ष्णम् अनेन[6] प्रतिवापितम् ।
मञ्जिष्ठाकिंशुकरसे शाके चैव निषेचयेत्[7] ॥ ८७ ॥
प्रतिवापनिषिक्तश्च[8] क्रमेणानेन रञ्जितः[9] ।
भुजगो[10] हेमतां याति नात्र कार्य्या विचारणा[11] ॥ ८८ ॥
उक्तं हेमदलं[12] देवि वरं तारदलं[13] शृणु ॥ ८९ ॥
श्वेताभ्रं काञ्जिके स्विन्नं[14] त्रिवारं पुटितं ततः ।
खल्पटङ्कणवङ्गं च शुद्धशुल्वे तु वापयेत्[15] ॥ ९० ॥

(1) B and K have गंधपाषाण. (2) K reads शाकह्यरसेन तु. (3) D reads तैलैः. (4) D reads erroneously प्रतिवापिता. (5) नागं रञ्जयते is the reading in B. नागं रञ्जति is the reading in D. This hemistich and the next one are not found in K. (6) D reads शमनं. (7) K reads erroneously निशेचयेत्. (8) D reads निषिक्तं च. K has विसप्त before प्रतिवापनिशिक्तं च, which is incorrect. (9) क्रमे चानेन रञ्जयेत्, a variant in D. (10) K reads भुजंगो. (11) K reads विचारणात्, which is incorrect. (12) D has सिक्तं हेमदले. K has रक्तहेमदलं. Both सिक्तं and रक्त are absurd. (13) D reads चिरं तालदलं, which is not correct. (14) B has स्विन्ने. काञ्जिकं स्विन्नं is the variant in D. (15) D reads शुद्धशुल्बेन. K reads कापयेत्

पञ्चमांशेन मिश्रं तत्[1] तारं तालं च वेधयेत्[2] ।
तत्तालं[3] मेलयेत्तारे द्रुतं सिक्तेन[4] वेधयेत् ॥ ९१ ॥
रससैन्धवमेकैकं तिलसर्ज्जी[5]द्वयं द्वयम् ।
टङ्कैकं कनकरसे[6] मर्द्दयेद्दिवसत्रयम् ॥ ९२ ॥
तेन लिप्तं ताम्रपत्रं[7] धमेदावर्त्तितं[8] पुनः ।
इङ्गुदं सतालमूलं[9] दध्यम्लेन तु पेषयेत् ॥ ९३ ॥
तन्मध्ये ढालयेच्छुल्वं सप्तवारं[10] दलं भवेत् ।
तृतीयांशेन बीजस्य मेलयेत् परमेश्वरि[11] ॥ ९४ ॥
लाङ्गली चित्रको दन्ती हयघ्नोत्तरवारुणी[12] ।
गोधावती वज्रवल्ली[13] श्वेतार्कः शक्रवारुणी[14] ॥ ९५ ॥

(1) पञ्चमासे धनं नारं, a variant in D. K has only पंचमांशेन घन. (2) तारवङ्गं तु वेधयेत्, a variant in B. तार तालं च वन्धयेत्, a variant in D. K has तारं वङ्गं च वैधयेत्, (3) B has तद्दले. D has तत्तारं. (4) B reads द्रुता सिक्तेन. D reads घृतं सिक्तेन. Both are incorrect. (5) B reads सिलासर्जि. (6) D reads कानकं रसे, which is incorrect. (7) B has ताम्रं पत्रं. D has ताम्रपात्रं. Both are incorrect. (8) D reads धमेद्याचिततं, which has no clear sense. (9) इङ्गुदीमूलतालमूलं, a variant in B. इङ्गुदीसमतामूलं, a variant in D. इंगुदिमभतामूलं, a variant in K. (10) K reads सप्तवारं. (11) D has only परमेश्वरि out of this hemistich. (12) D reads हयघ्नुतवारुणी, which is incorrect. (13) B reads गोधापती, which is not correct. D has गन्धा वज्रवल्ली च ; K has गोधावर्तो वल्ली. Both are incorrect and incomplete. (14) B reads शतवारुणी. D reads खेताकं, which is incorrect.

विष्णुक्रान्ताश्वगन्धा च[1] शिग्रुपञ्चाङ्गुली तथा ।
पुनर्नवा अपामार्ग इङ्गुदी[2] चक्रमर्दकः ॥ ९६ ॥
गुडूची चैव हिंस्रा च[3] एकद्वित्रिचतुर्थकः[4] ।
महिषीक्षीरसन्धानात्[5] सप्ताहादुपरि प्रिये[6] ।
निषेके क्रियमाणे तु[7] जायते शुल्वशोधनम्[8] ॥ ९७ ॥
ताल[9]षोडशभागेन शुल्वपत्राणि लेपयेत् ।
स्थापयित्वान्धमूषायां[10] त्रिधा चावर्त्तयेत् पुनः[11] ॥ ९८ ॥
शुक्लवर्गस्त्रिधा क्षारं[12] शङ्खसैन्धवसर्ज्जिकाः ।
दन्ताः कपर्दाः कम्बुश्च[13] शुक्तयः शुल्ववापनाः[14] ॥ ९९ ॥

---

(1) विष्णुक्रान्ता चाश्वगन्धा, a variant in B. विष्णुक्रान्ता च गन्धा च, a variant in D. (2) D reads शिग्रु च, which is incorrect. (3) गुडूची च वधहिंसा च, a variant in D. (4) B reads -चतुर्थथा. (5) D reads संघाता, which is incorrect. (6) D has सप्ताहात् परियोजयेत्. K has सप्ताहादुपरौ योजयेत्. (7) क्रियमाणे जायते तत्, a variant in D. निशिक क्रयमाणे तु, a variant in K. Both the readings are incorrect. (8) D reads शुल्वं शोधनं परम्, which mars the metre. (9) B reads तालः. D reads तं तु. K wants this term. (10) वापयित्वा त्रिधा यावत्, a variant in D. K reads स्थपयीत्वांधमूखायां, which is incorrect. (11) D has तावद्वन्धन तत् पुनः, which is incorrect. K has त्रिधा संवर्त्तयेत् पुनः. (12) शुक्लवर्गसुधाक्षार, a variant in B. शुल्वं वङ्गं त्रिधा क्षीरं, a variant in D. शुक्लवर्गत्रिधाक्षारं, a variant in K. (13) B reads कंवुश्च. D reads दन्ता कापर्दि कंवुंच. K reads कपर्दि. (14) B has शुल्कयः शुल्ववापनः. D has शक्र यः शुल्वपाचनम्. K has only शुल्ववापनं.

पादमेतत्सुरासेकै[1]र्जायते नखपाण्डुरम् ॥ १०० ॥
त्रयोऽयस्कान्तभागाः[2] स्युरारतारद्वयं तथा ।
वङ्गस्य[3] दश भागाः स्युस्तारवेधेन[4] वेधयेत् ॥ १०१ ॥
आरस्य द्विगुणं तारं तारात् कान्तं चतुर्गुणम् ।
कान्तादष्टगुणं[5] वङ्गं तारवेधेन वेधयेत्[6] ॥ १०२ ॥
तालं सूतं समं कृत्वा वज्रीक्षीरेण मर्द्दितम् ।
पुटं दत्त्वा तु यन्त्रेण सत्त्वं पतति शोभनम् ॥ १०३ ॥
वङ्गमावर्त्त्य देवेशि वज्रीक्षीरेण[7] पेषयेत् ।
एकविंशतिवाराणि वङ्गशोधनमुत्तमम् ॥ १०४ ॥
तद्वङ्गं जारयेत् सूतं[8] समं वा[9] द्विगुणादिकम् ॥ १०५ ॥
भल्लातराजिकातैल[10]-शङ्खचूर्णविडेन च[11] ।
नागवङ्गौ भवेत्तेन समं वङ्गेन सारणात्[12] ॥ १०६ ॥
क्षारोदकनिषेकाच्च[13] तद्बीजमनेकधा[14] ।

---

(1) यद्दातमसुरां सेकैः, a variant in B. पादमेतृ शुचैकैकं, a variant in D. पादमेतत्सुराकैकं, a variant in K. (2) D reads अयोकान्तस्य भागा स्यात्, which is incorrect. K reads त्रयो भास्करभागाः स्युः. (3) B reads वंशस्य. (4) K reads तारवंधेन. (5) D has कान्ताद्दशगुणं. (6) B has तारं वेधेन वेधयेत्. D has तारवन्धेन वेधयेत्. K has तारं वन्धेन वेधयेत्. (7) K reads अर्कक्षीरेण. (8) B reads जार्यते सूते, which is incorrect. D reads जायते सूतं, which is also incorrect. (9) D and K read तत्-समं. (10) D has भल्लातराजितैलं, an incomplete charaṇa. K has भल्लातं राजिकातैलं. (11) B reads विड़ानि. D reads विड़ञ्जनम्. (12) D and K read सारयेत्. (13) K has क्षीरोदकनिशिकाच्च, which seems to be incorrect. (14) तद्वप्रभिन्नरेकधा, a variant in D, which is senseless.

तमुपायं प्रवक्ष्यामि मार्द्दवं येन जायते ॥ १०७ ॥
घृतं दधि पयः[1] क्षौद्रं विल्वजम्बीरकद्रवैः[2] ।
गुड़स्तिलसमायुक्तो[3] निषेकात्[4] मृदुकारकः[5] ॥ १०८ ॥
गजदन्ता हयनखा[6] मेषशृङ्गं च सैरिभम्[7] ।
कम्बु[8]निर्याससंयुक्तं सप्तवारं निषेचयेत्[9] ॥ १०९ ॥
सहस्रधा विस्फुटितं दलं भजति[10] मार्द्दवम् ॥ ११० ॥
ज्योतिष्मतीकुसुम्भानां[11] तैले कारञ्जकेऽपि वा[12] ।
निषेकः शस्यते[13]ऽत्यर्थं कनकस्य विचक्षणैः ॥ १११ ॥
आवर्त्त्यमानं तारे च[14] यदि तन्नैव[15] निर्म्मलम् ।
काचटङ्कणवापेन क्षिप्रं निर्म्मलतां व्रजेत् ॥ ११२ ॥
मधुक[16]मधुमेषाज्य-सौराष्ट्रीगुड़सैन्धवैः[17] ।

(1) B reads घृतयष्टिमधु. (2) किणजंबीरकंदलि, a variant in B. (3) गुड़तैलसुमायुक्त, an incorrect variant in D. (4) D and K read वापयेत्. (5) D has मृदुकारकम्. K has मृदुकारकै. (6) B reads हयनखो. (7) मृङ्गं चैव सैन्धवं, an incomplete charaṇa in D. मेषीशृङ्गं च सैंधवं, a variant in K. (8) D and K read कंकु, which seems to be incorrect. (9) D reads सप्तवाराणि सेचयेत्. (10) D has सहस्रधा वस्फुटिते दले भवति. K has सहस्रधा च स्फुटते दले भवति. (11) ज्योतिष्मतसुभानां, an incomplete charaṇa in B. (12) कारंजिकेऽपि वा, a reading in D. (13) K reads सास्यते. (14) B reads तारेण. K reads ततारे. (15) D reads तं नैव, which is incorrect. (16) B, D and K read मधुकं, which is not accurate. (17) D reads गुड़सैन्धवम्.

शुक्तिकम्बुखुरावापं[1] चन्द्रार्कं मृदु जायते ॥ ११३ ॥
मधुतैलघृतैश्चैव[2] वत्समूत्रे निषेचनात्[3] ।
जायते खरसत्त्वानां दलानामपि मार्द्दवम् ॥ ११४ ॥
चिञ्चारसेन सामुद्रैः क्षीरे चार्कस्य[4] वह्निना ।
विशुद्धं जायते तारं शङ्खकुन्देन्दुसन्निभम् ॥ ११५ ॥
यदि तन्निर्म्मलं[5] नैव तदा[6] तद्वत् पुनः पचेत् ।
विधिरेष[7] समाख्यातस्तारकर्म्मणि पूजितः ॥ ११६ ॥
कङ्गुणी[8]तैलमञ्जिष्ठा-हरिद्राद्वयकुङ्कुमम् ।
निषेकात् कुरुते हेम बालार्कसदृशप्रभम् ॥ ११७ ॥
शुल्वार्द्धं गन्धकं दत्त्वा तदर्द्धं मृतसूतकम्[9] ।
चाङ्गेरी[10]स्वरसेनैव मर्द्दयेद्वासरत्रयम् ॥ ११८ ॥
म्रुतं[11] चित्ररसेनैव लेपयेद्धेम पाण्डुरम् ।
पक्त्वा[12] पञ्चमृदा देवि हेमोत्कर्षणमुत्तमम् ॥ ११९ ॥

(1) सिक्तमश्वमखुरावापं, a variant in D. शुक्तिकंचुखुरावापं, a variant in K. (2) मधु तैलं घृतं चैव, a variant in D. मधुतैलघृतं चैव, a variant in K. (3) वत्स्याभिश्च निषेचयेत्, a variant in B. वत्समूत्राणि सेचनात्, a variant in D. Both the variants have no clear sense. (4) D reads क्षीरं वार्कस्य, wherein the first term is incorrect. (5) B and D read तं निर्मलं, which is incorrect. (6) D reads तत्र. (7) D reads erroneously विधिरेषा. K reads विधिरेव. (8) K has कंगुणि. (9) B has सूतपारदं, which seems to be incorrect. (10) B reads शार्ङ्गरी, which appears to be incorrect. (11) D reads श्रावितं, which mars the metre. (12) D and K read क्वाथ्य.

हेम शुल्वं तथा तीक्ष्णं समभागानि कारयेत् ।
अन्धमूषागतं[1] ध्मातं खोटो भवति तत्क्षणात् ॥ १२० ॥
खोटस्य भागमेकं तु रसहेमसमन्वितम् ।
पाचयेदनुजाम्लेन[2] यावत् कुङ्कुमसन्निभम् ॥ १२१ ॥
शतांशेन तु तेनैव वेधयेद्धेम पाण्डुरम्[3] ।
जायते कनकं दिव्यं द्विवर्णोत्कर्षणं[4] भवेत् ॥ १२२ ॥
यावच्छुद्धं भवेत्तावत् पुटेल्लवणभस्मना[5] ।
रक्ततैले[6] निषेक्तव्यं जायते हेम शोभनम् ॥ १२३ ॥
मर्द्दितं कटुतैलेन[7] स्वर्णगैरिकगन्धकम् ।
अथवा मातुलुङ्गाम्ले[8] राजावर्त्तकमाक्षिकम् ॥ १२४ ॥
अथवा विट् कपोतस्य[9] राजावर्त्तकसैन्धवम् ।
पुटनाच्छ्वेतकनकं[10] कुरुते[11] कुङ्कुमप्रभम् ॥ १२५ ॥
राजावर्त्तस्य चूर्णं तु शिरीषकुसुमद्रवैः[12] ।

---

(1) D and K read अंधमूखागतं, which is not correct. (2) पाचयेदनजाम्लेन, a variant in D. [अनुज may mean मध्यम.] (3) वेधयेत् पत्रपाण्डुताम्, a variant in D. (4) This charaṇa and the next three are not found in D. K reads द्विगुणोत्कर्षणं. (5) B reads भस्तता, which is incorrect. (6) K reads तक्ते तैले. (7) सकंद्रुतैलेन सिक्तं, a variant in D, which is senseless. (8) K reads मातुलिंगाम्ले. (9) D has विट्रुमौक्तस्य. (10) K has पु...ताश्वेतकनकं, which is incomplete as well as incorrect. (11) K reads जायते, which is not proper. (12) शिरीखकुसुमौद्रवैः, an incorrect variant in K.

भावितं बहुशः क्षिप्तमशीत्यंशेन[1] वर्णदः ॥ १२६ ॥
शतशः कङ्गुणीतैले ताम्रं हेम्ना समं द्रुतम्[2] ।
माक्षिकेन कृतावापं शतांशेन तु वर्णकृत्[3] ॥ १२७ ॥
कार्पासवीजदरद[4]-तुत्थसैन्धवगैरिकैः[5] ।
पलालक्तक[6]मञ्जिष्ठा-रक्तचन्दनविद्रुमैः[7] ॥ १२८ ॥
गुडभल्लातकस्नेह[8]-वत्सविष्टेष्टकायुतैः[9] ।
आवापाज्जायते श्वेतं[10] कनकं रविसन्निभम्[11] ॥ १२९ ॥
रक्ताष्टकं त्रयो भागाः[12] त्रयो भागाः समुद्रजम्[13] ।
सितार्कपत्रतोयेन[14] पुटो वर्णप्रदो भवेत्[15] ॥ १३० ॥

---

(1) B reads क्षिप्रमशीत्यंशेन. D reads क्षिप्तमशीत्यंशातु. K reads क्षीप्र ह्मशीव्यंशास्तु, which is incorrect. (2) ताम्रहेम्नासमद्दत्तं, a variant in B. ताम्रे हेम्ना रसे द्रुतं, a variant in D, which is not correct. (3) D reads the whole hemistich thus : माक्षिकेन शतांशेन तूत्षवापनद्रवेत्, which is partly incorrect. K wants कृता. (4) B and D read कार्पासवीजं दरदं. (5) D reads तुच्छसैन्धगैरिकः, which is incorrect. (6) D reads पद्मकन्देन. K reads पलालजक. (7) D and K read मिश्रितैः instead of विद्रुमैः. (8) गुडं भल्लातकस्नेहं, a variant in D. (9) वश्रविष्टाष्टकायुतैः, a variant in D. वत्सष्टेष्टकायुतैः, an incomplete variant in K. (10) B reads द्विवि. D reads स्नेह. (11) B has रविसप्रभं, D has विद्रुमप्रभम्. (12) B has रक्तोष्टक. D has काकविट् गृध्रविट् चैव. K reads सरक्ताष्टकत्रयो भागाः. (13) B has सामद्रं योनयो हितं. K has सामुद्रं योजयेद्दिपं. Both the readings are unintelligible. (14) शिसार्कपत्रतापेन, a variant in D. (15) पुटवर्णप्रदापयेत्, an incorrect variant in D.

रक्तपीतौ[1] समौ कृत्वा ताभ्यां तुल्यं च[2] माक्षिकम् ।
करञ्जतैलेनालोड्य मूकमूषागतं[3] धमेत् ॥ १३१ ॥
सकृत् पीत[4]दशांशेन दश पीतशतेन च[5] ।
शतं पीतसहस्रेण[6] कोटिमर्द्धेन विध्यति[7] ॥ १३२ ॥
शतशः किंशुकरसे भावितं[8] लवणं पुनः ।
सटङ्कणपुटेनैव[9] वर्णोत्कर्षप्रदं[10] भवेत् ॥ १३३ ॥
लोहचूर्णं[11] त्रयो भागा गैरिकं द्विगुणं तथा[12] ।
मधुककुमुदाम्भोभिः[13] मूत्रेणापि निषेचयेत्[14] ॥ १३४ ॥
पेषयेत् कोद्रवेणैव[15] गोष्ठमध्ये[16] तु निक्षिपेत् ।

---

(1) D has रक्तपित्तौ. (2) D reads तुच्छं च, which is incorrect. (3) B reads चंधमूषागतं. D and K read मूकमूखागतं, wherein the middle term is incorrect. (4) D reads पाद. (5) दद्यात् पीतेन च पृथक्, a variant in D. (6) शतपीतं च सत्रेन, a variant in D. शतपीतसहेना, a variant in K, which is incomplete. (7) B reads कोटिमर्धं न विध्यति. D reads कोटिमूर्ध्नेन तिष्ठति. K reads कोटिमर्धं न तिष्ठति. (8) D reads erroneously भवैतां. (9) सटंकणं तु पुटनात्, a variant in B. (10) D and K read वर्णोत्कर्षप्रभं, which is not correct. (11) D reads लोणचूर्णं. (12) गौरिका द्विगुणस्य च, a reading in B. गैरिका द्विगुणाय च, a reading in D. गैरिकं द्विगुणस्य च, a reading in K. All are inaccurate. (13) मधुककुसुदाशाषाभि, a variant in B. मधुकुन्देन कुन्दांभो, a variant in D. मधुकुंदेनकुंदातो, a variant in K. All are partly incorrect. (14) B reads च पेषयेत्. K reads च शेशयेत्, which is incorrect. (15) पेषयेद्रवणेनैव, a variant in D. पेषेद्रक्तद्रवेनैव, a variant in K. (16) D reads गौप्यमध्ये.

अशीत्यंशेन तदिदं[1] वापाद्वर्णप्रदं भवेत् ॥ १३५ ॥
शुल्वातिरिक्तं कनकं[2] पुटयेदन्धमूषया[3] ।
सामुद्रधातुतोयेन निषेकः शस्यते तदा[4] ॥ १३६ ॥
सामुद्रगैरिकालिप्तं[5] द्रावितं[6] मृदुतां व्रजेत् ।
गोशकृद्भस्मलिप्तं तत्[7] समभागं प्रलेपयेत् ॥ १३७ ॥
शुल्वातिरिक्तं कनकं[8] पुटं निर्मलतां व्रजेत् ॥ १३८ ॥
नागास्थिभस्मकल्केन मूषां लिप्त्वा विचक्षणः ।
निक्षिपेदन्धमूषायां[9] नित्यं हेमदलं भवेत् ॥ १३९ ॥
ततस्तन्मृदुभिर्घोटैः[10] सम्प्रसार्य्य विचक्षणः ।
तप्ततप्तं[11] निषेक्तव्यं यावत्तन्मृदुतां व्रजेत् ॥ १४० ॥
सामुद्र[12]धातुकल्केन लेपयित्वा विचक्षणः ।
कृत्वा पलाशपत्रे[13] तु तद्द्हेन्मृदुवह्निना[14] ॥ १४१ ॥

---

(1) D reads ताविदं. K reads तदीदं. Both are incorrect. (2) शुल्वातिरिक्तकनकः, a reading in D. शुल्वाति नक्तं कनकं, an incorrect reading in K. (3) पुटे देयान्धमूखया, a variant in D. K reads मूखया, which is incorrect. (4) D has an incomplete reading—रसेकः शस्यते दा. (5) समुद्रं गैरिकालिप्त, a variant in D. सामुद्रं गैरिकं लिप्तं, a variant in K. (6) D reads erroneously द्रावयित्वं. (7) D reads गोसकृद्भस्मगलितं. K reads -लिप्तं च. (8) D reads शूर्णके, which is senseless. (9) वापयेदंधमूषायां, a variant in B. (10) D and K read मृदुभिर्वोटकैः सम्यक्. (11) B reads तप्तं तप्तं. This hemistich and the next one are not found in D. (12) K reads सामुद्रं. (13) D reads पक्तपत्रे. K reads पात्राशपत्रे. (14) D has तद्देतं दद्रवह्निना, which is incorrect.

तावत् पचेत् पचेद्धीमान्[1] यावन्निर्म्मलतां व्रजेत् ।
ततस्तच्छीतले[2] कृत्वा तोये निर्वापयेत्ततः ॥ १४२ ॥
[तावदेव[3] विधिः कार्य्यो यावद्वर्णः समागतः ॥ १४३ ॥
ततस्तत्तापयेद्भूयो गोशकृच्चूर्णसंयुतम् ।
तप्तं तपनतस्तत्र लवणे प्रक्षिपेद्बुधः ॥ १४४ ॥
प्रकृष्टं तु ततो हेम पचेल्लवणगैरिकैः ।
कर्षकेण तु संशोध्य भूयो भूयो विचक्षणः ॥ १४५ ॥
लेपयेत् पुटयेच्चैव वर्णसंजननाय च ।
तारारिष्टं तु देवेशि रक्ततैलेन पाचयेत् ॥ १४६ ॥
निषेचयेच्च शतशो दलं रज्यति रञ्जितम् ॥ १४७ ॥
रसोपरसवर्गं तु निर्वहेन्नागवङ्गयोः ।
नागवङ्गौ पुनः शुल्वे शुल्वं तारे तु निर्वहेत् ॥ १४८ ॥
तारं निषिक्तं देवेशि रक्ततैले पुनः पुनः ।
जायते हेम कल्याणं सर्व्वदोषविवर्ज्जितम् ॥ १४९ ॥
हेमार्द्धेन समायुक्तं रसोच्छिष्टं प्रशस्यते ।
जायते कनकं दिव्यं मातृकासममुत्तमम् ॥ १५० ॥
वङ्गाभ्रं सितताप्यं वा शैलं वा वापयेत् सिते ।
तद्धि तारे दशांशेन वर्णोत्कर्षप्रदं भवेत् ॥ १५१ ॥
अष्टानवतिरंशास्तु तारारिष्टस्य पार्व्वति ।

(1) तावदविषयतो विद्यात्, a variant in D. तावद्विषते विद्यात्, an incomplete variant in K. (2) ततस्तच्छीतलं, a reading in K. (3) The portion within brackets (143—152) is found only in B.

एकैको रसहेमांशः शतवेध इति स्मृतः ॥ १५२ ॥]
अनेन क्रमयोगेण सहस्रांशेन वेधकः[1] ॥ १५३ ॥
मूषां[2] तु गोस्तनीं कृत्वा दलपूर्णां तथा दृढाम्[3] ।
धमेद्दलं निर्म्मलं तत्[4] घृतमुन्मीलितं यदा ॥ १५४ ॥
क्रामणेन समायुक्तं रसं दत्त्वा तु वेधयेत् ।
दलपत्रं रसालिप्तं ताम्रपात्रान्तरे[5] स्थितम् ॥ १५५ ॥
उपरिष्टान्मृदा लिप्तं दत्त्वा मृद्वग्निमेव च ।
वीजसंयुक्तमावर्त्त्य स्थापयेन्मतिमान् सदा ॥ १५६ ॥
टङ्कणं तिलचूर्णं च शीतले तु निवापयेत्[6] ।
रससिद्धं तु[7] कनकं पश्चैकं स्थापयेद्भुवि ।
उद्धृत्य पुनरुद्धाप्य[8] विक्रेयं तत् सुरेश्वरि ॥ १५७ ॥
पुनरन्यं प्रवक्ष्यामि रसवेधो[9] यथा भवेत् ॥ १५८ ॥
तिलसर्षपचूर्णस्य द्वे पले च प्रदापयेत्[10] ।
द्वे पले च हरिद्राया एकत्रैव तु मर्द्दयेत्[11] ॥ १५९ ॥

(1) B has सहस्रांशादिवेधकः. D has सस्राशेन विधायकः, which is incorrect. (2) D and K read मूखां, which is incorrect. (3) दलं पूर्णं तथा दृढं, an incorrect variant in D. (4) D and K read च. (5) B reads ताम्रं पात्रान्तरे. K reads ताम्रपत्रांतरे, which is incorrect. (6) D reads शीतलेन तु पेषयेत्. K reads शितलेन निवापयेत्, which is partly incorrect. (7) D reads रसं विद्धे तु, which is incorrect K reads रसविद्धं तु. (8) D reads पुनरुद्यस्त्र, which is unintelligible. K reads पुनरुत्पाद्य. (9) B reads रसवेद्धाः. D and K read रसवेधं. Both are incorrect. (10) D and K read द्वे पले च हरिद्रया, wherein the last term is incorrect. (11) This hemistich is not found in D and K.

मर्द्दयेन्मृण्मये पात्रे पलपञ्चक[1]पन्नगम् ।
वापयेत् सिद्धसूतेन[2] शलाकां चैव चालयेत्[3] ॥ १६० ॥
पुनश्च वापयेत्तावत्[4] यावत् कठिनतां व्रजेत्[5] ।
तन्नागं जायते दिव्यं जाम्बूनदसमप्रभम्[6] ॥ १६१ ॥
उद्घाटं[7] कथयिष्यामि रसविद्धं च पन्नगम्[8] ॥ १६२ ॥
घोषाकृष्टं तु यत् शुल्वं[9] षोड़शांशेन[10] योजयेत् ।
एकीकृत्य[11] समावर्त्त्य छागमूत्रे निषेचयेत् ।
सर्व्वदोषविनिर्म्मुक्तं जायते हेम शोभनम्[12] ॥ १६३ ॥
लोहवेध इति ख्यातो विस्तरेण सुरेश्वरि ॥ १६४ ॥
यथा लोहे तथा देहे कर्त्तव्यः सूतकः सदा ।
समानं कुरुते देवि प्रविशन्[13] देहलोहयोः ॥ १६५ ॥

(1) D reads पलं चंचक. K reads पलं पंचक. (2) दापयेदन्धमूखेन, a variant in D. K reads वद्वसूतेन. (3) D reads सालांकौ वलापयेत्, which is incorrect. (4) B reads पश्चात्. D reads पश्चादापयेद्धरिद्रा, an incomplete variant in D. (5) K has the following hemistich after व्रजेत् :—संवापयेद्धरिद्रां तु यावत् कठिनतां व्रजेत्. (6) D reads जम्बुनद-समन्वितम्, which is not correct. (7) उद्धारं is the readings in D. (8) D has रससिद्धिं च पाचनम्. K has रसवंधं च पन्नगं. (9) D reads खल्वं तु, which is incorrect. (10) K reads erroneously षोड़शांश. (11) D and K read एकीकृत्वा, which is grammatically incorrect. (12) D has मन शोभनम्, which is incorrect. (13) D reads प्रत्ययात्. K reads प्रत्यचं.

पूर्व्वं लोहे परीचेत ततो[1] देहे प्रयोजयेत् ।
तन्ममाचक्ष्व देवेशि किमन्यच्छ्रोतुमिच्छसि ॥ १६६ ॥

इति श्रीपार्व्वतीपरमेश्वरसंवादे[2]
रसार्णवे रससंहितायां
लोहवेधो नाम[3]
सप्तदशः पटलः ॥ १७ ॥

(1) D reads erroneously वद्दो. (2) B wants this line. (3) D and K have लोहविधानो नाम. This is not correct, as we see in the beginning of the next पटल लोहवेधा: &c. and not लोहविधान.

अष्टादशः पटलः ।

श्रीदेव्युवाच ।

लोहवेधास्त्वया देव यदर्थमुपवर्णिताः[1] ।
तं देहवेधमाचक्ष्व येन स्यात् खेचरी गतिः[2] ॥ १ ॥

श्रीभैरव उवाच ।

प्रथमं शोधयेद्देहं पश्चात् कल्कं समाचरेत् ।
अन्यथा न[3] भवेत् सिद्धिः रसे चैव रसायने ॥ २ ॥
प्रातः प्रातः पिबेदादौ त्रिदिनं घृतसैन्धवम्[4] ।
कैतक्याः स्तनजं[5] क्वाथं तदनु[6] त्रिदिनं पिबेत् ॥ ३ ॥
विधिना स्वेदनं कृत्वा सयवक्षारशर्करम्[7] ।
त्र्यहं पिबेद्वराक्वाथं[8] सदेवासुरवन्दिते[9] ॥ ४ ॥
क्वाथं[10] कटुकरोहिण्याः सम्यक् जाते विरेचने[11] ।
त्रिदिनं यावकान्नं च[12] भुञ्जीत घृतसंयुतम् ॥ ५ ॥

(1) लोहवेधास्त्वया देवि यवर्थमुपवर्णित:, an incorrect variant in D. (2) D reads खेचरा गतिः, which is incorrect. (3) D and K read नान्यथा तु. (4) D reads घृतसैन्धवः, which is incorrect. (5) B has कैतकिस्तनसे. D has कैतव्यास्तमजं. K has कैतक्यास्तनजं. (6) B reads तदातु D reads तद्देते. (7) D reads शर्कराम्, which is incorrect. (8) D has पिवेदत्तिकं, which is incorrect. K has वरक्वाथं. (9) सर्वेषासुरवंदिते, a variant in B. सहदेवासुरवन्दिते, a variant in D. (10) K reads क्वाथ. (11) B reads विरेचनं. (12) B has दिनं यावकान्नं तु.

एलाग्रवीजजन्तुघ्न-गुड़मोदकभक्षणात् ।
कीटस्य पातनं कुर्य्यादथ काकेष्टवारिणा[1] ॥ ६ ॥
वचामरिचसिन्धूत्थ-रजनीकणनागरात्[2] ।
धात्रीगुड़विड़ङ्गाच्च परागं दिवसत्रयम् ॥ ७ ॥
एवं संशोध्य शाल्यन्नं[3] क्षीरमुद्गाम्बुयावकैः[4] ।
ततो जातबलो[5] भूत्वा चरेद्रासायनं विधिम्[6] ॥ ८ ॥
धात्रीरसघृतक्षौद्रैः क्षीरैः सुरतरूद्भवैः[7] ।
तैलं[8] निर्मथ्य देवेशि द्विचतुःषट्पलान्वितम्[9] ॥ ९ ॥
लघुमध्योत्तमैर्मानैः त्रिमासं प्रत्यहं[10] पिबेत् ।
आरोटं[11] भक्षयेत् पश्चात् जीर्णे च तदनन्तरम् ॥ १० ॥
वेधीकृत्य ततो देहं[12] ततो भक्ष्यं तु वर्द्धयेत्[13] ॥ ११ ॥

(1) This śloka is found in B only. (2) D has भक्षणं कणनागरं. K has only न नागरात्. (3) K reads शाल्वस, which is incorrect. (4) क्षीरमुद्गापाचकैः, an incomplete variant in D. (5) जातं वलो, a reading in D, which is incorrect. K reads गतवलो. (6) यतेन्द्रो ते स्वायनविधिं, an incorrect variant in D. रातद्रासायनं विधिं, a partly incorrect reading in K. (7) D reads सरुद्रवैः. K reads सुरतद्रवैः, which is incorrect and incomplete. (8) B reads तैल, which is incorrect. (9) द्विपतुपश्चलान्वितं in B. द्विषट्च पलान्विते in D. Both the readings are incorrect. (10) D reads त्रिमासैः प्रत्यक्. K reads त्रिमासै मध्यभूक्त, which is absurd. (11) "सुशोधितो रसः सम्यक् आरोट इति कथ्यते ॥"—Vide रस. स. Chap. XI. v. 60. (12) D reads देहे. (13) B reads वद्धयेत्. D reads वेधयेत्. K reads वर्द्धं तु भक्षयेत्.

शोधितं व्योमताप्याभ्यां[1] पातितं तदनन्तरम्[2] ।
तन्दुलीयकभृङ्गाह्व[3]-पेषितं वापितं[4] रसम् ।
आरोटमिति सेवेत[5] प्रथमं देहसिद्धये[6] ॥ १२ ॥
अथवा भस्मतां प्राप्तं[7] षट्वारं[8] कल्कयोगतः ।
यावत् संवत्सरं पूर्णं तावदारोटकं भजेत्[9] ॥ १३ ॥

शिलाजतु[10]क्षौद्रविड़ङ्गसर्पि[11]
र्लौहाभयापारदताप्यभक्षम्[12] ।
आपूर्य्यते दुर्बलदेहधातून्[13]
त्रिपञ्चरात्रेण यथा शशाङ्कः ॥ १४ ॥

---

(1) B has शोधितव्योमताभ्यां, an incomplete variant. D has शोधितं व्योमतां याति, which is senseless. K has शोधितं व्योम ताप्यं च. (2) D reads तं तदनन्तरम्, an incomplete charaṇa. (3) तन्दुचक भृङ्गाभ्रं in D. तंदुपतभृंगाभ्रं in K. Both are incorrect variants. (4) योषितं वासितं, an incorrect reading in D. K wants वापितं. (5) D reads प्रारोटमिति संवते, wherein the last term is incorrect. K reads संश्रुते. (6) D reads देहशोधये, which is grammatically incorrect. K reads erroneously देहसिद्धयेत्. (7) B has यातं. D has प्रोक्तं, which is incorrect. (8) B reads वह्नं वा. (9) K reads भवेत्. (10) K reads शिलांजन. (11) K has विडलंगसर्पि. D has क्षौरविडङ्ग-लोहा. K has क्षौद्रवीडांकर्ष, which seems to be partly incorrect. (12) तथाभयपारदताप्यसङ्गा, an incorrect variant in D. (13) आपूर्या दूर्वदैनेव देहे धातून्, an incorrect reading in D. आपूर्य तदलदेहधातून्, also an incorrect reading in K.

वककन्यारसक्षौद्र[1]-द्विनिशात्रिफलागुड़ैः ।
कल्कीकृतं रसं[2] व्योम-कान्त[3]मध्वाज्यसंयुतम् ।
भुक्त्वा गच्छेदमरतां चेत्रीकरणमुत्तमम् ॥ १५ ॥
चूर्णमभ्रकसत्त्वस्य कान्तलोहस्य वा ततः ।
तीक्ष्णस्य वा महादेवि त्रिफलाक्काथभावितम् ॥ १६ ॥
यावदञ्जनसंकाशं वस्त्रच्छन्नं विशोध्य तत्[4] ।
भृङ्गामलक[5]सारेण हरिद्राया रसेन च ॥ १७ ॥
पुटितं रससंयुक्तं[6] मधुघृतसमन्वितम्[7] ।
लोहसंपुटमध्यस्थं मासं धान्ये प्रतिष्ठितम् ॥ १८ ॥
घृतेन मधुना लिह्यात् चेत्रीकरणमुत्तमम् ।
एवं वर्षप्रयोगेण[8] सहस्रायुर्भवेन्नरः ॥ १९ ॥
रससिद्धेः[9] पुरा हेम गुञ्जामात्रं दिने दिने ।
भक्षयेद्देहसिद्ध्यर्थं रससिद्धिः प्रजायते ॥ २० ॥
कान्ताभ्रसत्त्वं सरस-मौषत्कनकजारितम्[10] ।
लिह्यादादौ समध्वाज्यं[11] चेत्रीकरणमुत्तमम् ॥ २१ ॥

---

(1) D has वकएण्यारि सचौद्र, which is incorrect. K has an incomplete charaṇa—कण्यासाचौद्र. (2) D reads कल्कितं तद्रसं. (3) B reads कांतं. (4) D reads वस्त्रच्छिन्नं विशेषतः, which is improper. K reads वस्त्रच्छन्ने विशेषतः, which is partly incorrect. (5) त्रिभागामलक is the reading in D. (6) B has कांचकं घृत. (7) मधुसंमिश्रितं ततः, a variant in B. (8) B reads एवं वर्षोपयोगेन. (9) K reads रससिद्धे, which is grammatically incorrect. (10) D and K have कांताभ्रकसमं सत्वं रसमौषत् प्रयोजितम्. Here रसं is mentioned. (11) लिह्याद्रसं समध्वाज्यं, a variant in D and K. Here रसं is repeated.

वर्षं वर्षार्द्धमथवा पूर्व्वमिवं[1] तु भक्षयेत् ॥ २२ ॥
वज्रजीर्णो रसो[2] देवि ह्युत्तम:[3] परिकीर्त्तित: ।
मध्यमो हेमजीर्णस्तु तारजीर्णोऽधम:[4] प्रिये ॥ २३ ॥
हेमजीर्णे भस्मसूते[5] रुद्रत्वं भक्षिते[6] व्रजेत् ।
विष्णुत्वं तारजीर्णे तु[7] ब्रह्मत्वं भास्करेण तु ॥ २४ ॥
तीक्ष्णजीर्णे धनाध्यक्ष: सूर्य्यत्वं चपलालये तु[8] ।
वाजरे तु[9] शशाङ्कत्वम् अनलत्वं तु रोहणे[10] ।
सामान्येन तु तीक्ष्णेन शक्रत्वं प्राप्नुयान्नर: ॥ २५ ॥
एवं यो लोहजीर्णं तु भक्षयेद्भस्मसूतकम्[11] ।
जलेन जलरूप: स्यात्[12] स्थलेन स्थलतां व्रजेत् ॥ २६ ॥
तेजोऽधिके तथा तेज: वायोरप्यधिको बली ।
हर्त्ता कर्त्ता स्वयं साक्षात् शापानुग्रहकारक: ॥ २७ ॥

---

(1) B and D read पूर्वमिकं. (2) D reads वज्रचाररसो, which seems to be incorrect. (3) K reads उत्तम:. (4) B reads erroneously तारजीर्णसम:. D readsताराजीर्णोधम:, which is also incorrect. (5) हेमजीर्णो भस्मसूतो, a variant in D. हेमजीर्णो भस्मसूतं, a variant in K. (6) D reads भक्षितं. K reads भक्षितो. Both are incorrect. (7) B reads तारजीर्णस्तु. D reads विष्णत्वं तारजीर्णं तु, wherein the first term is incorrect. (8) B has सूर्यत्वं तु पटागले. D has सूर्यत्वं च प्रलम्यते. K has सूर्यत्वं चपगले. (9) D reads वीजरे तु, which is incorrect. (10) This charana is not found in D. K has अमरत्वं तु मारोहणे, which seems to be incorrect. (11) B reads सूतके, which seems to be incorrect. (12) B has जलरूपं च. D has जलरूपस्य (जलरूप: स).

यत्र[1] मूत्रपुरीषं तु साधकस्तु परित्यजेत्[2] ।
पाषाणो मृन्मयं तत्र स्पृष्टं भवति काञ्चनम्[3] ॥ २८ ॥
प्रस्वेदस्तस्य[4] गात्रस्य लोहान्यष्टौ च वेधयेत् ।
तत् सर्व्वं कनकं नित्यं[5] भक्षिते द्वादशे[6] पले ।
रुद्रतुल्यो महादेवि अजरामरकारिणि[7] ॥ २९ ॥
भस्मसूतं तथा तारं[8] भक्षयेत् षोड़शं पलम्[9] ।
अथवा तारजीर्णं तु भक्षयेद्भस्मसूतकम् ।
शुल्वञ्च वङ्गघोषं च[10] तत्स्वेदात् तारतां व्रजेत् ॥ ३० ॥
अथवा[11] तीक्ष्णजीर्णं तु भक्षयेद्भस्मसूतकम् ।
मूत्रेण तस्य स्पृष्टं तु वङ्गं व्रजति[12] तारताम् ॥ ३१ ॥
एकैकेन निषेकेण[13] स्तम्भनं नागवङ्गयो:[14] ॥ ३२ ॥
गुञ्जामात्रं[15] रसं देवि हेमजीर्णं तु भक्षयेत् ।

---

(1) D and K read यस्य, which seems to be incorrect. (2) D has साधकस्य प्रयोजयेत्. (3) This hemistich is not found in K. (4) D reads प्रक्षेपादाङ्ग. (5) D reads गौत्वा. (6) प्रक्षिपेद्द्वादशे, a variant in D. (7) K reads अजरामरकारणं. (8) This hemistich is not found in D. (9) B reads षोड़शे पले, which is grammatically incorrect. This hemistich is not found in D. (10) This hemistich and the next one are not found in B. D reads शुल्वोत्तमं वङ्गघोषे. K reads शुल्वोषं. (11) D reads अन्यथा. (12) B and D read भवति, which is incorrect. [भजति is the correct reading.] (13) D reads निषेकेन. K reads निषेकेन. Both are incorrect. (14) B reads शङ्खसंगयो:. D reads स्तमनं. (15) B reads गुञ्जातान [मात्रं].

द्विगुञ्जां तारजीर्णस्य रविजीर्णस्य तत्त्रयम्[1] ॥ ३३ ॥
तीक्ष्णाभ्रकान्तमाषैकं[2] गुञ्जैका द्राविका भवेत्[3] ।
वज्रवैक्रान्तजीर्णं तु भक्षयेत् सर्पिषान्वितम्[4] ॥ ३४ ॥
नागं वङ्गं रसं भस्म[5] विषोपविषसंयुतम् ।
मात्रायुक्तं ततश्चैव[6] भक्षयेच्च रसायने[7] ॥ ३५ ॥
हेम तारं तथा कान्तं जायतेऽग्निसहं क्रमात् ।
बद्धश्च रसराजोऽयं देहसिद्धिं प्रदापयेत् ॥ ३६ ॥
वज्रायस्कान्तमाक्षीक-वैक्रान्ताभ्रककाञ्चनैः ।
एतैर्जीर्णैर्यथालाभं रसः शस्तो रसायने[8] ॥ ३७ ॥
षड्भेवोपरसांश्चैव[9] भक्षणार्थं च वाहयेत्[10] ।
भक्षणात्तीक्ष्णजीर्णस्य[11] पलमेकं तु भक्षयेत्[12] ॥ ३८ ॥
दशवर्षसहस्राणि वज्रकायः स जीवति[13] ॥ ३९ ॥
एवञ्च द्वादशपलं तीक्ष्णजीर्णं तु भक्षयेत् ।

---

(1) B has चतुर्गुञ्जाः त्रपुजीर्णस्य, which destroys the metre. (2) D has an incomplete charaṇa—तीक्ष्णाभ्रकान्त. K has तीक्ष्णाभ्रकांसमपि. (3) B reads द्रवणी. D wants this charaṇa. K reads द्रावकी, which is not gram. correct. (4) संसेव्य सर्वपयोजितम्, a variant in D. K reads सर्पिषोन्मितम्. (5) D has नागवङ्गवशाकीट. K has नागं वंगं वसा किटि. (6) सूतयुक्तं हेमद्वंद्वं is the reading in D. सूतयुक्तं द्वंद्वं is the reading in K. (7) D has त्यजेत् कश्चिद्रसायने. K wants this charaṇa and the next eleven ones. (8) The ślokas 36th and 37th are not found in D. (9) षड्तेऽस्युरसाश्चैव, a variant in D. (10) B reads न वाहरेत्. D reads चारयेत्. (11) भक्षणात्तस्य तीक्ष्णं तु, a variant in D. (12) भक्षयेत् भक्तिकात्रयम्, a variant in D. (13) This hemistich and the next one are not found in D.

एवं जीवेन्महाकल्पं[1] प्रलयान्ते शिवं व्रजेत् ॥ ४० ॥
भस्मनः शुल्वजीर्णस्य पलैके लक्षमायुषः ।
द्विपले कोटिरायुष्यं त्रिपले ब्रह्मणायुषम्[2] ॥ ४१ ॥
चतुःपले वैष्णवायुः रुद्रायुः पञ्चमे पले ।
षष्ठे पले च संप्राप्ते महाकल्पं स जीवति[3] ॥ ४२ ॥
भस्मनो हेमजीर्णस्य पलेन ब्राह्ममायुषम्[4] ।
द्विपले वैष्णवायुष्यं रुद्रायुस्त्रिपलेन तु[5] ।
चतुःपलेन देवेशि शिवत्वं प्राप्नुयान्नरः[6] ॥ ४३ ॥
हेमजीर्णे भस्मसूते[7] त्रिपले भक्षिते क्रमात्[8] ।
अष्टाशीति[9]सहस्राणि योगिन्यो बलदर्पिताः[10] ।
तस्य तिष्ठन्ति[11] किं कार्य्यं कामरूपी भवेन्नरः ॥ ४४ ॥
यद्यद्भावयते रूपं तत्तद्रूपधरो[12] भवेत् ।
मितैः पलैकादशभिः[13] हेमभस्मानि[14] भक्षयेत् ॥ ४५ ॥

---

(1) एव जीव महाकाले, a variant in D. (2) B reads ब्रह्मणायुतं. (3) This śloka is not found in D. (4) This hemistich is not found in D. K reads पल ब्रह्मपलायुतं, which has no sense. (5) K reads erroneously स्त्रीपलेन. (6) शिवत्वं समवाप्नुयात्, a variant in D. शिवतत्वमवाप्नुयात्, a variant in K. (7) D reads हेमजीर्णं भस्मभूते, which is partly incorrect. (8) B reads erroneously चिफले. त्रिफलेन इति क्रमात्, a variant in D. (9) षष्टाशीति is the incorrect reading in K. (10) D reads वलिदायिने, which is senseless. (11) K reads तिष्ठ तिष्ठति, which is incorrect. (12) D reads तत्तद्भावधरो. (13) जीर्णैः पलैकादशभिः, a variant in B. मितैः पलैर्वा दशभिः, a variant in D. (14) D reads हेमभस्माभि. K reads हेमभस्मापि.

शुल्केकामात्नं देवेशि ज्ञात्वा चाग्निबलं निजम्[1] ।
घृतेन मधुनाच्छाद्य[2] ताम्बूलं कामिनीर्भजेत्[3] ॥ ४६ ॥
एको हि दोषः सूक्ष्मोऽयं भक्षिते भस्मसूतके[4] ।
त्रिसप्ताहं वरारोहे कामान्धो जायते नरः[5] ॥ ४७ ॥
कामिनीनां सहस्रं तु क्षोभयेद्दिवसान्तरे[6] ।
नारीसङ्गाद्[7]वरारोहे देहे क्राम्यति[8] सूतकः ॥ ४८ ॥
नारीसङ्गे[9] वरारोहे ह्यजीर्णं तस्य जायते ॥ ४९ ॥
मैथुनाच्चलिते शुक्रे[10] त्रिसप्ताहावधि[11] क्रमात् ।
जायते प्राणसन्देह[12]स्तस्मात्तन्मैथुनं त्यजेत्[13] ॥ ५० ॥
युवत्या जल्पनं कार्य्यं युवत्या चाङ्गमर्द्दनम्[14] ।
यस्याः[15] स्पर्शनमात्रेण रसः क्राम्यति[16] विग्रहे ॥ ५१ ॥
यथा कामोऽप्युदयति[17] सुस्त्रीरूपनिरीक्षणात् ।

(1) D has क्रत्वाग्निबलं निवेत्, which is incorrect. (2) D reads छाया, which is incorrect. (3) D reads भजेत्, which is not correct. (4) भक्षते भक्ष्यसूतकम्, a variant in D. (5) D reads पुनः, which is not accurate. (6) K reads भक्षयेद्दिवसांतरे. (7) D reads नारीसंग, which is incorrect. (8) K reads क्रामति. (9) D reads नार्यसंगे, which is incorrect. (10) D reads चलते शुक्रः. (11) त्रीसप्ताहावसः, an incorrect variant in D. K has त्रिसप्ताहादयः. (12) D reads erroneously जायते प्राणसन्देहे. (13) तावन्मैथुनं संत्यजेत्, a variant in D. तायंतं मैथुनं त्यजेत्, wherein the first term is incorrect. (14) D reads चागमर्दनम्. K reads मर्द्दिनि. Both are incorrect. (15) K reads नारी. (16) K reads क्रामति. (17) K has पर्य्यांक्षादयते.

तथा[1] क्राम्यति देवेशि सूतकोऽसौ ततः[2] क्रमात् ॥ ५२ ॥
अश्वत्थपत्रसदृशो[3] भगो यस्याः समः शुभः[4] ।
तादृश्याः सुरतं[5] देवि भाजनं तु रसायने ॥ ५३ ॥
निर्मांसश्चैव दीर्घश्च भगः शुष्कशिरास्तथा ।
सदा दारिद्र्यकर्त्तारं वर्जयेत्तं रसायने[6] ॥ ५४ ॥
अर्घ्येण तर्पयेन्नित्यं[7] मत्स्यमांसं निवेदयेत्[8] ।
योगीन्द्रान् योगिनीर्मन्त्रैः[9] पूजयित्वा क्षमापयेत् ।
ककाराष्टकवर्णैस्तु[10] कट्वम्ललवणं त्यजेत् ॥ ५५ ॥
अभ्रजीर्णपलैकेन[11] व्याधिभिर्नाभिभूयते[12] ।
द्वितीये शुक्रवृद्धिः[13] स्यात् तृतीये बलवान् भवेत् ॥ ५६ ॥
चतुर्थे पलितं हन्ति[14] बलीं जयति पञ्चमे[15] ।
षष्ठे श्रुतिधरो वाग्मी सप्तमे नेत्ररोगजित्[16] ॥ ५७ ॥

(1) D reads तत्र. (2) D reads सूतके सेवतः, which is incorrect. (3) प्रद्रुपद्रशा यस्य, an absurd variant in D. (4) यस्य भोगसमं शुभः, an incorrect variant in D. (5) D has ताद्रशांतारसो. K has तादृशास्तुरसो. Both are unintelligible. (6) This śloka is not found in D. (7) आदिनान्तपुने नित्यं, a variant in D. (8) मध्यभागं न वेदयेत्, a variant in D. (9) यामीद्राम्योगिनी मन्त्रं, a variant in D. योगींद्रा योगिनी मंत्र, a variant in K. Both the readings appear to be incorrect. (10) D has ककाराष्टकवर्गें तु. K has ककाराष्टकवर्गं तु. (11) पलमात्रप्रयोगेण, a variant in D. (12) व्याधिना नाभिभूतये, a partly correct variant in D. (13) K reads शुक्रबुद्धिः. (14) न माति पलितवान्, an incomplete variant in K. (15) वलितं जितपञ्चमे, a variant in D. वलिंजितपञ्चमे, a variant in K. Both are incorrect. (16) नेत्ररोगक्रत्, a reading in D.

अष्टमे ताद्यदृष्टि:[1] स्यात् ब्रह्मायुर्ब्रह्मविक्रम: ।
नवपलोपयोगेन[2] सुरमेलापको भवेत् ॥ ५८ ॥
दशपलप्रयोगेण[3] द्वितीय: शङ्करो भवेत् ॥ ५९ ॥
रसवीर्य्यस्य रक्षार्थं बलिं दद्याद्दिने दिने ।
जपेन्मृत्युञ्जयं मन्त्रं रससिद्धि: प्रजायते ॥ ६० ॥
समे तु विमले जीर्णे यो रसं भक्षयेन्नर:[4] ।
दशवर्षसहस्राणि स जीवेत् परमेश्वरि[5] ॥ ६१ ॥
द्विगुणे विमले जीर्णे दशलक्षं स जीवति ।
त्रिगुणे विमले जीर्णे दशकोटिं च जीवति[6] ॥ ६२ ॥
जीर्णे चतुर्गुणे देवि[7] रस: खेचरतां नयेत्[8] ।
तत: पञ्चगुणे जीर्णे स्पर्शवेधी[9] महारस: ॥ ६३ ॥
यादृशं विमले जीर्णे[10] तादृशं हेम-माक्षिके[11] ।
तत् फलं लभते देवि तस्य वीर्य्यं स जीवति[12] ॥ ६४ ॥

(1) मावछ्द्धि:, a reading in D. (2) नवमे पुलोपयोगेन, a variant in D. नवमे लोपयोगेन, a variant in K. (3) D reads दशमे प्रयोगेन, which is incomplete. K reads दशाम्लप्रयोगेन, which is incorrect. (4) रससंभजयेन्नर:, a variant in D. विसरं भक्षयेन्नर:, a variant in K. (5) K reads परमेश्वर:. (6) This hemistich is not found in D. (7) जीवेश्चतुर्गुणे देवि, a variant in D. (8) This charaṇa and the next one are not found in D. (9) D reads शतवेधी. (10) B reads जीर्णं, which is incorrect. D reads यादृशो. K reads यादृशे. (11) D and K read हेममाक्षिकौ. (12) This hemistich is not found in D and K.

पुनरन्यं प्रवक्ष्यामि वज्रभस्मरसायनम् ॥ ६५ ॥
प्रथमं जारयेत्[1] सूते गन्धकं सुरवन्दिते[2] ।
दापयेत्त्रिगुणं तीक्ष्णं समं हेम च सूतके[3] ॥ ६६ ॥
तेनैव हेमजीर्णेन वज्ररत्नं तु[4] लेपयेत् ।
बालवत्सपुरीषेण तद्वज्रं वेष्टयेत्तत:[5] ॥ ६७ ॥
बद्ध्वा पोटलिकां तेन पुटपाकं तु दापयेत् ।
तत्क्षणाज्जायते भस्म शङ्खकुन्देन्दुसन्निभम् ॥ ६८ ॥
तद्वज्रभस्म[6] सुभगे कारयेत् पिष्टिकासमम्[7] ।
तत्सूतगोलकरजो[8] गतदेहं[9] विमर्दयेत् ॥ ६९ ॥
पुनस्तद्गोलकरजो बालवत्सपुरीषकै: ।
मूषालेपं तु तेनैव अर्द्धार्द्धेन[10] तु कारयेत् ॥ ७० ॥
तद्दमेदन्धमूषायां[11] मूर्च्छितं वज्रजारितम्[12] ।
फूत्काराणां सहस्रेण[13] भस्म तज्जायते क्षणात् ॥ ७१ ॥

(1) D reads जायते. K reads मारयेत्. (2) समगन्धं च दीयते, a variant in D. K has an incomplete charaṇa – गंधते. (3) D reads सहसे स च सूतकम्, which is incorrect. K reads समहेम्नो च सूतकं, which is also incorrect. (4) D reads वज्रकं ता तु, which is senseless. (5) This hemistich and the next one are not found in D. (6) D and K read तद्भस्मवज्र, which is grammatically incorrect. (7) D has वर्षयेत् पिष्टिक: समम्. K has घर्षयेत् पौष्टिकासमं. (8) तत्सूतगोलकं भाग, a variant in B. (9) K reads गलदेहं. (10) D reads प्रर्द्धार्द्धेन, which is incorrect. B reads अधोऽर्धेन. (11) B reads धमेत्तदन्धमूषायां: D has an incomplete charaṇa—धमयेदेध. (12) B reads वज्रजारिते. D reads वज्राजारितं. Both are incorrect. (13) B and D read सहस्रे द्वे.

अर्द्धाहं[1] प्राप्यते भस्म गोक्षीरसदृशं प्रिये ॥ ७२ ॥

स्नेहे धृतं[2] च यत्कल्कं कङ्गुणीतैलसंयुतम् ।

त्रिसप्ताहाद्दरारोहे कायशुद्धिस्तु[3] जायते ॥ ७३ ॥

तिलमात्रं वज्रभस्म हेमभस्म च तत्समम्[4] ।

धमेद्धत्तूर[5]संलिप्तं वलीपलितनाशनम् ॥ ७४ ॥

शुद्धहेम पलान्यष्टौ मृत[6]सूतसमायुतम् ।

मर्द्दयेन्मध्यमाम्लेन गोलको भवति क्षणात् ॥ ७५ ॥

अर्द्धं च प्राप्यते भस्म गोक्षीरसदृशं प्रिये[7] ॥ ७६ ॥

मृतवज्रस्य भागैकं गोलभागचतुष्टयम्[8] ।

मर्द्दयेत् तप्तखल्लेन भस्मीभवति सूतकः ॥ ७७ ॥

मारयेद्भूधरे यन्त्रे सप्तसंकलिकाक्रमात् ।

तद्भस्म तु[9] पुनः पश्चात् मध्यमाम्लेन मर्द्दयेत् ॥ ७८ ॥

पुटं दद्यात् प्रयत्नेन षष्ट्यधिकशतत्रयम् ।

तद्भस्म जायते देवि[10] सिन्दूरारुणसन्निभम् ॥ ७९ ॥

तद्भस्म पलमात्रं तु लिह्यान्मध्वाज्यसंयुतम् ।

लिह्यादेवं सप्तवारं क्षीराहारो जितेन्द्रियः ॥ ८० ॥

---

(1) D reads अर्द्धाह्नि. B reads अधोऽर्द्धं. (2) D reads घृतं. (3) D reads कार्य्यसिद्धिश्च. (4) तत्समांशं शमिलयते, an incorrect variant in D. (5) B reads समे धत्तूर. (6) D has धूर्त्तं. K has द्रुत. (7) This hemistich is not found in D. अथ ऊर्ध्वं प्रथमतो भस्म गोक्षीरसदृशं, a variant in K. (8) गोलाभागचतुष्टये, a variant in B. गोलभागा is the reading in D. (9) D reads तद्भस्मना तु, which is grammatically incorrect. (10) तत्समं जायते दिव्यं, a variant in D and K.

द्वितीये सप्तमे चैव[1] भक्षयेच्च पलद्वयम्[2] ।

अनया क्रमवृद्ध्या तु[3] भक्षयेत् सप्तसप्तकम्[4] ॥ ८१ ॥

तद्वृद्ध्या[5] जायते सिद्धो[6] दिव्यतेजा भवेन्नरः ।

रुद्रायुषं भवेत्तस्य[7] खेचरत्वं[8] न संशयः ॥ ८२ ॥

तस्य मूत्रपुरीषाभ्यां लोहान्यष्टौ च काञ्चनम्[9] ॥ ८३ ॥

तद्भस्मपलमेकं तु क्रामणेन समन्वितम् ।

द्रव्याद्द्वादशसाहस्र-पलमाने भुजङ्गमे ।

जायते कनकं दिव्यं देवाभरणभूषणम् ॥ ८४ ॥

कान्तचूर्णपलान्यष्टौ पलान्यष्टौ रसस्य च ।

एकीकृत्याथ संमर्द्य वीजपूराम्लमर्द्दितम् ।

मर्द्दयेत्तप्तखल्लेन गोलको भवति क्षणात् ॥ ८५ ॥

मृतवज्रस्य भागैकं गोलभागचतुष्टयम् ।

एकीकृत्याथ संमर्द्य भस्मीभवति सूतकः ॥ ८६ ॥

मारयेद्भूधरे यन्त्रे सप्तसंकलिकाक्रमात् ।

तद्भस्मभागमेकन्तु भागैकं गन्धकस्य च ।

अन्धमूषागतं ध्मातं खोटो भवति तत्क्षणात् ॥ ८७ ॥

द्वात्रिंशन्मृतखोटस्य शुद्धहेम्नश्च विंशतिः ।

---

(1) B reads सप्तके चैव. K reads प्रथमेनैव. (2) B has भक्षद्देत्तद्-यवद्वयम्. (3) B reads erroneously अनेन क्रमवृद्ध्या तु. D has an absurd variant प्रवया क्रमवध्वा च. (4) K reads सप्तसायकं, which is incorrect. (5) D and K read वर्द्धते. (6) K reads सिद्धिः. (7) B reads भवेत्तेन. (8) K reads चमरत्वं. (9) The following nineteen hemistichs are not found in D and K.

तारं ताम्रं व्योमसत्त्वं कान्तसत्त्वं चतुर्थकम् ।
एकैकं द्वादशांशाः स्युः सर्व्वमेकत्र कारयेत् ॥ ८८ ॥
अन्धमूषागतं ध्मातं खोटो भवति तत्क्षणात् ।
द्वात्रिंशन्मिलतः खोटान् सूक्ष्मचूर्णं तु कारयेत् ॥ ८९ ॥
तत् खोटसूक्ष्मचूर्णं तु आरोटरससंयुतम् ।
मर्द्दयेन्मध्यमाम्लेन गोलको भवति क्षणात् ॥ ९० ॥
गोलकस्य पले द्वे च मृतकान्तस्य तत्समम् ।
एकीकृत्याथ संमर्द्य मेघनादरसेन च ।
मुनिपुष्परसेनैव दिनमेकं च मर्द्दयेत् ॥ ९१ ॥
गुटिकाः[1] कारयेद्देवि षष्ट्यधिकशतत्रयम्[2] ॥ ९२ ॥
तत्रैकां गुटिकां सर्पिस्त्रिफलामधुसंयुताम् ।
भक्षयेद्वर्षमेकं तु ब्रह्मायुर्जायते नरः ॥ ९३ ॥
सर्व्वास्ता भक्षयेत् पश्चात् रुद्रायुः स भवेन्नरः[3] ॥ ९४ ॥
अथैका धारिता वक्त्रे[4] गुटिकामरसुन्दरि ।
हठाद्रोगाणि कृत्स्नानि[5] पलितानि च नाशयेत् ॥ ९५ ॥
उपचारं प्रवक्ष्यामि वज्रसत्त्वरसायने[6] ॥ ९६ ॥
वज्रबद्धस्तु यो[7] देवि रसोऽयं वज्रतां नयेत् ।

(1) B reads घुटिकां. (2) B reads सहस्रकम्. (3) This hemistich is not found in D and K. (4) अष्टैकां धारिते वक्त्रा, an incorrect variant in B. This hemistich is not found in K. (5) रोगाणि is grammatically incorrect. [रोगान् is the correct term]. (6) वज्र-भस्मरसायनं, a variant in B. वज्रात् सत्वं रजायते, a variant in D. (7) D reads erroneously वज्रवन्धस्तपो.

तेन बद्धास्तु ये देहास्ते देहा वज्ररूपिणः ॥ ९७ ॥
तिलमात्रं रसं[1] देवि ब्रह्मायुर्दश[2] जीवति ।
यवमात्रं रसं देवि विष्णुकोटिं स जीवति[3] ॥ ९८ ॥
गुञ्जामात्रं तु[4] देवेशि महाकल्पायुषो भवेत् ।
माषमात्रं वरारोहे मम तुल्यगुणो भवेत् ॥ ९९ ॥
मन्त्रहीनेन[5] सुभगे न स गम्यो[6] भविष्यति ।
न सिद्धिसाधनं[7] तस्य जन्मकोटिशतैरपि ॥ १०० ॥
मूढ़चित्तो भ्रमत्येष कुलशासनवर्ज्जितः[8] ॥ १०१ ॥
तस्य विघ्न[9]सहस्राणि कुर्व्वते[10] देवदानवाः ।
देव्यश्चाकाशगामिन्यो भूचर्य्यश्च[11] सुरेश्वरि ॥ १०२ ॥
स्वप्ने तं भजयित्वा तु[12] रेतोरक्ते हरन्ति ताः[13] ।

(1) B and D read तिलमात्ररसो. [Here भक्षयित्वा is to be understood.] (2) D reads दैश, which is incorrect. (3) This hemistich is not found in B and D. (4) B reads गुञ्जामात्रेण. (5) B reads मन्त्रहीने. (6) B reads मशिवाजा, which is unintelligible. K reads नाशनाय. (7) D reads न सिद्धिः साधनं. (8) मूढ़चित्ता भ्रमन्त्येषा, a partly incorrect variant in D. मूढ़ार्चिता भ्रमन्त्येषु, an incorrect variant in K. (9) D and K read विद्या, which is incorrect. (10) D and K read कुर्वते, which is inc. (11) D reads भूवर्जस्य, which is not correct. (12) स्वप्नां ते य भजयित्वा, a variant in B. सत्वं भक्षयित्वा तु, an incomplete charaṇa in D. स्वप्ने तोयं जयित्वा तु, a variant in K. (13) B has रसोरक्ते हरति ये, an incorrect variant. D has रेतोरक्तहरि प्रिये, K has रसोरक्तहरः प्रिये. Both are incorrect.

तेनैव रेतोमार्गेण[1] हरन्ते भक्षितं[2] रसम् ॥ १०३ ॥
भास्कराद्या ग्रहा देवि गर्ज्जन्ति निजरूपत:[3] ।
क्षत्रियस्य तु रूपेण देवा वै गर्ज्जयन्ति च[4] ॥ १०४ ॥
पिशाचा वैश्यरूपेण[5] शूद्ररूपेण[6] राक्षसा: ।
अन्ये मानुषरूपेण भजन्ते स्वपनान्तरे[7] ॥ १०५ ॥
अस्थिमांसानि खादन्ति स्वप्नेषु[8] सुरसुन्दरि ।
स्वप्नान्ते प्राप्यते श्रांति:[9] प्राय: पश्यति मानव:[10] ।
वज्रभस्म हरन्त्येव[11] स्वप्नान्ते क्षोभयन्ति च ॥ १०६ ॥
भक्षिते हेमविमले पलायन्ते दिशो दश ।
भूतप्रेतपिशाचाश्च शाकिन्यो गुह्यकादय:[12] ॥ १०७ ।
वज्राणां मारणे ये तु[13] लोहानां वा रसस्य तु[14] ।

(1) D reads हेमार्केन, which is absurd. (2) B reads रक्षितं, which is incorrect. D and K read रंजितं भक्षितो, which is also incorrect. (3) गर्जन्तीतीजरूपत:, an incorrect variant in K. (4) देवि वेशेन भज्जति, an absurd reading in D. देवि वैर्जयन्ति च, an incorrect and incomplete charaṇa in K. (5) D and K read विश्वरूपेण, which is incorrect. (6) D reads शुद्ररूपेण. K reads शूद्रारूपेण. Both are incorrect. (7) भुज्यते स्वप्नान्तरे, an incomplete variant in B. D reads भजतो, which is incorrect. K reads भुंजते, which is also incorrect. (8) B reads स्वप्ने हि. (9) D reads प्रापयेत्तेन. K reads प्राप्य एतेन. (10) पश्यन्ति मानवे, a variant in D. (11) वज्रभक्षोदरं तेन, a variant in D and K. (12) B reads काकिन्यो. K reads किन्नरो. (13) B reads मारणं ये तु. D reads वज्रिणां मारणं तुल्यं. K reads मरणां तु. (14) द्वयमाररसस्य च, a variant in D, which seems to be incorrect.

वर्ज्जनीया: प्रयत्नेन[1] प्रयुक्तांस्तान् शृणु[2] प्रिये ॥ १०८ ॥
तेषां युक्तिप्रकारास्तु[3] प्रयुक्ता युक्तिदायकै:[4] ।
एवं वदन्ति भूताद्या भीषयन्ति स्म तं नरम्[5] ॥ १०९ ॥
रञ्जको रागकारी[6] स्यात् क्रामण: क्रामणे हित:[7] ।
बन्धका दृढ़काराश्च[8] तथा पुष्टिकरा: स्मृता:[9] ॥ ११० ॥
शुक्रशोणितविण्मूत्रे विविधेन तु भक्षयेत् ।
कुष्ठव्याधिकरं तच्च[10] नागवङ्गकलङ्कितम्[11] ॥ १११ ॥
त्रिफलाजातिकङ्कोलं कर्पूररससमिश्रितम् ।
खदिरं समतोयेन मर्द्दितं भक्षयेद्रसम् ॥ ११२ ॥
पयसा कटुकं दृष्ट्वा[12] पथ्यं[13] क्रामणमुत्तमम् ।

(1) ते वर्जनीया यत्नेन, a variant in B. (2) B has प्रयुक्ता-श्रवण. D has प्रसक्तायवणा. K has प्रयुक्ता: श्रवण. (3) तेषां युक्तिकरा ये तु, a variant in B and K. (4) प्रयुक्ता युक्तिकादय:, a variant in B. प्रयुक्तं युक्तिकादय:, a variant in D. (5) This hemistich is not found in D and K. (6) B reads रंजिको. D reads रणकारी. Both are incorrect. (7) क्रामणोत्क्रामणोदितम्, a variant in D. K reads erroneously क्रामणो क्रामणे. (8) बद्धका दृढ़कायाश्च, a variant in B. D reads बन्धको. बद्धा दृढ़कराश्चैव, a variant in K. (9) B reads मता:. (10) कुष्टव्याधिकरं चैव, a variant in D. कुष्टव्याधिकरी ताश्च, a variant in K. (11) नागवंगकलक्षितो, a variant in D. भागवंगकलंकितो, a variant in K. (12) D reads दृष्टा, which is incorrect. (13) D and K read वस्तु.

स्तन्येन हंसघृष्टेन न खाद्योऽयं[1] सुरेश्वरि ॥ ११३ ॥
अलम्बुषायस्कान्तस्य[2] तालकस्य[3] च भक्षणात् ।
देहे[4] क्रामति सूतेन्द्रो नात्र कार्य्या विचारणा ॥ ११४ ॥
अवश्यं क्रमते सूतः स्त्रीयोगे क्रामणं परम् ।
ब्रह्मचर्य्येण वा योगी[5] सदा सेवेत[6] सूतकम् ॥ ११५ ॥
समाधिः कारणं तत्र[7] क्रामणं परमं मतम् ॥ ११६ ॥
प्रभाते भक्षयेत् सूतं[8] पथ्यं[9] यामद्वयाधिके ।
नो लङ्घयेत् त्रियामं तु मध्याह्ने न तु[10] भोजयेत् ॥ ११७ ॥
अतिपानं चात्यशन[11]-मतिनिद्रातिजागरम् ।
स्त्रीणामतिप्रसङ्गं चात्यध्वानं च विवर्ज्जयेत्[12] ॥ ११८ ॥
अतिकोपं चातिहर्ष-मतिलौल्य-मतिस्पृहाम्[13] ।
शुष्कवादं जलक्रीड़ामतिचिन्तां च वर्ज्जयेत्[14] ॥ ११९ ॥
कुष्माण्डं कर्कटीं चैव कालिङ्गं[15] कारवेल्लकम्[16] ।

(1) B has न खंड़ोयं. D has खंप्रेयर. K has न खंडोयं. (2) D reads अलंबुमायसंकाशं, which is incorrect. (3) D reads वालकस्य, which seems to be incorrect. (4) B reads देहं. (5) D and K read ब्रह्मचर्य्यं न वा कुर्य्यात्. (6) D and K read पादांशेनैव. (7) D and K read तस्य. (8) D and K read सूते, which is incorrect. (9) D reads पत्र, which is incorrect. (10) B reads मध्ये न तु, which is incomplete. (11) D reads चात्ययान. (12) वचनं चाति वर्जयेत्, a variant in D and K. (13) B reads यतीनहं. D reads मनस्पृहं. Both are incorrect. (14) अतिवीचां विवर्जयेत्, a variant in D. (15) D reads कलिङ्गं. (16) K reads कारवल्लिकां.

कुसुम्भकञ्च कर्कोटं[1] कदलीं काकमाचिकाम्[2] ।
ककाराष्टकमेतद्धि वर्ज्जयेद्रसभक्षकः[3] ॥ १२० ॥
पातकं च न कर्त्तव्यं पशुसङ्गं विवर्ज्जयेत्[4] ।
लिङ्गच्छायां[5] न लङ्घेत नारीच्छायां तथैव च[6] ॥ १२१ ॥
चतुःपथे न गन्तव्यं[7] विण्मूत्रं न च लङ्घयेत् ।
सुराणां निन्दनं देवि[8] स्त्रीणां निन्दां च वर्ज्जयेत्[9] ॥ १२२ ॥
सत्यं च वचनं ब्रूयादप्रियं न वदेद्वचः[10] ॥ १२३ ॥
कुलत्थमतसीतैलं तिलान् माषान् मसूरकान्[11] ।
कपोतकं काञ्जिकान्नं तक्रभक्तं च वर्ज्जयेत् ॥ १२४ ॥
कट्वम्लतीक्ष्ण[12]लवणं पिच्छिलं[13] पित्तलं च यत् ।
तिलतैलं दधि क्षीरं[14] द्राक्षाकोलपरूषकम्[15] ॥ १२५ ॥
वदरं करविल्वञ्च[16] सहकारं सुवर्च्चलम् ।

(1) कुसुंभं काचककोंटं, a variant in D. K reads कुंभीककोंटी, which is incomplete. (2) B reads काचमारीका, which seems to be incorrect. (3) B reads भक्ष्यभक्षकः. (4) पशुसंगं च वर्जयेत्, a variant in K. (5) K reads लिंगच्छायां. (6) B reads न लङ्घयेत्. (7) B reads न कर्त्तव्यं. (8) देवतानां न निंदेदं, a variant in D. वीराश्च निंदयेद्देवि, a variant in K. (9) D reads स्त्रीणियां, which is incorrect. K reads स्त्रीनिंदां चैव वर्जयेत्. (10) दप्रियो न वदेद्बुधः, a variant in B, which is partly incorrect. (11) B reads मसूरिकां. D reads मसूरिकाः. Both seem to be incorrect. (12) B reads तिक्त. (13) D and K read पिच्छलं. (14) तिलतैले दधिक्षारे, a variant in B. (15) द्राक्षाख्यो पनसं ततः, a variant in D and K. (16) B reads नारिकेलञ्च.

नारङ्गं काञ्चनारञ्च[1] शोभाञ्जनमपि त्यजेत् ॥ १२६
क्षुधार्त्तो नैव तिष्ठेत अजीर्णं नैव[2] कारयेत् ।
न वादजल्पनं[3] कुर्य्यात् दिवास्वापं न कारयेत्[4] ॥ १२७ ॥
नैवेद्यं नैव भुञ्जीत कर्पूरं वर्ज्जयेत् सदा ।
कुङ्कुमालेपनं वर्ज्यं वर्ज्जयेन्नटनं क्षितौ ॥ १२८ ॥
नाग्निं स्पृशेत्तु[5] पादेन न गा वा[6] ब्राह्मणांश्च च ।
न हन्यात्तु कुमारीं च वातुलानपि[7] वर्ज्जयेत्[8] ॥ १२९ ॥
दिवारात्रं जपेन्मन्त्रं स्नातव्यं च दिने दिने ॥ १३० ॥
हितञ्च मुद्गा[9] दुग्धान्नं शाल्यन्नं च समाहितम्[10] ।
शाकं पौनर्नवं[11] देवि मेघनादं च वास्तुकम् ।
सैन्धवं नागरं मुस्तां पद्ममूलानि भक्षयेत् ॥ १३१ ॥
उद्भिन्नचूचुका[12] श्यामा सुरूपा सुभगा शुभा ।

(1) B reads विनारंगं. (2) K reads न च. (3) B reads वादजल्पं, which renders the charaṇa incomplete. (4) दिवाचारी न पर्यटेत्, a variant in B. (5) D reads स्पृशेत, which is grammatically incorrect. (6) B, D and K read न गावो, which is grammatically incorrect. (7) B reads मातुलानीं. D reads मातुलानां, which is incorrect. (8) After this śloka we find in B the following hemistich कुर्य्यात्तिनैव तिष्ठेत अजीर्णं न च कारयेत्, which we have rejected, the first charaṇa being absurd, and the second being a repitition. (9) K wants मुद्गा. (10) B, D and K read समाहित:, which is not accurate ; समाहितं here means विशोधितं and qualifies शाल्यन्नं. (11) D reads पुनर्नावं. K reads शाकं च पुन:, an incomplete charaṇa. (12) D reads erroneously उद्गतं चुलका.

दिव्यतेज:समायुक्ता कामशक्तिविवर्द्धिता[1] ।
सन्निधाने च कर्त्तव्या हृद्येश्च[2] परिरक्षिता ॥ १३२ ॥
कृष्णागौरातिवृद्धाङ्गीं[3] कुशीलां न भजेत् क्वचित् ॥ १३३ ॥
तिलकं कुङ्कुमं गन्धं[4] कस्तूर्य्या च मनोहरम् ।
सुरभीणि च पुष्पाणि सुखशय्येष्टभोजनम् ॥ १३४ ॥
सुखवासित्वमेवोक्तं[5] क्रामणं सूतकस्य तु ।
आत्मज्ञानकथां पूजां[6] शिवस्य तु विशेषत: ॥ १३५ ॥
एतांस्तु[7] समयान् भद्रे न लङ्घेद्रसभक्षणे ।
लङ्घनादिविधं लक्ष्यं लक्षणं तस्य[8] कथ्यते ॥ १३६ ॥
रसराजे त्वजीर्णे तु[9] प्रत्ययोऽयं भवेत् प्रिये ।
मूर्च्छा शोको भ्रम: कम्प: छर्द्दिर्मोहो ज्वरस्तथा[10]॥१३७॥
हिक्कावेपथुशूलानि[11] निद्रालस्यमरोचकम्[12] ।
लिङ्गस्तम्भो ह्यतीसार:[13] कासश्वासविजृम्भिका:[14] ॥१३८॥
कर्णास्यचक्षु:कुक्षौ च वृषणोदर[15]मूर्द्धनि ।

(1) B reads विवर्जिता. (2) भृत्यैश्च परिरक्षिता, a variant in D. K reads हृद्धेन. (3) D reads सर्वाङ्गी. K reads सर्वाणि, which is incorrect. (4) तिलकुङ्कुमगन्धं च, a variant in D. तिलकुंकुमकं गंधं, a variant in K. (5) D reads मत्तोक्तं. (6) B, D and K read प्राज्ञा. (7) D reads एकतन्तु, which is incorrect. (8) D reads मत्र. K reads चात्र. (9) रसराजि तु जीर्णे तु, an incorrect variant in D. (10) छर्दिमूर्च्छाग्रहो ज्वर:, a variant in B. (11) D reads ज्वलनं. (12) B, D and K read अरोचक:. (13) B reads ह्यतीचार:. K reads ह्यतिसार:. (14) B reads विजृंभका:. (15) B reads जठरोदर.

मेढ्रे दाहोऽग्निमान्द्यञ्च[1] जात: सर्व्वाङ्गसंशय: ॥ १३९ ॥
अन्यांश्चैव महाव्याधीन् रसाजीर्णे तु[2] लक्षयेत् ॥ १४० ॥
काञ्जिकं[3] सर्जिकाक्षारं कारवल्ली[4]रसप्लुतम् ।
गोमूत्रसैन्धवयुतं[5] तस्य संक्रामणं[6] पिबेत् ॥ १४१ ॥
मोचकस्य रसं देवि राजकोषातकीरसम् ।
सिन्धुकं कृष्णगोमूत्रं कारवल्लीरसप्लुतम् ।
सौवर्च्चलसमोपेतं रसाजीर्णे पिबेन्नर:[7] ॥ १४२ ॥
रसाजीर्णे न जीवेत्तु म्रियते नात्र संशय: ।
रसायने सुजीर्णे तु तेन सर्व्वं विधीयते[8] ॥ १४३ ॥
यदा सुप्तस्तदङ्गं च[9] स्त्री स्तनेनैव घर्षयेत् ।
वामेन मर्द्दयेदेवं सूत: क्रामति निर्व्यथ:[10] ॥ १४४ ॥
निवाते निर्जने स्थाने भूगृहे निरुपद्रवे ।
शीतातपविनिर्मुक्त:[11] पथ्याशी लघुभोजक:[12] ।

(1) मेढ्रदाहोऽग्निवंधश्च, a variant in B. मेढ्रं दाहाग्निसंदाय, a variant in D. मेददाहोग्निसंदश्च, a variant in K. (2) B reads रसाजीर्णं. K reads रसेजीर्णे. (3) B reads काञ्जीक. (4) B reads कारवेल्लि. D reads करवल्ली. (5) This hemistich and the next two are not found in D. K has गोमूत्रं दैंधवं सृतं. (6) K reads तस्य तं क्रामणं. (7) B reads पिबेद्रस:, which is incorrect. (8) B has स भवेत् साधु वध्यते, which has no sense. (9) ते सूतेस्तदंगंच, a variant in B. तेऽपि सुप्तस्तदङ्गे, a variant in D. K has an incomplete hemistich तेपि सुप्रस्ते तेनैव...येत्. (10) K wants this term. (11) D and K read विनिमुक्तो, which is grammatically incorrect. (12) B reads लघुभुजत:. D reads शीलभुगनर:. K reads लघुभंजक:. All are incorrect.

यथोक्तदिवसै:[1] सिद्धिं प्राप्नुयान्नात्र संशय: ॥ १४५ ॥
सर्व्वाहारेण[2] दिवसैर्द्विगुणै: सिद्धिमाप्नुयात् ।
सेवनाच्छीतवाताभ्यां[3] त्रिगुणैर्दिवसै: क्रमात् ।
अतिमार्गस्य धर्म्मैश्च[4] दिवसैस्तु चतुर्गुणै: ॥ १४६ ॥
तत्र वेधं प्रवक्ष्यामि देहसिद्धिकपूर्व्वकम्[5] ।
तव स्नेहेन देवेशि प्रोक्तमेव रसायनम्[6] ॥ १४७ ॥
त्वग्वेध: प्रथमं देवि[7] मांसवेधो[8] द्वितीयक: ।
तृतीयो रक्तवेधस्तु[9] चतुर्थश्चास्थिवेधक:[10] ॥ १४८ ॥
पञ्चमो मज्जवेध: स्यात्[11] नाड़ीवेधस्तु षष्ठक:[12] ।
सप्तमो धातुवेधश्च[13] अष्टम: कवचस्य तु ॥ १४९ ॥
त्वचावेधेन देवेशि पन्नग: कुटिलो भवेत् ।
मांसवेधेन सुभगे कुटिल: काञ्चनं भवेत्[14] ॥ १५० ॥

(1) D reads यथोक्ता दशंये, which is incorrect. (2) D has सिद्ध्यावहारेण. K has सद्यवहारेण. Both are incorrect. (3) B reads सेंधनाच्छीतवाताभ्यां. D reads ये जना चिति वा सिद्धि. K reads सेवनाच्छिसी-वाताभ्यां. All are incorrect. (4) D reads अध्वनि मार्गस्य धर्मे च, which is incorrect. K reads अधाम, which is also incorrect. (5) This hemistich and the next one are not found in D. (6) K reads मपूर्वत:. (7) D reads देशं, which is incorrect. (8) B reads मांसवेधी, which is not correct. D reads खंवेधी, which is also incorrect. (9) D and K read चीरवेधस्तु. (10) चतुर्थशाधिवेधक:, an incorrect variant in D. (11) D has वज्रवेधश्च. K has वज्रवेधश्च. Both seem to be incorrect. (12) D has षष्ठम:, which is incorrect. (13) B and D read चक्षुवेधश्च. (14) This śloka is not found in D.

अस्थिवेधेन देवेशि तीक्ष्णं कनकतां व्रजेत् ।
मज्जवेधो[1] वरारोहे लोहान्यष्टौ च वेधयेत् ॥ १५१ ॥
कवचस्य तु वेधेन मृन्मयं काञ्चनं भवेत् ।
वेधे तु[2] हेमविमले मज्ज्ञो[3] हेम प्रजायते ॥ १५२ ॥
तारे[4] मांसं सुरेशानि जीर्णसूतश्च वेधयेत् ।
अलके[5] विमले ताप्ये तीक्ष्णे तारे च[6] भास्करे ॥ १५३ ॥
क्रामणे तु भवेत्तक्रं शर्करा माक्षिकं तथा ।
कपिलाकृष्णगोतक्रं तत्तु[7] देवि रसायने[8] ॥ १५४ ॥
सात्त्विकं गव्यतक्रं तु राजसं सारसोद्भवम्[9] ।
तामसं माहिषं[10] तक्रं देयं नैव[11] रसायने ॥ १५५ ॥
आर्द्रकस्य रसो देवि तथा पूग[12]फलानि च ।
मर्द्दनं नवनीतेन रसस्य क्रामणं परम् ॥ १५६ ॥
अधमं शाकमूलोत्थं मध्यमं फलमूलजम् ।
उत्तमं देवदेवेशि रसकं तु रसायने ॥ १५७ ॥

(1) B and K read मज्जावेधे. (2) B reads वेधं तु. (3) B reads मज्जनात्. D and K read मज्जानां. (4) B reads तारं. (5) D reads अल्पकौ. K reads अष्टकौ. Both seem to be incorrect. (6) K reads तीक्ष्णतारे च. (7) K reads तत्र. (8) B reads रसायनं. (9) रागसंख्या रसोद्भवम्, a variant in B. (10) D reads पेषितं. K reads भेषिजं. (11) B has रसे चैव. But D and K have देयं नैव. We have adopted the latter opinion, since तामस is the worst of the kind. (12) D reads तथा पूगी.

तीक्ष्णवेधेन नीलाभः[1] ताम्रेणारुणसंप्रभः ।
रजतेनेन्दुसंकाशो[2] हेम्ना काञ्चनसन्निभः[3] ॥ १५८ ॥
धूमावलोकी वक्रस्थो[4] मासात् खेचरतां नयेत्[5] ।
स्पर्शवेधी तु वक्रस्थो[6] द्विमासात् सिद्धिदायकः ॥ १५९ ॥
शतकोटिस्त्रिभिर्मासैः चतुर्भिर्दशकोटिकः[7] ।
पञ्चभिः पञ्चकोटिश्च[8] षड्भिः स्यात् कोटिवेधकः[9] ॥१६०॥
एवं क्रमेण कुरुते शरीरमजरामरम् ।
अणिमादिगुणैश्वर्यमात्रासिद्धिः प्रजायते[10] ॥ १६१ ॥
सप्तभिर्लक्षवेधी स्यादष्टाभिश्चायुतं पुनः[11] ।
सहस्रं नवभिर्मासैर्दशमासैः शतं पुनः ॥ १६२ ॥
तस्य मूत्रपुरीषैस्तु श्लेष्मणाङ्गमलैस्तथा ।
लेपाद्धेमत्वमायान्ति[12] पाषाणादीनि[13] भूतले ॥ १६३ ॥
चतुःषष्ट्यंशतो वेधी मासैकाद्दशवेधकः ।

(1) तीक्ष्णवङ्गेन नीलाभं, a variant in B, which seems to be incorrect. D and K read नीलाभं. (2) This charaṇa is not found in D. (3) B reads हेम. D wants this hemistich. (4) धामावलोकी चक्रस्थो, an incorrect variant in D. (5) मासं खेचरतां व्रजेत्, a variant in D. (6) D reads वक्रस्थो, which is incorrect. (7) D reads दशकोटिभिः. K reads दशकोटयः. (8) कोटिवेधी पञ्चभिर्मासैः, a variant in D. (9) B reads दशकोटिकृत्. D reads षण्मासैः instead of षड्भिः स्यात्. K reads दशकोटयः. (10) D and K read प्रवर्त्तते. (11) D has दृष्टभिश्च पुनः पुनः. (12) चेपयचर्द्धमत्व, an incorrect variant in D. (13) B reads यानि लोहानि.

द्वात्रिंशांशकवेधी तु[1] वर्षाद्देहं तु वेधयेत्[2] ॥ १६४ ॥
कुञ्चिताग्रास्तु यत्केशा या श्यामा[3] पद्मलोचना ।
विस्तीर्णं जघनं यस्याः[4] सङ्कीर्णं हृदयं भवेत् ॥ १६५ ॥
कृष्णपक्षे भवेद्यस्या युवत्याः पुष्पदर्शनम्[5] ।
कामिनी सा समाख्याता उत्तमा च रसायने ॥ १६६ ॥
आलिङ्गने स्पर्शने च[6] मैथुनालापयोरपि[7] ।
सर्व्वरोगविनिर्म्मुक्तो बलीपलितवर्ज्जितः ॥ १६७ ॥
नासौ छिद्येत शस्त्रैश्च पावकेन न दह्यते[8] ।
वायुवेगो महातेजाः कामदेव इवापरः ॥ १६८ ॥
इच्छया जायते दृश्यो ह्यदृश्यश्चैव[9] जायते ।
तस्य[10] संस्पर्शमात्रेण सर्व्वलोहानि काञ्चनम् ॥ १६९ ॥
तस्मिन्नेकार्णवे घोरे नष्टस्थावरजङ्गमे[11] ।
देवा यत्र विलीयन्ते[12] सिद्धस्तत्रैव लीयते[13] ॥ १७० ॥

(1) द्वात्रिंशत् कोटिवेधी च, a variant in D. (2) वर्षाद्दा हेम वेधयेत्, a variant in D. (3) D reads श्यामा या. K wants this hemistich and the next one. (4) B reads विस्तीर्णजघनं तस्याः, which is not accurate. (5) D reads पुष्पकर्मणि, which is incorrect. (6) आलिङ्गेन स्पर्शनेन, a variant in B. आलिंगेन स्पर्शने च, a variant in K. (7) D reads erroneously मैथुनार्थं ययोरपि. (8) पाकेन च विद्यते, an incorrect variant in D. (9) संदृश्यश्चैव, a reading in D and K, which is incorrect. (10) D reads erroneously तस्याः. (11) नष्टे स्थावरजङ्गमे, a variant in D. (12) K reads विलिंपते. (13) सिद्धि-स्तत्रैव जायते, a variant in D.

इदं रहस्यं परमं मया प्रोक्तं[1] सुरेश्वरि ॥ १७१ ॥
साधुसज्जनसारज्ञा रसजीर्णक्रियापराः ।
रसवादीति संप्रोक्ता[2] इतरे द्वेषवादिनः[3] ॥ १७२ ॥
पुनरन्यां[4] प्रवक्ष्यामि गुटिकां रसदुर्ल्लभाम् ॥ १७३ ॥
वङ्गसीसकशुल्वाभ्र-हेमतारसमन्वितः[5] ।
वज्रायसादिभिर्युक्तः क्रियते वादिकैः[6] रसः ॥ १७४ ॥
सर्व्वांस्तानेकतः कृत्वा[7] मूषामध्ये स्थितान्[8] धमेत् ।
गुटिका जायते दिव्या नाम्ना वज्राङ्गसुन्दरी ॥ १७५ ॥
मुखस्था सिद्धिदा प्रोक्ता जरामृत्युविनाशिनी ॥ १७६ ॥
संग्रामे विजयी वीरो वज्रदेहो महाबलः ।
सर्व्वलोकप्रियो नित्यं नारीणां सुभगस्तथा ॥ १७७ ॥
वज्रव्योमजसत्त्वकं सकनकं[9] चन्द्रं रविं कान्तकं[10]
नागं वङ्गमथायसं[11] दृढ़तरं सूतं कृतं तत्समम्[12] ।

(1) B reads गोक्तं. This hemistich and the next three are not found in D. (2) B reads रसवादी इति प्रोक्ताः. K reads रसवादि इति प्रोक्तं. (3) B has दूषणवादिनं, which is incorrect. (4) K reads पुनरन्यं, which is not correct. (5) D reads समन्वितैः. (6) B reads वादको. (7) B reads सर्वोंस्तामेकीकृतं, which is incorrect. (8) D reads मूखामध्ये स्थितो. K reads मूखामध्ये स्थिता. Both are incorrect. (9) D has वज्राकोकनकं. K has वज्रतां सङ्गनकं. Both are incorrect. (10) D reads चांद्रं रविसम. K reads चांद्रं रविं कांतकं. Both are incorrect. (11) B reads नागं वंगतीक्ष्णसुरायसं. D reads तीक्ष्णं कान्तं सदायसं. K reads तीक्ष्णं कान्त तथायसं. (12) सूतकं कृष्णं तत्समं, an incorrect variant in D.

वक्त्रस्थं रसगोलकं रतिकरं सर्व्वार्थदं तापहं[1]
वर्षैकेन निहन्ति दोषनिचयं कल्पायुषो जायते ॥१७८॥
पूर्व्वसिद्धरसे[2] देवि पादांशं[3] हेम योजयेत् ।
मृतवज्रपलांशेन[4] व्योमसत्त्वं प्रयोजयेत् ॥ १७९ ॥
चीरकञ्चुकितोयेन सुरदालीरसेन च ।
विधिना मर्द्दयित्वा तु नष्टपिष्टं तु कारयेत्[5] ॥ १८० ॥
कान्तचूर्णत्रुटिं[6] दत्त्वा मूकमूषागतं धमेत् ।
गुटिका[7] जायते दिव्या वक्त्रस्था सर्व्वसिद्धिदा ॥ १८१ ॥
सुभगं माक्षिकं[8] चैव वज्रमभ्रकमेव च ।
हेम शुल्वं तथा तारं[9] समभागानि कारयेत् ।
वज्रबद्धा तु गुटिका वक्त्रस्था सर्व्वसिद्धिदा[10] ॥ १८२ ॥
भ्रामकं माक्षिकं चैव लोहत्रयसमन्वितम् ।
शक्तिवीजसमायुक्तं वीजत्रयसमन्वितम्[11] ॥ १८३ ॥
त्रिदण्डीमर्द्दितं सूतमेकीकृत्य[12] च गोलकम् ।
अन्धमूषागतं ध्मातं समावर्त्तं तु[13] कारयेत् ॥ १८४ ॥

(1) B reads सर्वार्थसंधापहं. D reads सर्वार्थसंतापहं. K reads सेर्वाग्नि-संतापहं. (2) D and K read पूर्वासिद्धिरसो, which is incorrect. (3) B reads पादांश. (4) B reads कलांशेन. (5) D wants this charaṇa and the next one. (6) B reads त्रटि, which seems to be incorrect. (7) B reads घुटिका. (8) D has सुवर्ण सुभगां, which is not correct. (9) D reads ताम्रं. (10) This hemistich and the next one are not found in K. (11) D wants this hemistich. (12) D and K read सूतमेकीकृत्वा, which is grammatically incorrect. (13) B reads समावर्त्तस्तु, which is not correct.

पूजां कृत्वा क्षिपेद्वक्त्रे षण्मासात् स भवेत् प्रिये ।
अभयः सर्व्वशत्रूणां[1] वज्रकायो महाबलः ॥ १८५ ॥
नन्दिकेश[2]कुमाराद्या भक्ष्यमाणं हरन्ति ये ।
नष्टच्छाया न दृश्यन्ते हस्ते ददति[3] भस्म च ॥ १८६ ॥
क्रियमाणं रसं तैस्तु[4] मूढबुद्धिर्न पश्यति[5] ।
कथयेत् सर्व्वजन्तूनां न मे सिद्धो[6] रसायने ॥ १८७ ॥
मनसा रससिद्धिस्तु[7] तथा क्लेशो मया कृतः[8] ।
मया कृता द्रव्यहानिर्दुर्धिया[9] मूढचेतसा ॥ १८८ ॥
ईदृशं नैव जानाति[10] विधिहीनं मया कृतम् ।
पापिष्ठो दूषयेच्छास्त्रमात्मकर्म्म न विन्दति ॥ १८९ ॥
विधिहीनो रसो देवि[11] नैव सिध्येत्[12] कदाचन ॥
शास्त्रहीनस्य देवेशि नैव सिद्धिर्वरानने[13] ॥ १९० ॥
अशुभैः कर्म्मभिः सर्व्वैः[14] सम्प्रदायो न सिध्यति[15] ।

(1) B reads सर्व्वशस्त्राणां. (2) B and D read नन्दिस्कन्द, which is a repitition. (3) D reads ददाति, which is grammatically incorrect. (4) क्रियमाणं रसैस्तैस्तु, a variant in K, which is incorrect. (5) D reads नियच्छति. K reads न यच्छति. (6) B, D and K read सिद्धि, which is grammatically incorrect. (7) K reads रससंसिद्धिः. (8) D and K read तस्य. D reads कृतिः instead of कृतः. (9) D and K read दुःप्रिया, which is incorrect. (10) इद्रसं नैव जानामि, an incorrect variant in D. (11) D and K read erroneously देवी. (12) D reads सिद्धिः. (13) नैव सिद्धि रसायने, a variant in K, which is partly incorrect. (14) D reads पूर्वैः. K reads सद्यः. (15) संप्रदायो न सिध्यते, a variant in B. संप्रदायेन सिध्यति a variant in D.

न सिध्येद्रसशास्त्रे तु[1] न सिध्येत्तादृशो गुरु.[2] ॥ १८१ ॥
न प्रापेत्तादृशीमाज्ञां[3] नैव ज्ञानं च तादृशम्[4] ।
न प्रापेत्तादृशीं नारीमेकचित्तां वरानने ॥ १८२ ॥
न प्रापेद्रसवन्तं च तां च देवीं रसाङ्कुशीम्[5] ।
यस्य तुष्टः शिवः साक्षात्तस्य सिद्धो[6] रसायने ॥ १८३ ॥
पुनरन्यत्[7] प्रवक्ष्यामि गोलबन्धनमुत्तमम् ।
येन भक्षितमात्रेण[8] जायते ह्यजरामरः ॥ १८४ ॥
गन्धाभ्रकान्तसहितं भानुखर्परकाञ्चनम् ।
समं तीक्ष्णं[9] रसेन्द्रस्य बद्धं कृत्वा तु गोलकम् ॥ १८५ ॥
रसेन्द्रं पञ्चपलिकं[10] समभागेन मेलयेत् ।
सप्तजम्बीरतोयेन[11] मर्द्दयेद्गोलकस्य च[12] ॥ १८६ ॥
छायाविशुष्कं गोलं तु शशिभावं करोति तत् ।

(1) न सिध्येत्तादृशे शास्त्रे, a variant in D. (2) न सिध्येत्तादृशैर्गुणैः, a variant in D. न सिध्येता वरानने, an incorrect variant in K. (3) D reads तादृशीं विद्यां. (4) ज्ञानं स्थानं द्रशान तादृशं, an incorrect variant in D. This hemistich and the next one are not found in K. (5) B reads रसांकुशां. (6) K reads erroneously सिद्धि. (7) B, D and K read पुनरन्यं, which is grammatically incorrect. (8) येन च चण-मात्रेण, a variant in D. येन भक्षणमात्रेण, a variant in K. (9) D reads समं जीर्णं. K reads समौ जीर्णं. Both are partly incorrect. (10) रसेन्द्रं पञ्चमेलकं, an incorrect variant in D. (11) B reads सप्तमं यवा-क्षस्य. K reads सप्तवीजं रसो येन. (12) यथा तद्गोलकस्य वा, a variant in B. गोलकस्य यवाक्षया, an incorrect variant in K.

एतत् सर्व्वं विमर्द्यं तु सूतकं गोलकस्य च[1] ॥ १८७ ॥
तत् करीषाग्निना भूमौ मृदुस्वेदं तु कारयेत् ।
वक्त्रे स्थितमिदं गोलं चामरताप्रदायकम् ॥ १८८ ॥
सूतगोलकजातस्य फलं वक्तुं न शक्यते[2] ।
रसायने वर्णकरो[3] रससिद्धिप्रदायकः[4] ॥ १८९ ॥
सुगन्धलेपताम्बूल-कस्तूरीकुङ्कुमागुरु ।
श्रीखण्डं मृगनाभिश्च कङ्कोलं जातिकाफलम्[5] ।
अन्यानि च सुगन्धीनि[6] स्नाने पाने प्रदापयेत्[7] ॥ २०० ॥
[कुञ्चिताग्रास्तु यत्केशा[8] या श्यामा[9] पद्मलोचना ।
विस्तीर्णं जघनं यस्याः सङ्कीर्णं हृदयं भवेत् ॥ २०१ ॥
कृष्णपक्षे भवेद्यस्या युवत्याः पुष्पदर्शनम्[10] ।
कामिनी सा समाख्याता[11] उत्तमा च रसायने ॥ २०२ ॥
आलिङ्गने स्पर्शने च मैथुनालापयोरपि ।
सर्व्वरोगविनिर्म्मुक्तो वलीपलितवर्ज्जितः ॥ २०३ ॥][12]

(1) This hemistich and the next two are not found in D. (2) This hemistich is not found in B and K. (3) D reads वर्तकरो. K reads वातकरो. (4) This hemistich is not found in B. (5) D reads जायकाफलम्. (6) B and D read सुगन्धानि. (7) स्नान-पानानि यानि तु, a variant in B. (8) आकुञ्चिताग्रा यत्केशा, a variant in D and K. (9) D reads श्यासाग्रा, which is incorrect. K reads श्यामा या. (10) D reads erroneously पुष्पदर्शने. (11) K reads संख्याता. (12) The above three ślokas within brackets and the following two ślokas within brackets seem to be a repitition of the previous ślokas—165, 166, 167, 168 and 169. As these were found in all the texts, we have kept them within brackets.

शतरोगं विनश्येत[1] मुखमध्ये धृतेषु च[2] ।
यवतुल्यप्रमाणेषु जीवेद्वर्षशतत्रयम् ॥ २०४ ॥
अथ षोड़शवर्षाणि[3] षोड़शानि सुरेश्वरि[4] ।
धृतानि मुखमध्ये तु तेषु वक्ष्यामि ये गुणाः ॥ २०५ ॥
[नासौ छिद्येत शस्त्रैश्च पावकेन न[5] दह्यते ।
वायुवेगो महातेजाः कामदेव इवापरः ॥ २०६ ॥
इच्छया जायते दृश्यो ह्यदृश्यश्चैव जायते ।
तस्य संस्पर्शमात्रेण सर्व्वलोहानि काञ्चनम्[6] ॥ २०७ ॥]
पुनरन्यं प्रवक्ष्यामि वज्रबन्धं सुरार्च्चिते[7] ॥ २०८ ॥
हीनाङ्गोऽभ्यधिकाङ्गश्च[8] सव्याधिः कुब्ज आनतः[9] ।
नताङ्घ्रिः[10] पाणिनिःसृतो[11] जरया क्षोभितेन्द्रियः[12] ।
जड़गद्गदमूकोऽपि[13] गतिहीनस्तथैव च[14] ।

(1) B reads शतधृतेषु पश्चादशसु, which has no sense. (2) K reads मूखामध्ये धृतेऽथवा, wherein the first term is incorrect. (3) अथवा षोड़शचूर्णानि, a variant in D. (4) वच्म्यन्ते सुरसुन्दरि, a variant in D. (5) D reads पावके नैव. (6) This hemistich is not found in D. (7) B reads सुरेश्वरि. (8) B has हीनांगाभ्यधिकांगाश्च, D has हीनांगाविहीनाङ्गाश्च. K has हीनांगाप्यधिकांगाश्च. (9) B reads कुब्जमागतः. D reads सर्वे व्याधिपराजिताः. K reads कुमागतः, which is incomplete. (10) B reads गतांघ्रिः. (11) जराजर्जरिताङ्गाश्च, a variant in D. (12) जरयक्तो जितेन्द्रियः, a variant in B. कामयन्तो जितेन्द्रिया, a variant in D. जराग्रस्ताजितेन्द्रियः, a variant in K. (13) जगदमूकोपि, an incorrect variant in B. अनांगणनिहीनोपि, a variant in D, which has no sense. जड़गदमूकापि, an incorrect variant in K. (14) D reads मूको वाग्मिविहीनकः. K reads चंगहीनसथैव च, which is a repitition.

शङ्कत्वचविनिर्मुक्तो[1] जीवितैरेव तिष्ठति[2] ॥ २१० ॥
बद्धस्यास्य प्रभावेन समावर्त्तो यदा भवेत्[3] ।
कोटिवेधि रसं ग्राह्यं पिण्डषट्केन संयुतम्[4] ॥ २११ ॥
एकैकस्य तु मध्यस्थां गुटिकां कारयेद्बुधः ॥ २१२ ॥
गुटिकाः पञ्चसंख्याताः षष्ठी चैव तु पञ्चमी[5] ।
षट्संगुणितपिण्डं स्यात्[6] ताम्रपात्रं सुशोभनम् ।
ऊर्द्धं[7] पुरुषमात्रं तु पुरुषार्द्धं च[8] मण्डलम् ।
चतुर्मुखकृतं[9] काष्ठं तस्योपरि निवेदयेत् ॥ २१३ ॥
सघृतं च महातैलं समभागेन लेपयेत्[10] ।
पूजयित्वा कटाहं तु दिक्पालांश्चैव पूजयेत् ॥ २१४ ॥
कुमारीं पूजयेत् पश्चाद्दद्याद्दिक्षु बलिं[11] तथा ।
धमनं तत्र कुर्व्वीत चतुर्द्दिक्षु शनैः शनैः ॥ २१५ ॥
सुतप्तं च विधातव्यं[12] निर्धूमं च यदा भवेत्[13] ।

(1) D has सुखत्वं च विनिर्मुक्तो, which is senseless. K has षंडत्वं च षिनिर्मुक्तो, which is also absurd. (2) जीवेच्च शरदां शतं, a variant in D, which is quite opposite in meaning. जीवशेषेऽवतिष्ठते, a variant in D. (3) D reads मुखमध्ये प्रदापयेत्. (4) पिंडषट्कोणसंस्थितः, a variant in D and K. (5) B reads षष्ठं चैव च पञ्चमम्. D reads षष्टांशं पञ्चमं. K reads षष्टां चैव तु पंचमं. (6) B reads पिण्डस्था. D reads पिंडे स्यात्. (7) B reads अर्धं. (8) B has पुरुषार्धंच. (9) B reads चतुर्मुखे कृतं. (10) D reads मेलयेत्. (11) D reads दद्याद्दर्हं. K reads बलीं. (12) स्रतं तस्य विधानं तु, a variant in D. सूतं तस्य विधानं तु, a variant in K. (13) रक्तवर्णं भवेत्तदा, a variant in D. K reads यथा भवेत्.

तदा नत्वा गुरुं देवं[1] चन्द्रार्कादि[2]ग्रहानपि ।
नक्षत्राणि च संपूज्य[3] आत्मानं तत्र निक्षिपेत्[4] ॥ २१६ ॥
पृथिव्यापस्तथा तेजो वायुराकाशमेव च[5] ।
सुदुर्लभं विजानीयात्[6] सिद्धिरूपं नियोजयेत् ॥ २१७ ॥
कललं च भवेत् सर्व्वं पुरश्चापो विनिक्षिपेत्[7] ।
रक्तवर्णं विजानीयात्तेजस्तेजसि योजयेत्[8] ॥ २१८ ॥
मांसपिण्डं भवेत्तत्र वायुं[9] तत्रैव निक्षिपेत् ।
कान्तवर्णं[10] तदा कार्य्यं निक्षिपेत् खं कपालके[11] ॥२१९॥
धमन्तं[12] हेमसंकाशं ज्ञात्वा तन्तु[13] पादयेत्[14] ॥ २२० ॥
कृत्वा तत्र महारावं[15] हुङ्कारं सुरपूजितम्[16] ।
उत्तिष्ठति[17] न सन्देहः पुष्टाङ्गो भास्करो यथा ।

---

(1) D has नत्वा गुरुं गणपतिं. K has पश्चात्. (2) K reads दर्शादि, which is incomplete. (3) B reads शशिं पूज्यं. D reads योगिनीभ्यो. K reads शशिपूजां. (4) वलिं तत्र विनिक्षिपेत्, a variant in B. (5) D reads वायाकाशमेव च, which is incomplete. (6) D reads सुदुर्दिनं. B reads सुदुर्लभं विजयेत्व. Both seem to be incorrect. (7) D reads पुरयोनिश्च, which is incorrect. (8) B reads तेजि तेजं नियोजयेत्, which is incorrect. (9) D reads यत्र. (10) D reads श्वेतवर्णं. K reads तत्तद्वर्णं. (11) B reads तत्र कपोतमे. D reads ब्रकमिल्लको. K reads ब्रकपालिको. (12) B reads भ्रमंतं. D reads धमन्ते. K reads धमते. (13) B has ज्ञातत्वं तत्र. K reads तत्र. (14) B and D read दापयेत्. (15) D reads महाद्वारं. (16) B reads ककारं. D reads वस्त्राकारं सुपूजितम्. (17) B reads उत्तिष्ठंते, which is not correct. K reads उत्तिष्ठेति, which is also incorrect.

दिव्यतेजा महाकायो दिव्यदृष्टिर्महाबलः[1] ॥ २२१ ॥
शतयोजनविस्तीर्ण-घण्टारावं सुपूजितम्[2] ।
दीप्तहेममयं दिव्यं रत्नमाणिक्यशोभितम् ॥ २२२ ॥
पुष्पमालापताकाढ्यं[3] किङ्किणीजालमण्डितम् ।
विमानोत्तममारूढं शङ्खकाहलनिःस्वनैः ॥ २२३ ॥
अप्सरोगीतवादित्रैर्नृत्यैरपि मनोहरैः ।
दिव्याभरणसंपूर्णा दिव्यमाल्योपशोभिता[4] ॥ २२४ ॥
अपाङ्ग[5]रागसम्पन्ना सुरूपा मदविह्वला[6] ।
आगच्छति न सन्देहो देवकन्योदितं प्रति[7] ॥ २२५ ॥
गृहीत्वा साधकेन्द्रं च सिद्धलोके वसेत्ततः[8] ॥ २२६ ॥
दिव्यानि स्नानपानानि[9] दिव्यान्याभरणानि सः ।
रमते शतसाहस्रं[10] सिद्धकन्याः स्मरातुराः[11] ॥ २२७ ॥

---

(1) After this śloka we find in D a portion of a work called होरामिहिर, which, being quite unconnected with the present subject, we have rejected. (2) K reads जटा च शिवपूजितं, which has no clear sense. (3) K has पुष्पमालायुतं कार्यं, wherein the last term is incorrect. (4) दिव्यमाल्यैः सुशोभिता, a variant in K. (5) B, D and K read उपांग. (6) B reads दिव्यकामिनी. (7) B reads आदेशं दीयतामिति. D reads देवकन्योदितं प्रति. (8) B reads सिद्ध—जति ताः. D reads सिद्धलोका वसन्ति च. These two readings are partly incorrect. K reads शिवलोकं वसेत्ततः. (9) K reads यानि पानानि. (10) B has रमत only. K has रमंते. (11) D and K read स्मरातुराम्, which is incorrect, as there is सिद्धकन्याः in plural number.

तस्मिन्नेकार्णवे घोरे नष्टस्थावरजङ्गमे ।
देवा यत्र[1] विलीयन्ते सिद्धस्तत्रैव लीयते ॥ २२८ ॥[2]
भूतकालान्तको नाम चण्डोऽयमुपवर्णितः[3] ॥ २२९ ॥
तत्त्वतोऽयं[4] महादेवि यदा कर्त्तुं न शक्यते ।
अनेनैव शरीरेण तदा[5] सिद्धिर्भविष्यति ॥ २३० ॥

इति श्रीपार्व्वतीपरमेश्वरसंवादे[6]
रसार्णवे रससंहितायां
देहवेधो नाम[7]
अष्टादशः पटलः ।

॥ समाप्तश्चायं ग्रन्थः[8] ॥

---

(1) B reads भुवनानि. (2) This śloka is a repitition of the previous śloka No. 170. (3) चन्द्रोऽयमुपवर्जितः, an incorrect variant in D. (4) कथंश्चायं, a reading in D. तथायं, a reading in D. तत्त-थायं, a reading in K. (5) D and K read यथा. (6) B and D want this portion. (7) D reads हेमविधो नाम, which is incorrect. (8) B has ॥ इति श्रीरससंहितायां रसार्णवं संपूर्णम् ॥

एतद्ग्रन्थसङ्कलनम् ।

काश्मीराद्दक्षिणावर्त्तात् विकानीराच्च देशतः ।
मान्द्राजाच्चैव नगरात् बहुवित्तोपघाततः ॥
प्रफुल्लचन्द्ररायेण रसायनविपश्चिता ।
श्रीमता धीमताहृत्य तन्त्राणि बहुयत्नतः ॥
तेषान्तु बहुदोषाणामशुद्धानाञ्च वर्णतः ।
पाठापाठविवेकाय विशुद्धीकरणाय च ॥
नियुक्तः श्रीहरिश्चन्द्रः कविरत्नाभिधो द्विजः ।
रसार्णवमिमं ग्रन्थं कलयामास यत्नतः ॥
कलिकातापुरे चन्द्रनेत्रवस्विन्दुसम्मिते ।
शाके ग्रन्थः समाप्तोऽयं तपोमासेन्दुजे दिने ॥

INDEX

WITH

GLOSSARY

N. B. The reader is requested to consult the Table of Errata and variants before referring to this Index.

अ

अक्ष (See विभीतं) २६८, ३६७

अगस्त्यपुष्प (Sesbania grandiflora, Pers. Beng. vaka) ७०, ७२

अगुरु (Aquilaria Agallocha, Roxb., Beng. aguru) ६

अग्निक (See चित्रक) १७०

अग्निजार (A sort of sea-grown plant) ७१

अग्निधमनी (A small species of kantakári, Beng. ganiri, also written अग्निदमनी) ५८

अङ्कोल (Alangium Lamarkii, Thwaites, Beng. ankod, also written अङ्कोट) १२१,१५२

अङ्गनायिका (d. r. अञ्जनाभिधा= कृष्णकार्पासी) ६०

अङ्गार, अङ्गारक (Charcoal of bamboo, catechu, jujube tree &c.) ४२

अजदुग्धक (Goat-milk) १०६

अजनायिका (See अङ्गनायिका) १६६

अजमारी (=अजहा, cowach, carpopogon pruriens, Beng. álákushi) ६०

अजवारि (Goat-urine) १३८

अजशृङ्गिका (A milky and thorny plant, with fruits of a crooked figure, like a ram's horn, Beng. medásingá)३६८

अजाक्षीर (Goat-milk) १२४

अञ्जन (Here it refers to स्रोतोऽञ्जन, see स्रोतोऽञ्जन) १३५, ३७६

अतसीतैल (Oil of अतसी, Linum usitatissimum, Linn., Beng. masinár tail) ४१६

अतिबला (Sida rhombifolia Linn, Beng. pítabeledá) ८७, १२२

अद्रिज (See शिलाजतु) १००

अनन्ता (Hemidesmus Indicus, R. Br., Beng. anantamúl) ५७

अनुसारित (सारितस्य त्रिगुणहेम्ना पुनः सारितम्) ३७३

अन्धनाल (नाल or pipe of अन्धमूषा, see अन्धमूषा) ६३

अन्धमूषा (A sort of crucible) (formation of) ४६, ८४, ८५, १०४, १३२, २६४, ३१८, ३२०, ३२५, ३२८, ३३६, ३३८, ३४१, ४११, ४१३, ४२८ &c.
अपामार्ग (Achyranthes aspera, Linn., Beng. ápáng) ६४, ७२, १२१, १६१, १७०, ३८८ &c.
अपामार्गक्षार (Alkali of अपामार्ग) ८६, ११८
अभया (=हरीतकी. Terminalia chebula, Retz., Beng. hartuki) २६८, ४०२
अभिषव (See अभिषेक) १५६, १६०
अभिषेक (=स्नपन। "द्रुते वह्निस्थिते लोहे विरम्याष्टनिमेषकम्, सलिलस्य परिक्षेपः सोऽभिषेक इति स्मृतः"—रस. स. Throwing water to a molten metal when it is on the fire) ५२
अभ्र (See अभ्रक) १२५
अभ्रक (Mica) (varieties of) ६८, ६६
अभ्रकपत्र (A plate of mica) ७५
अभ्रकसत्त्व (Essence of mica) १६६, ४०३
अभ्रतीक्ष्णक (See तीक्ष्णाभ्र) ३४४
अभ्रपत्र (See अभ्रकपत्र) ७५, २७२
अमल (See अभ्रक) १३२
अमलमाक्षीक (=तारमाक्षिक or रौप्यमाक्षिक. Iron pyrites of silvery, radiated crystals ; see माक्षिक) १३६
अमृता (=गुडूची. Tinospora cordifolia, Miers., Beng. gulancha) ८६
अम्ल (Acid) ४२, ६६, १००, १०३, ११४, ११६, १६५ &c.
अम्लगण (A class of acids) ६४
अम्लवर्ग (See अम्लगण) १०७, १२६, १४४, ३५७ &c.
अम्लवेतस (Rumex vesicarius, Linn., sour reed, country sorrel) ६४, ७०, ८२, ६०, १२२, १५६, ३४८ &c.
अयः (Iron) ११७
अयःकटोरक (Iron-cup) ४२
अयस (Iron) १७६, १६२, २६८
अयस्कान्त (Loadstone) ७७, १२२,

१८७, (Red) ३२४, (Yellow) ३२५, ३८६, ४०६ &c.
अरुणोत्पल (Red lotus) ७०
अर्क (Calotropis gigantea, Beng. ákanda) ७४, १२१, १२२ &c.
अर्कक्षार (Alkali of ákanda) ७४
अर्कक्षीर (Milky juice of ákanda) ६७, ११६, ११८ &c.
अर्कदुग्ध (See अर्कक्षीर) ८७, १७० ३५७
अर्कपत्री (अर्कपत्रिका) (=ईश्वरमूल, Beng. isher múl) ६१
अर्कपयः (See अर्कक्षीर) ३४८
अर्जुन (Terminalia arjuna, Bedd., Beng. arjun) १३८
अर्जुनक्षार (The text अर्जुन means here अर्जुनक्षार or Alkali of arjuna) ७४
अर्जुनी (=ज्वालामुखी=रक्तचित्रक—रसकामधेनु) ६३, ३८४
अलक (=देवदाली—रसकामधेनु ; see देवदाली) ११८
अलक (d. r. आलक, हरिताल ; see ताल) ४२४
अलम्बुषा (A sort of लज्जालुका, a sensitive plant) १६०, ४१८
अलर्क (Calotropis gigantea alba or procera, Beng. sveta (white) ákanda) १८५
अश्मदलनी (=अश्मभेदक, Beng. pátharchúr) १३१
अश्वगन्धा (Withania somnifera, Dunal, Beng. asvagandhá) १२२, ३८८
अश्वत्थ (Ficus religiosa, Linn., Beng. asvattha) ८६
अश्वमार (=श्वेत करवीर, Beng. white karabí) ३५०
अष्टमूलिका (Eight plants used for the purification of mercury) ६३
असन (Terminalia tomentosa, W. and A., Beng. piásál) ६६
अस्थिशृङ्खल (=अस्थिसंहार. Vitis quadrangularis, Wall., Beng. hádjodá) ८६
अहि (See नाग) १८८, २७७
अहिमर (See अहिमार) २६८
अहिमार (=विट्खदिर. Acacia

Farnesiana, Willd., Beng. guábáblá) १३८, ३०८
अहिराज (See नाग) २७०
अहिवल्ली (See नागवल्ली) ३४०

आ

आखुकर्णी (Salvinia cucullata, Roxb., Beng. indurkáni) ८२
आखुपर्णी (See आखुकर्णी) (Beng. bada indurkáni) ५८
आज्य (Clarified butter, Beng. ghee) ६६, ४०३
आटरूषक (Justicia adhatoda, Beng. vásaka) ३०८, ३३४
आमलक (See आमलकी) २७०, २७२
आमलकसार (Exudation of आमलक, see आमलक) ४०३
आमलकी (Phyllanthus Emblica, Linn., Beng. ámlá) ५७
आमलक्यादि (आमलकी and the rest = रक्तपीतगन्धक—रसकामधेनु) २६७
आम्ल (=अम्लरस. Sour fluid of tamarind) ७४, ७५, १३८
आर (Brass, Beng. pittala) १८८, २७८, ३८६
आरक्तराकामूल (?) (d. r. आरक्तं चार्कमूलं. Root of the red ákanda) ८५
आरक्तवल्ली (Probably रक्तवल्ली = मञ्जिष्ठा) १३३, ३१५
आरग्वध (Cassia Fistula, Linn., Beng. sondháli) १५२
आरचूर्ण (Powdered brass, Beng. pitalchúr) ३६०
आरण्यगोमय (Wild cowdung, Beng. banagobar) १६१, ३०६ ३५६ &c.
आरण्योत्पलक (Wild cowdung cakes, Beng. banaghunte or bilaghunte) ३०६, ३३४
आरनाल (See काञ्जिक) ६६, १५५, १६६ &c.
आरनालाम्ल (Sour gruel, see आरनाल) ७०
आरोट ("सुशोधितो रसः सम्यगारोट इति कथ्यते" रस. स.,"आरोटसंज्ञां लभते वारमेकं म्टतस्तु यः" रसदर्पण ; Well purified,

once killed, mercury) १५०, १६३, १६५, ३५४, ३८१, ४०१&c.
आर्द्रक (Zingiber officinale, Rosc., Beng. ádá) ६४, १४४ &c.
आवर्त्तक (= रौप्यमाक्षिक, see माक्षिक) ६८
आवाप ("इते द्रव्यान्तरक्षेपो लौहादौ क्रियते हि यः, स आवापः" रस. स. Throwing other things to the molten metals, see वाप and परिवाप) ११६, १२१
आशुगपुङ्ख (See शरपुङ्ख) १८५
आसुरी (See आसुरीलवण) १७०, १८७
आसुरीलवण (=विड़लवण, Kálá-nimak, Beng. bitlavana) १५२
आस्फोट (See अर्क ; it means also ákhrot = Juglans regia) १६०

इ

इङ्गुद (See इङ्गुदी) ३८७
इङ्गुदी (Balanites Roxburghii, Planchon., Beng. ingot) ११८, ३८८
इङ्गुदीफल (Fruit of इङ्गुदी) २५८, २६०, २७०
इन्दुरी (= इन्दुरा, सोमराजी, see वाकुची. Vernonia anthelmintica, Willd., Beng. somaráj) ६२
इन्दुरेखा (= सोमराजी, see वाकुची) ८६
इन्द्रगोप (Coccinella of various kinds) १३४, १७८, ३७४ &c.
इन्द्रगोपक (See इन्द्रगोप) १०४, ३५६
इन्द्रवारुणी (Citrullus colocynthis, Schrad., Beng. indrayava) ६०, ८८, २६१, ३४१, ३५० &c.
इष्टका, इष्टिका (A brick or brick-dust) १८७,—१५३, १६६, &c.

ई

ईश्वरी (A sort of creeper called बन्ध्याकर्कोटकी, "भूरिक्षीरपरिस्रावा" —रसकामधेनु) ६१, ३५५

उ

उच्चटा(A sort of creeper, "उच्चटा सा शुकतोटिपुटाकारदलान्विता" श्वेतगुञ्जा च, white kunch—रसकामधेनु; Beng. okrágáchh) ५६, ३५५, ३५७

उच्चटी (A sort of दिव्यौषधि) (description of) २१७

उच्चटीरस (Juice of उच्चटी) २१७

उच्चाट (See उच्चटा) २७६

उत्कटा (=सिंहलीपिप्पली, Beng. vanapipul; d.r. उर्वरा—रसकामधेनु) ६१

उत्तरवारुणी (See इन्द्रवारुणी) ८५, ८७, १२२ &c.

उदककणा(=जलपिप्पली, Commelyna salicifolia, Roxb., Beng. pánikánchdá) ६२, ११३, १६०

उदुम्बर (Ficus glomerata, Roxb., Beng. yajnadumur) ८७

उद्घाट (A sort of preparation of mercury cleared off all its defects or impurities) १३९, ३५२, ३६८

उत्थापित (Having got उत्थापन, which is defined as "स्वेदनेत्यादियोगेन स्वरूपापादनं हि यत्। तदुत्थापनमित्युक्तं मूर्च्छाव्यापत्तिनाशनम्॥" opposite of निरुत्थ, see निरुत्थ in p. 136) ३५६

उन्मत्त (See धुस्तूर) ८२, १२२, ३३५ &c.

उन्मत्तक (See उन्मत्त) ६५, ३३५ &c.

उन्मत्तनिर्य्यास (Juice of उन्मत्त) १०९

उपरस (Inferior or secondary minerals or metallic ores and earths—eight in number) ४२, (enumerated) १०८, ११५, ४०६ &c.

उपरसशुद्धि (Purification of उपरस) ११३—११४

उपविष (Minor or facticious poisons) ४२, (enumerated) ६५, १००, ४०६

उमाफल (Fruit of अतसी, Linum usitatissimum, Linn., Flax, Beng. Masiná) ७१

उरग (See नाग) १०२, १७३ &c.

उरगा (=नागी=वन्ध्याकर्कोटकी, Beng. Titkánkdi; d. r. तुरगी=अश्वगन्धा) १५२

उलूखल (A wooden mortar, Beng. udukhal) ४२

उषण (=शुण्ठी. Dry ginger, Beng. sunth) १५५

उष्णोद (A hot mineral water) २५०

उष्णोदक (See उष्णोद) २४७, २५०

ऊ

ऊर्णा (Wool, felt &c. the hair of sheep, deer, camels &c.) १०३, ११४, १३२, १५३ &c.

ऊर्द्ध्वपातन (A sort of apparatus resembling Pátana-yantra, see Ray's Hindu Chemistry, Vol. I, p. 122) १५४

ऊषण (=मरिच. Black pepper) १५५

ए

एकपर्णिका (=एकपत्रिका, Beng. gandhasati) ५८

एकवीरा (=वन्ध्याकर्कोटी) ५९

एकवीराकन्दरस (Watery juice of the root-stock of एकवीरा) २१४

एरण्ड (Ricinus communis, Linn., Beng. bherándá) १४२, १६१

एरण्डतैल (Oil of bherándá, castor oil) ९६, ९८, १०९

एरण्डवृक्ष (Plant called एरण्ड, see एरण्ड) ८८

ओ

ओषधि (An annual plant or deciduous herb) ४२

ओषधी (See ओषधि) ५६, १९४

औ

औमदण्ड (Stem of masiná tree or flax-stem) ७१

क

ककाराष्टकवर्ग (Eight objects with the letter क as their initial, kushmánda &c.) ४०९, (enumerated) ४१८, ४१९

ककुभ (See अर्जुन) २६०

कङ्कालखेचरी (A sort of औषधि) ६३, २०५

कङ्कालखेचरीतैल (Oil of कङ्कालखेचरी) २०५

कङ्कुष्ठ (One of the eight उपरस-s, a medicinal earth, coral-coloured as described in the text) ९७, १०८, ११३, १२७, १३५, ३५२, ३८५ &c.

कङ्कोल (A fragrant spice known as sitalchini) ४१७, ४३१

कङ्गुणी, कङ्गुनी (Panicum Italicum, Linn., Beng. kángni dhán) ६५

कङ्गुणीज ([Oil of] कङ्गुणी, see कङ्गुणी) ६५

कङ्गुणीतैल (Oil of कङ्गुनी, see कङ्गुनी) २२२, ३५२, ३९१, ४१२

कच्छप (See कच्छपयन्त्र) १८८

कच्छपयन्त्र (An apparatus called kachchhapa ; it is of two sorts—जलकूर्म्मयन्त्र and स्थलकूर्म्मयन्त्र ; see रसकामधेनु) १६७

कञ्चुक (Impurities of mercury—such as—क्षितिदोष, गिरिदोष, जलदोष, नागदोष, वङ्गदोष, विष, वह्नि, मल &c.) १४६

कञ्चुकितोय (Watery juice or fluid of कञ्चुकी) १२०

कञ्चुकी (=क्षीरकञ्चुकी, क्षीरीश-वृक्ष, Beng. konchdá) ५७, ५९, ६०, ७१, ११८ &c.

कञ्चुकीक्षीर (Milky juice of कञ्चुकी) ७५

कटु (Punjent, Beng. jhál) ४०९, ४१९

कटुक (See त्रिकटुक) १९८, ४१७

कटुकरोहिणी (Picrorrhiza kurroa, Benth., Beng. katki) ४००

कटुकालाबु (=तिक्ततुम्बी, Beng. titláu) १०२, १११ [२४४

कटुकालाबुक (See कटुकालाबु) २३८,

कटुकोशातकी (A sort of bitter ghoshálatá, see कोशातकी) ३३३

कटुतुम्ब (See कटुतुम्बी) १७२, १७६

कटुतुम्बी (A wild variety of Lagenaria vulgaris, Sering, Beng. titláu) ६०, १३९, २२६

कटुतैल (Mustard oil) १३१, ३९२

कटुत्रय (=त्रिकटुक. The aggregate of three spices—ginger, long pepper and black pepper, Beng. shunth, pipul and marich) ११४, १४३ २५८

कणा (=पिप्पली. Piper longum, Linn., Beng. pipul) ४०१

कण्टकारीरस (Juice of कण्टकारी =Solanum xanthocarpum, Schrad.) ३०९

कण्डूलसूरण (Itchy सूरण= Amorphophallus campanulatus, Blume., Beng. buno ol) ८७

कतक (Strychnos potatorum, Linn., Beng. nirmali) १७२

कदम्बक (=माक्षिक. See माक्षिक) २९९

कदली (Musa sapientun, Linn., Beng. kalá) ६२, ६४, १२१, १४२, १६०, ४१९ &c.

कदलीकन्द (Root-stock of the plantain tree, Beng. kalar ete) ९७, १३०, ३०९ &c.

कदलीकन्दक (Root-stock of plantain tree) ७४

कदलीकन्दतोय (See कदलीकन्दनिर्य्यास) १३०

कदलीकन्दनिर्य्यास (Watery juice of the root-stock of the plantain tree) १६१

कदलीकन्दसार (See कदलीकन्दनिर्य्यास) ९७, ११३

कदलीरस (Juice of the plantain) ९६, ९७, ९९

कनक (Gold) १२४, १३०, १७०, १७२, २४५, २६१, २९४, ४१३ &c.

कनक (A sort of dhuturá called kanak dhuturá) ३३२, ३४१, ३५०, ३६४ &c.

कनकमाक्षिक (=स्वर्णमाक्षिक. See माक्षिक) ३८५
कनकरस (Milky juice of kanaka dhuturá) ३८७
कन्द (=शूरण. See शूरणकन्द) ८६, ११८
कन्दपद्मिनी (A sort of महौषधि) ३१३
कन्या (=घृतकुमारी. Aloe Vera, Linn.) ३६८
कन्यारस (Juice of कन्या, see कन्या) ४०३
कपर्द (=वराटक. Beng. cowrie) ३८८
कपाली (Embelia Ribes, Burm., Beng. vidanga) ७३
कपाली (One of the impurites of mercury—see कापाली) ३६१
कपि (=कपिकच्छु=शूकशिम्बी. Mucuna pruriens, D. C., Beng. álákushi) ७०, ७२
कपित्थतोय (Watery juice of कपित्थ=Feronia elephantum, Corr., Beng. kathbel) १३१
कपिलाक्षगोतक्र (Buttermilk produced from the milk of a black-coloured kapilá cow) ४२४
कपोतक (The pigeon, Beng. páyrá) ४१९
कपोताख्य पुट (An apparatus for roasting, digesting or subliming metals, minerals, or drugs, called kapota, "यत् पुटं दीयते भूमौ अष्टसंख्यवनोपलैः", see पुट and पुटपाक) ४४, १६१
कपोतिका (=चाणक्यमूलक. A sort of मूलक, Beng. chanak múla, see मूलक) ५७
कम्बु (Conch, Beng. sánk) ३८८, ३९०, ३९१
करक (=पलाशवृक्ष, Butea frondosa, Roxb.) ३४८
करञ्ज (Pongamia glabra, Vent., Beng. dahar karamchá) ११८
करञ्जतैल (Oil of करञ्ज) १०४, १०९, ३९४ &c.
करञ्जफल (=कपित्थ. Feronia elephantum, Corr., Beng. kathbel) २७१

करञ्जाख्य (See करञ्ज) १३९
करवीर (Nerium odorum, Soland., Beng. karabí ; also a sort of creaper "हयमारसमाकारा लता पुष्पसमन्विता, करवीरलतेत्युक्ता"—रसकामधेनु) ६५, ७०, ८७
करवीरक (See करवीर) ३८२
करिन् (See नाग) ३७९
करिषाग्नि (A fire of dry cow-dung) ३४३
करीषाग्नि (See करिषाग्नि) ४४, ४३१
कर्कट (=कर्कटक. A sort of कन्दविष) १३२
कर्कटास्थि (Crab-shell) ८६, ८७, ३१०
कर्कटी (A sort of cucumber, Cucumis Melo, Linn., Beng. kánkud) ४१८
कर्कोट (See कर्कोटी) ४१९
कर्कोटी (=कर्कोटिका, Beng. kánkrol) ६०, १५५
कर्कोटीकन्द (Bulbous underground stem of कर्कोटी) २१५
कर्णाख्य (=श्वेतझिण्टी. White Barleria cristata) १३२
कर्त्तरी (A sort of महौषधि) २३४, (origin of) २३५, (varieties of) २३५—२३६
कर्दम (=पङ्क, "सद्रवा मर्द्दिता सैव (कज्जली) पङ्क इत्यभिधीयते"—रसकामधेनु) २७२
कर्पूर (Camphor) ६, ८४, १७०, ३३२, ४१७
कर्षक (A sort of kánta or kántapásháṇa, see कान्तपाषाण) ७६, ३६६
कर्षाग्नि (See करिषाग्नि) ४४, १४६
कर्षानल (See करिषाग्नि) १८६
कलल (The uterus, the embryo ; here it means मांसपिण्ड) ४३४
कल्क (A paste prepared by grinding dry or fresh vegetable substances on a stone with a muller, and then making a thin paste, with the addition of water when necessary ("यः पिण्डः स्याद्द्रवाणां

स कल्क इति कीर्त्तित:—योगतरङ्गिणी) ७५, १२६, १७२, (a stage of रस) ३४५

